Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vol. XIV, No. 1.] [April, 1931.

१८५३ शकीये वैशाखे १४श-वर्षस्य १म-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारते भातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री, एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরঞ্জন তৈল

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশ রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা, প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থের গৃহেও কেশরঞ্জনের সমাদর। আপনি ও ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

May, 1931.	१८५३ शकीये वैशाखे १४वर्षस्य १म-संख्या	Vol. XIV. No. 1.

शोकाश्रुनिर्भरः *

(१)

[निबन्धकः—श्रीकालीपदतर्काचार्य्यः]

यातोऽस्तं तपनः सुधांशुकिरणा लुप्ता नभः प्रावृतं
जीमूतैरतिभीषणैः प्रतिदिशं ध्वान्तं समुज्जृम्भते ।
सूचीभेद्यतमोविभेदनिपुणा विद्युन्न विद्योतते
दृष्टिर्नश्यति विश्वमेव तमसामिकायनं दृश्यते ॥

पूर्व्वस्यामुदितः पवित्रसविता दिव्यप्रभामण्डलैः
सर्व्वा एव दिशो विधाय विमला यातो दिशं पश्चिमाम् ।
हा हा हन्त चिरं ततोऽपि न विधेः सह्या तदीया स्थितिः
काले सोऽद्य गतो लयं शिवपुरे श्रीविश्वनाथेश्वरे ॥

विद्यादानकुतूहलेन किल यो वाराणसीपत्तने
वासं कल्पितवाननल्पगरिमा युक्तः स्वकीयैर्गुणैः ।

* पण्डितप्रवर-महामहोपाध्याय-स्वर्गत ৺वामाचरणन्यायाचार्य्यमहोदयानां परलोकप्रयाणे संस्कृतसाहित्यपरिषदो विशेषाधिवेशने वाचितोऽयं निबन्धः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्या यस्य परःशताः सुयशसा दीप्ता दिशस्तन्वते
सोऽयं हन्त लयं गतः शिवपुरे श्रीविश्वनाथेश्वरे ॥
सारल्यं शिशुतोचितं सुमधुरा वाचः स्थिरं मानसं
सत्यैकप्रियता प्रिया व्यवहृतिः शास्त्रे च निष्ठा परा ।
यं विद्वन्मणिहारहीरमगमन् सम्भूय सर्वे गुणाः
सोऽयं हन्त लयं गतः शिवपुरे श्रीविश्वनाथेश्वरे ॥
तर्कं कर्कशताविशेषविषमं द्वेष्यं जनो मन्यते
तत्रैवातितरां सरागहृदयो बाल्याच्चिरं यः स्थितः ।
न्यायाचार्यपदैकवेद्यविबुधः सम्राट्समाराधितः
सोऽयं हन्त लयं गतः शिवपुरे श्रीविश्वनाथेश्वरे ॥
प्राच्याध्यापनपद्धतिः सुविषमा येनाश्रिता लीलया
तर्कैकप्रतिभाप्रकाशवशतो यं दर्शनान्याश्रयन् ।
विद्योद्योतनिराकृतान्तरतमा विद्यार्थिकल्पद्रुमः
सोऽयं हन्त लयं गतः शिवपुरे श्रीविश्वनाथेश्वरे ॥

हे धीर शोकाम्बुधिनीरपूरे विसृज्य दीनस्वजनानकस्मात् ।
कस्मादुपास्याद् गिरिशात् पृथक्त्वं जहासि काशीनगरीविहारी ॥
अम्बामसम्भाव्य जराविशीर्णां पूर्वं यदासीदसि देवभूयम् ।
तवायमन्यायपथावतारो न्यायैकनिष्ठस्य किमस्ति योग्यः ॥
सरस्वती रोदिति निःशरण्या पुण्यानि हा हन्त निराश्रदानि ।
दाक्षिण्यसौजन्यगुणप्रबन्धा बन्धोरसम्बन्धवशेन शोच्याः ॥

आस्तामस्तमितव्यथं तव पदं लोकोत्तरं शर्मदं
संसारे सुचिरं विषादविषमे का वा शुभाशंसना ।
शोकादेष पुनः सुधीपरिकरस्त्वामन्तरेणान्वहं
शोच्यो लोचनवारिवारणकृते कं मार्गमालम्बताम् ॥
शुद्धिं साधयितुं निजां हवनजामग्न्याहितानां व्रतं
येनाधारि धरासुरेण गुरुणा वाराणसीप्राङ्गणे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिः किञ्चन काञ्चनाभमनघं सञ्चिन्त्य योगैस्तनुः
सोऽयं स्वीयतनुं तनोति विलयं श्रीविश्वनाथेश्वरे ॥
मायामामयसम्मितां जनिमतामुच्छिद्य कर्म्मोद्गतैः
कल्याणैरपुनर्भवं गतवता तृप्तिः परासादिता ।
तस्मादेव वियोगशोकविवशान् बन्धूनिहोपेक्षसे
पीयूषाम्बुनिधौ निमग्नवपुषो मिष्टान्तराशा कुतः ? ॥
न्याये नित्यमनन्यधीरसुलभा निष्ठा क्व ते प्रस्थिता
भक्तिर्मातरि सोदरे नयपरे स्नेहो विलीनस्तथा ।
शिष्येषु प्रणयो गुरौ च विनयः प्रागात् क्व वाद्दृश्यतां
सर्व्वाण्येकपदे लघूनि किमहो मोक्षाम्बुधौ मज्जतः ॥
माता धूलिविलुण्ठिता विलुलिता शोकेन मोहं गता
रोदित्येष सहोदरस्तव पदोपान्ते दृढं बालवत् ।
अन्ये च स्वजना जना इव घनामार्त्तिं पुरो बिभ्रते,
तत् सर्वं किमुपेक्षसे क्व नु गता पूर्व्वानुकम्पा निजे ॥
यशोऽभिसन्धानविमुक्तचेतसा
कृतोपकारा भवता सुदुर्गताः ।
जनाः कमद्यानुसरन्तु दुःखिता
विलोचनाश्रूणि विना विना त्वया ॥
कैलासाधिपदिष्टमिष्टफलदं दिव्यं विमानं श्रितः
कैलासाश्रममेत्य शङ्करतनौ लीनश्चिरं तिष्ठतात् ।
दुःखाभोगमसह्यवेदनमयो मोहेन हीनो भवान्
उत्तीर्णं परमार्थलाभवशतो भूयात् कृतार्थः परम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकाश्रुनिर्झरः

(२)

[निबन्धकः—श्रीनारायणशास्त्री खिस्ते]

अहहाऽखिलभारताऽवनि-
प्रथिताशेषविपश्चिदीश्वरः ।
करुणाविमुखेन मृत्युना
बुध वामाचरणो बलाद्धृतः ॥१॥

अयि ! काल ! कराल ! किं ब्रुवे
भवता निष्ठुरचेतसा हठात् ।
मृदिता प्रथिताढ्यसौरभा
ननु वैदुष्यसुरद्रुमञ्जरी ॥२॥

कणभक्षनयः स मूर्तिमान्
अवतीर्णः किमु गौतमः स्वयम् ।
अकृपेण विधे ! कथं त्वया
सहसैवापहृतो बुधेश्वरः ॥३॥

कमुपाश्रयतां निराश्रया
जरती सम्प्रति तर्कभारती ।
अवलम्बनयष्टिकां करात्
सहसाऽऽच्छिद्य जहार यद्विधिः ॥ ॥

अयि ! काशि ! कशाप्रहारतो-
ऽप्यधिकं दुःसहमेतदस्ति ते ।
तनयो नयपारगः कृती
बुध वामाचरणोऽद्य नास्ति यत् ॥५॥

नृपनिर्मितपाठशालिके !
कुपितो हन्त विधिस्त्वयि ध्रुवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरमस्त्वव धूर्वहः सुधी-
बुंधवामाचरणोऽपि यन्नतः ॥६॥

मलिना रघुनाथदीधितिः
क्व नु गङ्गेशगवीविचारणा ? ।

अहहाऽस्तमिता महीतला-
न्मथुरानाथ-गदाधरोक्तयः ॥७॥

गहनाः खलु तर्कफक्किकाः
प्रविभज्य प्रतिपादयेन्नु कः ।

न च कोऽपि तथाविधोऽस्ति हा-
ऽखिलविद्यार्थिजनोपकारकः ॥८॥

सुहृदो निधनेन दुःखितः
प्रथितो लक्ष्मणशास्त्रि-पण्डितः ।

श्रुतिसान्ध्यपथाऽवनेऽधुना
न सहायान्तरमीक्षते क्वचित् ॥९॥

नवपण्डितमण्डलोत्तमो
बुधराजेश्वरशास्त्रिसत्तमः ।

नवकल्पनया गुरुं निजं
कथमानन्दयतां दिवं गतम् ॥१०॥

स्मितशोभितमाननं सदा
सदया दृङ् मधुरञ्च भाषितम् ।

व्यजनेन कवित्वलेखनं
क्व पुनर्दृष्टिपथं प्रयास्यति ॥११॥

पितरीव सदाश्रवोऽग्रजे
कवितासाचरणस्तु नः सुहृत् ।

अधुनाऽशनिपातदारुणं
विरहं तस्य सहेत हा कथम् ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लसतीव पुरः स मूर्तिमान्
द्रुतहेमाभवपुः स्मितोत्तरः ।
व्यथते हृदयं शुचाप्लुतं
सकलं शून्यमिवावलोकये ॥१३॥

हा हा सम्प्रति विश्वमेव सकलं निःसारमाभाति नः
शोकेनाकुलतामिता सुजनता हा हन्त सन्तप्यते ।
ब्रूमः किं बहुनाऽधुना स भगवान् वेदात्मको भास्करो-
ऽप्युच्चैरभ्रपटावगुण्ठितशिरा मालिन्यमालम्बते ॥१४॥

काशी सम्प्रति नैव राजतितरां शून्येव दीनाकृतिः
शोभां मुञ्चति राजकीयसुरगीर्विद्यालयेऽप्यद्य हा ।
छात्राम्भःत्वविलोपदूनमनसस्तप्यन्त एवान्तरे
न्यायाचार्यवरे विहाय सुहृदः शैवं प्रयाति पदम् ॥१५॥

अधिकाशि विमुच्य पार्थिवं वपुरीशानकृतोपदेशभाक् ।
अधुना शिवरूपतां गतो बुध-वामाचरणोऽभिवन्द्यते ॥१६॥

शोकाश्रुनिर्भरः

(२)

[निबन्धकः—श्रीगोपीचन्द्रसांख्यतीर्थः]

स वामाचरणन्यायाचार्य्यवर्य्यः सतां पतिः ।
छात्रमित्रदयाधर्म्मज्ञानमानयशोगतिः ॥१॥

अन्तर्बहिर्विशदसुन्दरसौम्यमूर्त्तिः कैलासचन्द्रधवलातुलमूर्त्तकीर्त्तिः ।
पञ्चाननप्रकटितप्रचुरप्रभावः श्रीलक्ष्मणान्वितविलक्षणधर्म्मभावः ॥२॥

राखालदासहृदये विलसन्निवासः प्रेमप्रमुग्धफणिभूषणशङ्करश्च ।
प्राचीनरीतिरतिरुन्नतचित्तवृत्तिः स्वप्नेऽपि यस्य न कदाप्यपथे प्रवृत्तिः॥३॥

धर्म्मस्य मर्म्मविदजातरिपुर्द्वितीयो लोकोपकारकरणव्रतनिष्ठितश्च ।
ब्राह्मण्यमन्दिरधरस्फटिकप्रकाण्डस्तम्भोऽद्य कालहतकेन हतः पपात ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूर्त्तिं श्रुतिप्रकृतिकीर्त्तिं सुनीतिरीति-
धृत्यादिभिर्बत मनोहरसुन्दरस्य ।
मृत्युर्न युक्त इति चिन्तयता विधाता
नीतः स निश्चितममृत्युसमर्पणाय ॥५॥

किं वाद्य देवगुरुणा गुरुरेष देवः
स्पर्धां विधाय सुरसंसदि कीर्त्तिकामः ।
मर्त्त्यस्य मामयशसो विशदं शरीरम्
एनं निनाय बत दर्शयितुं सुराणाम् ? ॥६॥

हाहा कठोरहृदयः कुटिलश्च काल
एवंविधान् गुणनिधीन् बहुशोऽपहृत्य ।
भीतोऽतिभीत इव चात्मवधाददृश्यो
जीवत्यहो वयमतः प्रतिकुर्म्महे किम् ? ॥७॥

सुधानिधिश्चण्डकरायतेऽद्य नो वज्रायते शीतसमीरणो मृदुः ।
भारायते जीवनमेतदप्यहो शून्यायते सर्व्वमिदं चराचरम् ॥८॥

वयस्यल्पीयसि ज्ञानं विद्या मानं यशो धनम् ।
सुखदानि नृणां किन्तु मृत्युरत्यन्तदुःखदः ॥९॥

भो भारतीप्रियतमास्तनयाः सुधीराः
शोकोऽयमल्प इव मे प्रतिभाति चित्ते ।
शोकः स एव हि महानतिदारुणश्च
यन्नेदृशः पुनरिहैष्यति कोऽपि शोकः ॥१०॥

प्राणिष्वदेष,यदि वर्षशतञ्च धीर-
स्तुल्यः किमाविरभविष्यदमुष्य कोऽपि ? ।
एतावतापि समयेन न लब्ध एकः
सत्त्वे तु तस्य भवितेति न किं दुराशा ? ॥११॥

भवन्त्वेवंविधाः शोका गौरवानन्दगर्भिताः ।
पतन्त्वजस्रमश्रूणि भान्तु शोकसभास्तथा ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हाहाकारास्तथा सन्तु स्फुटन्तु हृदयानि च ।
विषीदन्तु जनाः सर्वे हन्त भीष्मविनाशवद् ॥१३॥

हे वाणि ! वाणि ! शतशश्च सहस्रशश्च
शोकैर्विदग्धहृदयापि च जीवसीव ।
अद्य ह्यसह्यविरहादिव वज्रपातात्
प्राणिष्यसीह कथमित्यह हा बिभीमः ॥१४॥

जीविता ये वयं पूर्वं मर्त्येन भवता गुरो ।
त इदानीमस्तभाग्या अमर्त्येन मृता इव ॥१५॥

प्राणोपमान् प्रियतमाननुजात्मजादीं-
श्छात्रांश्च नोऽद्य परिहाय गतोऽसि गच्छ ।
वृद्धां पवित्रचरितां चिरतापसीं तां
हाहा जहासि जननीमिति किं कृतं ते ॥१६॥

यच्चाग्निहोत्र-हुतभुक् तव कामपूरः
शोकाग्निसम्मिलितदीप्तशिखः स तीव्रः ।
सर्वं दहन्निव जगन्निजसर्वभुक्त्वं
हा हाधुनातिकठिनः प्रकटीकारोति ॥१७॥

त्वामाश्रयन्ननुदिनं बहुशोऽर्चितश्च
हाहाद्य होमदहनः प्रदहन् भवन्तम् ।
हन्ताश्रयाशपददोषमिवेत्य दुःखा-
न्निर्व्वाणतामित इतो भवता समं सः ॥१८॥

दिवं गतोऽसि त्रिदशैर्विराजसे यशः सुखं शान्तिमपि प्रपद्यसे ।
तथाप्यहो दूयत एव नो मनो वियोग एकस्तव दुःसहः परम् ॥१९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्पाशास्त्रिणां पत्राणि

(६)

श्रीशिवः शरणम् । पुण्यपत्तनतः
२६० शनिवार वीथी
माघ सुदि ८।१८३१

सानुरागं सवात्सल्यं मूर्ध्नुपाघ्राय गाढमालिङ्ग्य च कुशलं वार्तयति ।

अयि जीविताभ्यधिक वत्स ! समासादितमेतत् कुशलावेदकं भवतः पत्रं कोल्हापुरतः प्रतिनिवृत्तेनेदानीं जनेनानेन । यत्सत्यं निमज्जित एवास्मेतेन प्रमदमहाम्भोधौ । प्रेष्ठ ! पत्रमिदं भवदीयमवगमयन्-मयि कृतज्ञताभावं परिस्खलयत्याबद्धधाराण्यश्रूणि । का गतिः ? अपि नाम सम्भाव्यते भवता विस्मरिष्यत्ययं जन आत्मनः प्राणानामिति ? न खलु प्रेष्ठ ! व्यपेतेष्वपि प्राणेष्वेतत् सुघटम् । एते ननु विहरन्ति भवन्तः सुखमेव मामकीने हृदये । अयमहं संलपामि निरन्तरमेव सङ्कल्पोप-नतेन भवता च प्रियबन्धुना चात्मीयेन । स्वप्नेऽपि ननु विलोकयामि प्रत्यहं वः सर्वान् । तदलमन्यथा सम्भाव्य । प्रेष्ठ ! यत् किल प्रिय-बान्धवे मदीयं हृदयं तदेतद् व्यक्तीकृतमेव मया वेणीसंहार आदित एव ।

तथापि ननु नैव प्राहायि मया पत्रमेकमपि प्रियबन्धवे भवते वेति स्थाने किलाशङ्कितं भवता । किन्तु वत्स ! कियद् वा ग्लपयामि दुर्भा-ग्योपहतः प्रत्यहमधिकाधिकमेव कष्टप्रायतामुपारूढामात्मनोऽवस्थितिं विनिवेद्य भवतां हृदयानीति तूष्णीमभवम् । दूरे किल ममावस्थाव-गमजन्य आनन्दः केवलं तु परिताप एवास्मात् सुलभो हृदयस्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकतस्तावद् गरीयस्यार्थिकी हानिरपरतो बलवच्छारीरमस्वास्थ्यं, तदन्यतः श्रीमातृदेव्या वार्धकसुलभं व्याधिवैशिष्ट्यं, तदितरतः साहाय्याभावस्तदन्यतश्चाविमृष्यकारिणा श्वशुरेण नवपरिणीतायाः सहधर्मिण्या हरणं कुमारस्य च पूर्वभार्य्यायां जातस्य परलोकप्रयाणमित्येवंविधै रन्ध्रोपनिपातिभिरनर्थैरनारतमभिहन्यमानः क्षणमप्यनधिगतस्वास्थ्यो निःसारप्रायस्य जीवितस्यास्य वियोगमेव कामयमानः किं वा कुशलमात्मनो निवेदयामि दुर्भागः? पर्य्याकुलस्यातिभूमिं गतेन व्यसनजातेन कथं वा समुत्सहिष्ये ग्लपयितुं दुःखैकसारेणात्मनो वृत्तेन कुसुमसुकुमाराणि वो हृदयानि? तत एव च वत्स! समालम्बितः कालमेतावन्तमनिच्छतापि तूष्णीम्भावो दुर्दैवविपाकाभिभूतेन तवानेन ज्येष्ठतातेन। तदलमत्र विमनीभावेन। स्थीयतां नन्वयं भवदेकजीवितो जनो निरन्तरमेव।

प्राहायि किल मया विविधविपत्प्रतप्तेन वाराणसीवासकामनया पत्रमेकं महामण्डलाध्यक्षाय। किन्तु कुतो वा भागधेयं ममैतावत्? ततश्च नैतदाश्चर्य्यं यन्न मे मनोरथः साफल्यमारूढ इति। परित्यक्तं पुनरिदानीं मया कोल्हापुरम्। अत्रैव तु कस्याञ्चिदिंग्रेजीपाठशालायां संस्कृताध्यापकत्वमापन्नोऽस्मि। अहो गरीयसी कालगतिः! श्रीमती पुनर्मातृदेवी कोल्हापुरमेवाध्यास्ते। अहं पुनरत्रैकाकी सुहृदः कस्यापि सदने निवसन्नट्टशूल एव भोजनादिकं निर्वर्त्तयन्नस्मि। सर्वथा श्रीशिवः शरणम्। वत्स! अपि नाम झगिति परित्यजेयुर्मां प्राणाः? येन दुःखतोऽस्मात् सांसारिकान्मुच्येय। अथवा 'दुःखसंवेदनायैव मयि चैतन्यमर्पितं' भगवता।

इत्थमपि व्यसनशतसमाकुलेन व्याख्यातं मया कथञ्चिद्वेणीसंहारम्। व्याचिख्यास्यते च वत्सरेऽस्मिन् प्रबन्धत्रितयम्। तदर्थं चापेक्ष्यते 'द्वादशकोषसंग्रहः'। एष च काश्यां लभ्यत इति श्रूयते। यद्येवं तदा सम्यगनुसन्धाय गृहीत्वा च प्रहीयतां यावच्छक्यं सत्वरमेव। प्रतीक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणो ह्येनमस्मि। चेष्टितव्यं किलाजीवितं पुरुषेणेत्यत एव केवलमेतदनुतिष्ठामि।

संस्कृतचन्द्रिकायास्तु विषये प्राप्तं मया प्रियबन्धोः पत्रम्। किन्तु तत्र गरीयान् व्याकुलीभाव इत्यत एव नोत्तरितम्। बलवत् किलात्र प्रतारितोऽस्मि वर्त्तमान एजेन्सीसङ्घेन 'चन्द्रिकां' च 'वादिनीं' च प्रकाशनार्थं गृहीतवता ग्राहकेभ्यश्च मूल्यमशेषमपि गृहीतवताऽन्ततश्च पत्रिकाद्वितयमपि प्रतिबद्धवता। संहितपत्रादिकमपि तदायत्तमेवेति किं वात्र करवाणि? सर्वथेदानीं धर्माधिकरणमेव शरणम्। न खलु नेच्छामि चन्द्रिकां प्रकाशयितुं, नापि वा नावगच्छामि यशःक्षतय एवाप्रकाशनमेतस्या इति; तथापि तु कालमनुकूलं प्रतीक्षमाणो विषहे तदेतदशेषमपि।

प्रेष्ठ! समवगत्य व्याकुलत्वं व्याधिभिः श्रीमत्या मे मातृनिर्विशेषायाः प्रजावतीदेव्याः परामेव काष्ठां परितापस्यानुप्राप्तोऽस्मि। हा दैव! जीविताभ्यधिकानां मे सुहृदामपि सुखं न सहसे। प्रणिपातय वत्स! विनयादरावनतं जनमेनं कुशलप्रश्नपुरःसरं श्रीमत्याश्चरणसरोजद्वितये। अपि प्रत्यावृत्तं विक्रमपुरतो मे जीवितम्? एतदिदानीं प्रणश्यति सगाढाश्लेषम्।

आयुष्मन्! निवेदय प्रणतिपरम्परां मे पण्डितप्रवराय श्रीअन्नदाचरणतर्कचूडामणिमहोदयाय। कच्चित् स्मरति मामयं महाभागः?

अत्रास्मि कुशली। श्रीमतां तु सर्वाङ्गीणं मङ्गलमनारतमेव जिज्ञासे। प्रचीयतां प्रेमेति शिवम्।

भवदेकप्रेमा
श्रीअप्पाशर्मा
२६० शनिवार वीथी, पूना सिटि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ति स्वयम्

[निबन्धकः—के. ए. रामलिङ्गशास्त्री]

अस्ति स्वयम्। कोऽर्थो वाक्यस्यैतस्य "अस्ति स्वयम्" इत्यस्य? ननु अयमेव ह्यर्थः—अस्ति आत्मा इति। कथम् इदं ज्ञायते? यावद् उक्तं भवति—अस्ति आत्मेति—तावद् उक्तं भवति—अस्ति ब्रह्मेति; —आत्मा च ब्रह्म—अस्ति तावद् ब्रह्म नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावम्, सर्वज्ञम्, सर्वशक्ति-समन्वितम्। ब्रह्म-शब्दस्य हि व्युत्पाद्यमानस्य नित्य-शुद्धत्वादयोऽर्थाः प्रतीयन्ते—बृहतेः ("बृह" "बृहि" वृद्धौ) धातोरर्थानुगमात्; "बृहत्त्वाद् बृंहणत्वाद् वाऽऽत्मैव ब्रह्मेति" गीयते। स चायम् आ कीटपतङ्गेभ्यः, आ च देवर्षिभ्यः (ब्रह्मादिस्तम्ब-पर्यन्तेभ्यः) प्राणभृन्मात्रस्य इदङ्कारास्पदेभ्यो देहेन्द्रिय-मनो-बुद्धि-विषयेभ्यो विवेकेन "अलम्" इति असन्दिग्धाविपर्यस्ताऽपरोक्षानुभव-सिद्ध इति न जिज्ञासा-(विचिकित्सा)-ऽऽस्पदम्। नहि जातु कश्चिद् अत्र सन्दिग्धे—अहम् (अस्मि) वा नाहं वेति; न च विपर्यस्यति—नाहम् एवेति नास्मेत्रवाऽहम् इति। सर्वस्य आत्मत्वाच्च ब्रह्मास्तित्व-प्रसिद्धिः—सर्वो हि आत्मास्तित्वं प्रत्येति; न नाहमस्मि इति, अहम् अस्मि इति न प्रत्येति इति न; प्रत्येत्येवेत्यर्थः। यदि हि नाम नात्मास्तित्व-प्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात्, अहम् अस्मीति न प्रतीयादित्यर्थः।

पांसुल-पादकस्य हालिकस्यापि (कृषीवलादेरपि) अस्त्यात्मेति प्रतिपत्तिः। त एते हल-जीविनः किल केदारोदरे निषण्णाः स्वीय-नयनरश्मिसम्पृक्तं, सवितृमण्डलमध्यवर्ति च तेजस्तर्जन्या "नायन्" 'नायन्' इति निर्दिश्य ध्यायन्तः,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाऽग्नौ तत्तेजो विद्धि मामकम् ॥"

इति अर्जुनाय भगवदुपदेशाऽनुसारम् अद्वैतसारम् आस्तिकेभ्यः आचचक्षत इव। "नियतिं लोक इवाऽनुरुध्यते" इति भारविश्च वरकविः चर-वनेचर-व्याहारव्याजेन सर्वोपास्यत्वं च सर्वान्तर्यामिण आत्मन सर्वव्यापित्वम् आदर्शयामासेति ज्ञायते।

स एषः, सर्वेश्वरः ईश्वरः स्थाणुः पुरुषः ········इत्याद्यैः परःशतैरभिधानैरभिधीयते श्रुतिशीर्षमल्लिका-मतल्लिकासु। "विष्णुर्विकल्पोज्झितः" परमात्मा किल अयम् अखिल-विकल्पना-विनिर्मुक्तः। विकल्पनास्तु पुरुष-बुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्; किन्तर्हि? वस्तु-तन्त्रमेव तत्। नहि स्थाणौ एकस्मिन् स्थाणुर्वा पुरुषः अन्यो वा इति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वा इति मिथ्याज्ञानम्; स्थाणुरेव इति तत्त्वज्ञानम्। तथा च आन्तराः श्लोकाः—

अस्ति स्वयमित्यस्मिन्नर्थे कस्याऽस्ति संशयः पुंसः?
अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वम् ॥

नाहमिति वेत्ति योऽगी सत्यं ब्रह्मैव वेत्ति नास्तीति।
अहमस्मीति विजानन् ब्रह्मैवाऽसौ स्वयं विजानाति ॥

ब्रह्मत्वमेव तस्माद् बहुविध-सुख-दुःखलक्षणोपेतम्।
मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ॥

न क्लेशपञ्चकमिदं भजति मनुष्यः कृतकोशपञ्चक-विवेकः।
अत एव पञ्च कोशान् कुशलधियः सन्ततं विचिन्वन्ति ॥

अन्न-प्राण-मनोमय-विज्ञानाऽऽनन्दपञ्चकोशानाम्।
एकैकान्तरभाजां भजति विवेकात् प्रकाशताम् आत्मा ॥
क्लेश-कर्म्म-विपाकाऽऽशयैरपरामृष्टः पुरुष-विशेष ईश्वरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
इन्द्रो मायाभिः पुरुरूप ईयते ॥
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद !
सर्वभूतगुणोपेतं नैव मां ज्ञातुमर्हसि ॥

ते ज्ञानयोगाऽधिगता अपश्यन्
देवाऽऽत्मशक्तिं स्वगुणैर्निगूढाम्।
वेदान्त-विज्ञान-सुनिश्चितार्थाः
सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः॥
ते ब्रह्मलोके तु परान्तकाले
परामृतात् परिमुच्यन्ति सर्वे ॥

द्वे पदे बन्धमोक्षाय न ममेति ममेति च।
ममेति बध्यते जन्तुर्न ममेति विमुच्यते ॥
दृग्-दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ ।
दृग् ब्रह्म दृश्यं मायेति इति वेदान्तडिण्डिमः ॥

"ब्रह्म वेद ब्रह्मैव भवति"
"ब्रह्मविद् आप्नोति परम्"
"अत्र ब्रह्म समश्नुते"
"नाऽवेदविन्मनुते तं बृहन्तम्"
"ब्रह्म स्वयम्भु, तस्मै ब्रह्मणे नमः"

"ओत-प्रोतम् इदं सर्वं यस्मिन् सच्चित्सुखात्मके।
पर्य्यवस्यन्ति वेदान्ताः ब्रह्म चाहं तदक्षरम् ॥"

"परेऽक्षरे सर्व एकं भवन्ति"
"अक्षरम् अम्बरान्तधृतेः"

"यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।
स तु तत् पदमाप्नोति यस्माद् भूयो न जायते ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न जायते म्रियते वा कदाचिद्
नाऽयं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

"आत्मेति तूपगच्छन्ति ग्राहयन्ति च ।"

"यच्चाप्नोति यदादत्ते यच्चाऽत्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ॥"

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन् "ईश्वर" इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते ।
स स्थाणुः स्थिर-भक्ति-योगसुलभो निःश्रेयसायाऽस्तु नः ॥

"अविकल्पविषय एकः स्थाणुः पुरुषः श्रुतोऽस्ति यः श्रुतिषु ।
ईश्वरम् उमया न परं वन्देऽनुसयापि समधिगतम् ॥"

"यस्मात् परं नापरमस्ति किञ्चिद्
यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्वम् ॥"

... ...

"पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।"

"तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलय-स्थितिसर्गाणामेकः कारणतां गतः ॥"

'यत्राऽन्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ।'

'मनसैवेदमाप्तव्यं नेह नानाऽस्ति किञ्चन ।
दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥'

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।'

'ओमिति ब्रह्म ... ...'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ॐ नमोऽहम्पदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ॥'

आत्मानुभूतिशालिभिरशालीनैर्निरन्तर्यानुसन्धाननिधानैर्योगिवरैरथ निरूपणीयम् आत्मास्तित्वम् अधुना महानुभावानां सूक्तानुवादेनैव नैवाविदितं भविष्यतीति विचिन्त्य, स्वीयवाक्यस्य निरूपणीये महत्येतस्मिन् विषये नास्त्यावश्यकतेति एतावताऽनुरणनेन उपसंहरामि च उपहरामि च नितराम् आनन्दामि चेति शिवम् ।

न्याय-वैशेषिकयोर्वृक्षादीनां सजीवत्वविचारः *

[निबन्धकः—श्रीहरिहरशास्त्री]

इह खलु निखिलजम्बूद्वीपशिक्षामहासम्मेलनावसरे, सम्पद्यमाने सुरसरस्वतीसम्बन्धशालिन्याः प्राच्यशिक्षायाः समधिवेशे विशेषतः किमपि निवेदनीयं मे श्रीमत्सु सभास्तारेषु । यद्यपि स्मृतिविषयातीतकालात् प्रभृत्येव संस्कृतसाहित्यं सर्वोत्कर्षेण वर्त्तते, तथापि केचन भरतभूजन्मानोऽपि पाश्चात्यविद्याप्रणयिनस्तस्याधिक्षेपमेव व्रतमिवाऽऽचरन्तः समवलोक्यन्ते । 'तैलाधारः पात्रमुत पात्राधारस्तैल'मित्यसारविचाराडम्बरेण भारतीयास्तार्किका मुधा समयमतिपातयामासुरिति तु केषाञ्चित् सर्वथैव रिक्तं वचः । अद्याप्येवं किमपि नूतनमाविष्करणं नाभूत्, यस्य मूलसूत्रं नैवास्ति संस्कृतसाहित्येषु । आध्यात्मिकविषयेष्वेव भारतीयमनीषिणां मुख्यतो दत्तचित्तत्वेऽपि तेषां रसायनविद्यानैपुण्याऽवलोकनेन पाश्चात्यसभ्यताऽऽलोकधन्धितचक्षुषोऽपि नितरां मुह्यन्ति,

---

* वाराणसेय-निखिलाऽऽसियाशिक्षामहासम्मेलनावसरे संस्कृतविभागे पठितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशंसन्ति च तत्कृतपारदादिजारणमारणपरिपाटीम्। किमधिकं, तत्तत्प्राचीनपरिपाटी अद्यापि परिवर्त्तनमन्तरेण साम्प्रतिक्याम् एम्. एस्. सि. कक्षायामध्यापनार्हा, इत्यपि स्वीकुर्वन्ति कतिचन पाश्चात्त्यविपश्चितो मुक्तकण्ठम्। भारतीयरसायनशास्त्रविद्भिराविष्कृतः सर्वव्याधिनिसूदनो भिषजविशेषो 'मकरध्वजः' शर्म्मण्यदेशेऽप्येतर्हि नितरामर्हित इत्यत्र तत्र तन्निर्माणकर्मस्वीकरणमेव प्रमाणभूतम्।

दर्शनविद्यासु याश्च सूक्ष्मादपि सूक्ष्मा विचाररीतयः प्राचामाचार्याणां वरिष्ठैरुपदिष्टाः, ताः खलु बोद्धुमप्यशक्या वैदेशिकैश्चिन्ताचतुरैरिति न केवलं कथामात्रमेव। एवञ्च 'वसुविज्ञानमन्दिरे' तत्रत्य-त्रयोदशवार्षिकसभाधिवेशावसरे श्रीमद्भिर्जगदीशचन्द्रवसुमहोदयैः स्वकीयमुद्भित्प्राणक्रियाविष्करणमभिनवमिव मन्यमानैर्यदुट्टङ्कितम्, तच्चिन्त्यम्। तदुक्तं तैः—

"अस्य यन्त्रस्य साहाय्येन यच्चाऽभिनवं जगदाविष्कृतमभूदितः पूर्वं तत्राऽस्माकं कापि कल्पनैव नासीत्।"—इति (आनन्दबाजार-पत्रिका, २।१२।३०)

"उद्भिदामन्येषाञ्च प्राणिनां प्राणक्रियासु कोऽपि प्रभेदोऽस्ति, इति भ्रान्तिर्यथार्थज्ञानोपचयस्य प्रत्यूहभूता।"—(आ०बा०प०, २।१२।३०)

"ये खलु प्राचीनमतमात्रमालम्बमाना वर्त्तन्ते, त एव प्रमाणसिद्धस्य सत्यस्यास्य स्वीकरणे संशेरते।" इति।—(आ० बा० प० २।१२।३०)

परन्तु नैयायिकनायकैरुदयनाचार्यैः प्रशस्तपादभाष्यव्याख्यानावसरे स्वकीये किरणावलीनिबन्धे विविधयुक्तिभिरुद्भिदां सजीवत्वप्रतिपादनं कृतमिति नैवाकर्णितं तैस्तैः पाश्चात्त्यविद्याविपश्चिद्भिरिति परं विस्मयस्थानम्। तथा हि शरीरनिरूपणावसरे भाष्यग्रन्थे वृक्षाद्युद्भिदामव्याख्यानात् किरणावलीकारैरुक्तम्,—

"यद्यपि चोद्भिदोऽपि वृक्षादयः शरीरभेदतयात्रैव व्याख्यातुमुचिताः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाप्यतिमन्दान्तःसंज्ञतया लौकिकापेक्षया सुखदुःखभोक्त्रधिष्ठानत्व-ममीषामविवक्षन् प्रायेण जङ्गमोपकारकतया तदधीनतया च विषयतां विवक्षन् तेष्वेवान्तर्भाव्य व्याख्यास्यन्ते ।"—(५७ पृ०)

विवक्षाविशेष एव निरूपणं प्रति हेतुरित्येतदर्थे भाष्यग्रन्थादेव बहून् दृष्टान्तान् प्रदर्श्य वृक्षादिषु सुखदुःखान्यतरसाक्षात्कारजनक-मनःसंयोगवत्त्वस्याऽनुमापकतयाऽनेकेषां हेतूनामुपन्यासः कृतः किरणा-वलीकृद्भिः । यथा—

"वृक्षादयः प्रतिनियतभोक्त्रधिष्ठिताः, जीवन-मरण-स्वप्न-जागरण-रोग-भेषजप्रयोग-बीजसजातीयानुबन्धानुकूलोपगम-प्रतिकूलापगमादिभ्यः प्रसिद्धशरीरवत् ।"—(५२ पृ०)

अत्र जीवनादेः प्रत्येकं हेतुता । तथा च यतो वृक्षादिषु जीवनं मरणं स्वप्नः जागरणं रोगः भेषजप्रयोगः सजातीयस्नेहव्यञ्जकचेष्टा अनुकूलवस्तुग्रहणं प्रतिकूलपदार्थपरित्यागः—इत्येते शारीरधर्माः सन्ति, तेन प्रसिद्धमनुष्यादिशरीरवत् तेषां सजीवत्वमनुमेयम् ।

आत्मनिरूपणावसरे भाष्यकारैरुक्तम्—"परिशेषादात्मकार्य्यत्वात् तेनात्मा समधिगम्यते ।" व्याख्यातञ्च कन्दलीकारैः—"ज्ञानं तावत् कार्य्यत्वात् कस्यचित् समवायिकारणस्य कार्य्यम्, शरीरेन्द्रियमनसाञ्च तदाश्रयत्वं प्रतिषिद्धम् । न चान्येषु वक्ष्यमाणेन न्यायेन ज्ञानकारणत्वं प्रति शक्तिरस्ति, अतः परिशेषादात्मकार्य्यं ज्ञानम्, आत्मकार्य्यत्वात् तेन ज्ञानेनात्मा समधिगम्यते ।" (७२ पृ०)

एवञ्चाऽतिमन्दान्तःसंज्ञानां वृक्षादीनामपि सात्मकत्वमनुमातुं न खलु न शक्यते ।

यच्च प्रमाणान्तरमपि भाष्यकारैरात्मसिद्धौ निगदितम्, तेनापि वृक्षाद्युद्भिदां सजीवत्वमुन्नीयते । तथा हि "शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्म्मणा सारथि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वत् प्रयत्नवान् विग्रहस्याधिष्ठाताऽनुमीयते प्राणादिभिश्चेति।"—(६८ पृ०)

हितं सुखमहितं दुःखम्, तयोः प्राप्तिपरिहारौ हितस्य प्राप्तिरहितस्य परिहारः, तत्र योग्याभ्यां समर्थाभ्यामिति बुद्धिपूर्वकचेष्टापरिग्रहः। ईदृश्यौ च प्रवृत्तिनिवृत्ती वृक्षलतादिष्वपि स्त इत्यनुकूलोपगमप्रतिकूलापगमयोर्हेतुत्वं प्रदर्शितमाचार्य्यैः। हिताहितप्राप्तिपरिहारसमर्थायाश्चेष्टायाः प्रयत्नपूर्वकत्वात् तादृशचेष्टावत्त्वेन वृक्षादिशरीरस्य प्रयत्नवदधिष्ठितत्वं सम्भवत्येवेत्याशयः।

"प्राणादिभिश्चेत्य"नेन "प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानी"ति (३।२।४) काणादसूत्रं भाष्यकारः स्मारयति।

स्वकर्मोपार्जितशरीरावच्छिन्नेनात्मना मनःसंयोगो जीवनमिति लक्षणयाऽत्र जीवनकार्य्यं वृद्धिसंरोहणादि जीवनशब्देन बोद्धव्यम्। एवंलक्षणकजीवनं वृक्षादावप्यस्तीति तेषां सात्मकत्वं सिध्यति। सलिलसेचनेन दोहदार्पणेन च वृक्षादेर्वृद्धिः प्रसिद्धैव। तदुक्तं श्रीमद्भागवते—

"यथा तरोर्मूलनिषेचनेन
तृप्यन्ति तत्स्कन्धभुजोपशाखाः।" इति।

संरोहणञ्च भग्नक्षतावयवानां पुनः सङ्घटनं, तदपि वृक्षादौ प्रत्यक्षसिद्धमेव।

एवमात्मलिङ्गसाधिका मनसोऽभिलषितज्ञानसाधनेन्द्रिये गतिरपि चेतनाभिलाषाधीना लतावतानादावस्ति, कथमन्यथा 'लज्जावती'त्यभिधेयो लताविशेषः परकीयकरादिसंयोगेन सङ्कोचमञ्चति? त्वगिन्द्रिये मनःसम्बन्धमन्तरेण तादृशसङ्कोचाऽसम्भवात्।

संयोगविशेषध्वंसरूपमरणमपि वृक्षादौ सुप्रसिद्धम्। केचिद् वृक्षाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालविशेषे शतशः क्षतादरा अपि म्रियन्ते, केचन चानुकूलकालेऽपि जलसेकाद्यभावेन प्राणान् परित्यजन्ति ।

स्वापजागरणे अपि वृक्षादौ वर्त्तेते इत्यपि वार्त्ता सुविदिताऽसीदुदयनाचार्याणाम् ।

वृक्षादीनां रोगो भेषजप्रयोगश्च तत्प्रशमनार्थं विधीयत इति जानाति स्म नैयायिकनायकोऽयम् ।

स्नेहव्यञ्जकचेष्टापि सहकारतरुसमालिङ्गनादिरूपा समवलोक्यते माधवीलतादिषु ।

एते जीवनादयो धर्मा वृक्षादिषु नैव सन्तीत्याशङ्कायामाह—

"न चैते सन्दिग्धासिद्धाः, आध्यात्मिकवायुसम्बन्धात् ।"—(५२पृ०)

तथा च यतो वृक्षादिषु प्राणलक्षणाऽऽध्यात्मिकवायुसम्बन्धोऽस्ति, ततस्तत्र जीवनादिसत्त्वमकामेनाप्यभ्युपेयम् ।

ननु वृक्षादिषु प्राणवायुसम्बन्धोऽस्तीत्यत्र किं मानमत आह—

"सोऽपि मूले निषिक्तानामपां दोहदस्य च पार्थिवस्य धातोरभ्यादानात् ।" (५८ पृ०)

वृक्षादयो हि मूले निषिक्तानि सलिलानि पार्थिवरसादिरूपदोहदानि चाऽभ्याददते । एतच्चाभ्यादानं प्राणिकार्य्यम् ।

ननु वृक्षादयो दोहदान्यभ्याददत इत्यत्र न मानमस्तीत्याह—

"तदपि वृद्धिभग्नक्षतसंरोहणाभ्यामिति । अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गे सर्वमिदमलूनं विशीर्णमापद्येतेति संक्षेपः ।"—(किरणावली, ५२ पृ०)

अयमाशयः—अवयवोपचयरूपा वृद्धिर्विघटितविश्लिष्टयोर्भागयोः संरोहणञ्च वृक्षादिषु प्राणानन्तुमापयेताम् । यद्यभ्यादानलक्षणकारणमन्तरेण वृक्षादिकार्यं स्यात् तदा छेदं विना वृक्षादीनामुच्छेदोऽप्यापद्येत ।

ननु वृद्ध्यादेर्गिरिपाषाणेन व्यभिचारोऽभ्यादानहेतुवायोः प्राणत्वे मानाभावश्चेत्यत आह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

"आगमस्त्वात्रार्थे बहुतरोऽनुसन्धेय इति ।" (किरणा०, ५२ पृ०)

यद्वा एतादृशकार्य्यकारणभाव एव किं मानमित्यत्र आह— "आगमस्वे"त्यादि ।

तथा च "अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेद् यो मध्येऽभ्याहन्याज्जीवन् स्रवेद् योऽग्रेऽभ्याहन्याज्जीवन् स्रवेत् स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ।" (छान्दोग्योपनिषद्, ६।११।१)

"शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ॥" (मनुः, ८।२१)

इत्यादि श्रुतिस्मृत्यादिरूपागमसाम्राज्यस्य जागरूकत्वात् तत्तदनुमानानां नाऽप्रयोजकत्वशङ्कापि ।

इदमत्रावधेयम्—सत्स्वपि बहुषु शास्त्रवाक्येषु वृक्षादिसात्मकत्वप्रतिपादकेषु किरणावलीकारात् प्राग्वर्त्तिनो न्यायवैशेषिकाचार्याः— 'केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः' इति न्यायेन तेषां सजीवत्वं नाङ्गीकुर्वन्ति स्म । तथा च प्रशस्तपादभाष्ये योनिजायोनिजशरीरनिरूपणावसरे वृक्षादयो न व्याख्याताः, अपि तु प्रतिपादितास्ते विषयान्तर्भावेणैव (१) । वाचस्पतिमिश्र-जयन्तभट्ट-श्रीधराचार्यैरपि तत्तद्ग्रन्थसन्दर्भेषु वृक्षलताशरीरविशेषत्वं न समर्थितम् । तथा च तेषां ग्रन्थाः—

"चेष्टा व्यापारः । स चातिव्यापकतयाऽव्यापकतया च न लक्षणं, वृक्षादिषु भावादभावाच्च पाषाणमध्यवर्त्तिमण्डूकादिशरीर इति भावः । ……प्रयुक्तस्योत्पादितस्य न व्यापारमात्रं चेष्टाऽभिमता, अपि तु विशिष्टो व्यापारः । स च न वृक्षादिष्वस्तीति नातिव्यापकता ।" (तात्पर्यटीका, १४२ पृ०)

"ननु चेष्टा क्रिया, क्रियावत्त्वे च सत्यपि न वृक्षादीनां शरीरत्व-

---

(१) विषयस्तु द्व्यणुकादिक्रमेणारब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षणः । स्थावरास्तृणौषधिवृक्षलतावतानवनस्पतयः । (२२ पृ०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्यतिव्यापकं लक्षणं, विशिष्टचेष्टाश्रयत्वस्य विशिष्टप्रमेयप्रक्रमतोऽवसीयमानत्वात् ।" (न्यायमञ्जरी, ४७४ पृ०)

"लतादिप्रवृत्तिव्यवच्छेदार्थं शरीरसमवायिनीभ्यामित्युक्तम् ।...... वृक्षादिगतेन वृद्धयादिना व्यभिचार इति चेन्न, तस्यापीश्वरकृतत्वात् । न तु वृक्षादयः सात्मकाः, वृद्धयाद्युत्पादनसमर्थस्य विशिष्टात्मसम्बन्धस्याऽभावात् । (न्यायकन्दली, ८२—८३ पृ०)

तथा च श्रीमद्भिरुदयनाचार्यैरेव वृक्षादीनां सजीवत्वसाधनाय प्रथमं युक्तिराशिरुद्भावित इति परं गौरवस्थानं तर्करसिकानाम् । तदुक्तं प्रशस्तपादभाष्यव्याख्यानावसरे पद्मनाभमिश्रैः—

"वृक्षतृणादिषु शरीरत्वं श्रुतिसिद्धमपि श्रीमदाचार्यैः किरणावल्यामनुमानेन साधितं तत्रैवानुसन्धेयमिति ।" (सेतुः, २१६ पृ०)

आर्हतास्तु वृक्षाणां सात्मकत्वं न खलु नाङ्गीकृतवन्तः । तथा चोक्तमुमास्वामिना—

"पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ।" (तत्त्वार्थसूत्रम्, २।५।१३)

श्रीमद्भट्टकलङ्कदेवेन तत्त्वार्थराजवार्त्तिके व्याख्यातम्—

"वनस्पतिर्वनस्पतिकायो वनस्पतिकायिको वनस्पतिजीव इति योज्यम् ।......कति पुनरेषां प्राणाः ? चत्वारः—स्पर्शनेन्द्रियप्राणः कायबलप्राण उच्छ्वासनिश्वासप्राण आयुःप्राणश्चेति ।" (२८ पृ०)

तेषामयमाशयः—जीवो द्विविधः, त्रसस्थावरभेदात् । 'द्वीन्द्रियादयस्त्रसाः', स्थावरास्तावदेकेन्द्रियाः । वनस्पतिस्तु स्थावरान्तर्भूतः, अत एव तस्य स्पर्शग्राहकमेकमेवेन्द्रियमस्ति । तथा च सूत्रितमुमास्वामिना—

"वनस्पत्यन्तानामेकम् ।" (२।५।२२) उक्तञ्च राजवार्त्तिककारैः—"......स्पर्शनमेकेन्द्रियमाविर्भवति ।" (८४ पृ०)

आर्हतमते च वृक्षादीनां स्पर्शनेन्द्रियम्, स्पर्शनं रसनवद्धं कस्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीनाम्, स्पर्शनरसने घ्राणवृद्धे पिपीलिकादीनाम्, स्पर्शनरसनघ्राणानि चक्षुर्वृद्धानि भ्रमरादीनाम्, तानि श्रोत्रवृद्धानि मनुष्यादीनाम्। तदुक्तं तत्त्वार्थसूत्रे—

"कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि।" (२।५।२३)

परन्त्वसौ सिद्धान्तो न सौगतमतसिद्धः। यतः सर्वासां त्वचामपहरणे सम्पद्यते तरूणां मरणमिति जैननयमनादृत्य न्यायबिन्दुकारैर्धर्मकीर्त्तिभिरुद्घोषितम्—

"चेतनास्तरव इति साध्ये सर्वत्वगपहरणे मरणं प्रतिवाद्यसिद्धं विज्ञानेन्द्रियायुर्निरोधलक्षणस्य मरणस्यानेनाभ्युपगमात्, तस्य च तरुष्वसम्भवात्।" (२८ पृ०)

उक्तञ्च न्यायबिन्दुसन्दर्भव्याख्यानावसरे धर्मोत्तराचार्यैः—

"ननु च शोषोऽपि मरणमुच्यते, स च तरुषु सिद्धः। सत्यम्। केवलं विज्ञानसत्तया व्याप्तं यन्मरणं तदिह हेतुर्विज्ञाननिरोधश्च।" (न्यायबिन्दुः, ८० पृ०)

सुश्रुतमते च वृक्षादयः स्थावरान्तर्भूताः, उद्भिज्जाश्च इन्द्रगोपमण्डूकप्रभृतयः। तदुक्तम्—"तासां स्थावराश्चतुर्विधाः। वनस्पतयो वृक्षा वीरुध ओषधय इति।......जङ्गमास्त्वपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः।......इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः।" (सूत्रस्थानम्, १अ०, २२-२३)

चरकास्तु—"......औद्भिदन्तु चतुर्विधं वनस्पतिस्तथा वीरुद् वानस्पत्यस्तथौषधिः।" (सूत्रस्थानम्, १।७०) इति प्राहुः।

इत्यलमनल्पजल्पनेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तविजयम्

[निबन्धकः—म. म. श्रीसीतारामशास्त्री]

नमस्कृत्य रमानाथं भक्तवात्सल्यसंयुतम् ।
भक्त्यावर्जितगोपालान् भक्ताँल्लोकहिते रतान् ॥
गणेशं शारदामम्बां पितरं परमं गुरुम् ।
शिष्टाञ्छास्त्रपरानन्यान्नत्वा प्रीत्या यथायथम् ॥
यथाविधि ब्रुवे भक्तचरितं देवभाषया ।
माहीपत्याख्यविदुषा भाषितं लोकभाषया ॥
महाराष्ट्रया क्रमेणैतल्लोकानामुपकारकम् ।
यस्य देव इति न्यायादादौ स्वोपास्यदेवताम् ॥
विठ्ठलाख्यां ग्रन्थकर्ता स्वीये ग्रन्थे प्रणौत् स्वयम् ।
भीमातीरविहारकार्यनिरतो भक्तेषु वात्सल्ययुग्
वाणी-विघ्नहरादि-सर्व-दिविषद्रूपो दयासागरः ।
व्याप्येदं स चराचरं जगदसौ तत्सङ्गमाद्विच्युतो
यस्त्वं विठ्ठल तिष्ठसीह भगवंस्तस्मान्नतस्त्वाहम् ॥
परमार्थोपदेशेन यो निरास्थद्भवभ्रमम् ।
सद्गुरुं तं महाभक्तं तुकारामं नमाम्यहम् ॥
व्यासवाल्मीकिमुख्यांस्तान् प्रणमामि महाकवीन् ।
निरस्याज्ञानजं ध्वान्तं लोकोऽयं दीपितस्तु यैः ॥
प्रणमामि हरेर्भक्तान् सतः परमधार्मिकान् ।
यैः कलाववतीर्येह गजमूढाश्च तारिताः ॥
आरब्धो भक्तविजयग्रन्थोऽयं भवतां पुरः ।
प्रसादात् पूर्णतामेतु दरिद्रेष्टमिवेभ्यतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा कृपालुश्चक्षुष्मानन्धं नयति सर्वतः ।
तीर्थादिषु तथा यूयं सञ्चारयत मामिह ॥
मन्दबुद्धिरहं लोकवेदविज्ञानवर्जितः ।
देववाग्व्यवहारस्यानभिज्ञोऽस्मि तथापि तु ॥
रोचन्ते हृदये भक्तचरितानीति डिण्डिमम् ।
घोषयामास भगवान् भविष्ये शङ्करः स्वयम् ॥
तदुक्तिं तां गृहीत्वाथो उदभून्मम मानसे ।
भक्तानां चरितान्यन्तर्वसन्तु मम सर्वदा ॥
प्रीयताञ्च ततो देव इतिभावस्ततस्त्वहम् ।
अविचार्य निजां शक्तिं प्रवृत्तो ग्रन्थकर्मणि ॥
सरित्पतेः शोषणाय टिट्टिभस्य यथा तथा ।
प्रयत्नोऽयं मम यतो भगवद्भक्तवर्णना ॥
ज्यायसी वर्त्तते साक्षाद् भगवत्त्वेऽपि यः पुनः ।
भगवाञ्छक्यते नेहाख्यातुं श्रुतिभिरप्यथ ॥
सहस्रशीर्षा भगवाननन्तोऽप्यक्तार्थताम् ।
गुणानां वर्णने विष्णोः प्राप्तवान् किमुतापरः ॥
अतिशक्तिप्रयोगेण शब्दानां स किलान्वभूत् ।
जिह्वाभङ्गाद् द्विजिह्वत्वं न शक्तः सकलान् गुणान् ॥
वक्तुं ततो हरेर्जातः शय्यारूपेण सेवकः ।
ब्रह्मा शचीपतिः साक्षाद्भगवांश्च सदाशिवः ॥
न विदन्ति गुणान् रूपं कृष्णस्य किमुतापरे ।
महतामप्यवस्थेदृक् क्षुद्रोऽहं तत्र वै कथम् ॥
वक्तुं हरेर्गुणाञ्छक्तः स्यां ममायं समुद्यमः ।
दयालुना भगवता पूर्येत स्वयमेव हि ॥
बालस्याभिमतं यद्वन्माता पूरयति क्षणात् ।
पितुरुत्सङ्गमारोढुमिच्छुः प्राप्तो ध्रुवो हरिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालो ध्रुवे पदे तेन स्थापितः करुणावशात् ।
स्वल्पं वाञ्छन् पयः पातुमुपमन्युरगाद्धरिम् ॥
क्षीरसागरदानेन तोषितोऽसौ यथा तथा ।
ममेष्टं पूरयेन्नो किं कृपालुर्भगवानसौ ॥
कृतवन्तो ह्यवतारेषु य आसन् पृथिवीतले ।
पूर्वं भक्ता हरेस्तेऽस्मिन्नवतेरुः कलौ युगे ॥
लोकानामुपकाराय तेषां चरितवर्णने ।
ममोत्साहोऽतीव जातस्तस्मादेष समुद्यमः ॥
सावधानैः श्रोतृवरैः सार्थनीयः कृपायुतैः ।
काव्येष्वहमधीती नो वेदान्तेष्वपि नो मतिः ॥
चातुर्यभाजनं नाहं देववाणीबहिष्कृतः ।
कवीश्वराणां पूर्वेषां भक्तानामिव मे नहि ॥
प्रासादिकानि वाक्यानि रसवन्त्यर्थयुञ्जि नो ।
रामायणे यथा भक्त एकनाथोऽथवा यथा ॥
मुक्तेश्वरो नामदेवो भारते प्राहतुः पुरा ।
श्रीधरेणाथवा टीका कृता भागवते स्फुटा ॥
हरिविजयनामा स ग्रन्थः प्राणायि वा यथा ।
रामदासेन वा दासबोधे प्रोक्तं यथा वचः ।
गणेशः केशवो वा स बालो वा सरसः कविः ॥
कबीरो यवनो वापि ज्ञानदेवो यथाऽपरे ॥
वर्णयन्ति हरेर्नाम सरसैर्वाङ्मयैस्तथा ।
सरसं मे वचो नास्ति तथापि न विलज्जितः ॥
नत्वा कवीनां पूर्वेषां प्रसादात् पूर्तिमिच्छुकः ।
प्रवृत्त एव ग्रन्थस्य रचने यत्न एष मे ।
अविशुद्धोदकं गङ्गाप्रविष्टमिव सर्वतः ।
सतामाह्लादको भूयान्मणिसंस्पृष्टलोहवत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रसिद्धा सरिल्लोके क्षुद्रा गङ्गासमागमात् ।
मान्या भवति सर्वेषामित्थं चरितवर्णनात् ॥
भक्तानां प्रीतिमागच्छेद् भगवांस्तत्कृपावशात् ।
मान्यतामेष्यति ग्रन्थ इत्याशाप्रेरितस्य मे ॥
प्रवृत्तिरेषा सततं सतां स्यात्परितुष्टये ।
यस्य गोत्रे जनुर्धृत्वा गोत्रसम्बन्धमात्रतः ॥
सुदुष्करेऽपि कार्ये मे समुत्साहो व्यजायत ।
श्रुतिप्रसिद्धो भगवाञ्छान्तमूर्तिरसावृषिः ॥
वसिष्ठो गोत्रमूलं मे दिश्याद् ग्रन्थस्य पूर्णताम् ।
मातापित्रोः प्रणामोऽत्र ग्रन्थारम्भे विशेषतः ॥
आवश्यको यतो लभ्यो नरदेहोऽयमेतयोः ।
कृपातः सर्वतीर्थेभ्यो वरिष्ठौ ताविति श्रुतम् ॥
कुलोपास्यो ममोपास्यो रुक्मिणीरमणो हरिः ।
तस्य प्रणामात्सकलास्तुष्यन्ति विबुधा यथा ॥
समुद्रपूजनात्सर्वा नद्यः पृथ्व्याः परिक्रमात् ।
समाविष्टानि तीर्थानि यथा वा दर्शनाद्विधोः ॥
दृष्टान्युडुगणान्येवं तृप्यन्ति सकलाः सुराः ।
तं विठ्ठलं संप्रणम्य प्रवर्ते ग्रन्थकर्मणि ॥
मूलेन रहितो ग्रन्थो मया बुद्ध्या प्रकल्पितः ।
मन्तव्यमित्थं न यतो मूलत्वं ग्रन्थयोर्द्वयोः ॥
साक्षाद् ब्रह्मावतारेण सता नाभाजिना स्वयम् ।
वसता चोत्तरे देशे ग्वालेर्या भाषया कृतः ॥
ग्रन्थः सन्तचरित्रेति सतां चरितवर्णकः ।
मानदेशोद्भवः साक्षाद्धरिरुद्धवचिद्घनः ॥
वर्णयामास श्रीभक्तचरितं ग्रन्थमुत्तमम् ।
समाहारात्तदुक्तानां कथानामयमत्र मे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रारब्धो भक्तविजयः समूलो गृह्यतामतः ।
बालकोक्तं यथा मातुरपभ्रष्टमपि प्रियम् ॥
वचो भवेन्ममाप्येवं भवतां प्रीतये वचः ।
पुरा कृष्णावतारस्यावसानं समये यदा ॥
भूतलं त्यक्तवान्देवः कृष्णरूपेण वै तदा ।
घोरः कलिः प्रववृते तस्य चोपचितिः क्रमात् ॥
सञ्जायते ततो लोके यज्ञदानादिकाः क्रियाः ।
लुप्ताः सर्वे वर्णधर्मास्त्यक्ता लोकैर्विसंशयैः ॥
आम्नायाध्ययनं विप्रैर्धर्मा जात्युचितास्तथा ।
परित्यक्ताः क्षत्रियैश्च न्याय्यवृत्तिः समुज्झिता ॥
चतुर्थमाश्रमं विप्रा नाग्टह्णन्वै कलौ युगे ।
पुत्रा न मानयन्त्युक्तं पितुः शिष्यास्तथा गुरोः ॥
शुश्रूषां न प्रकुर्वन्ति भर्तॄणां ललनास्तथा ।
प्रमदोक्त्यनुरोधेन पितॄंस्त्यक्त्वा निजान् पुनः ॥
पत्नीमातुर्गृहे नित्यं वसन्ति पतयस्तथा ।
नेच्छन्ति धर्मं नो तीर्थयात्रां विच्युतकल्मकाम् ॥
संकेतस्थलमित्येव बुद्धिर्दैवतमन्दिरे ।
पुराणश्रवणं भावैर्नास्ति नाम्नां च कीर्तनम् ॥
हरेः कथां परित्यज्य भावैः शृण्वन्ति वै नटान् ।
शालग्रामान् परित्यज्य पूज्यन्ते क्षुद्रदेवताः ॥
रुद्राक्षमालातुलसीस्फटिकप्रभृतींस्तथा ।
निरस्य काचमणयः सन्धार्यन्ते नरैस्तथा ॥
इभरा नेच्छन्ति वै दानमरोगास्तप उत्तमम् ।
राजानस्तु तथा लोकान् नेच्छन्ति समये कलौ ॥
नानुस्त्रियन्ते न्यायाश्च नीत्या चरितमुत्तमम् ।
कुलाङ्गनानां दासीत्वं कन्यानां विक्रयोऽनिशम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वडवानामिव तथा कुर्वन्ति यवनाः सदा ।
गवां वधं परि तत्र साहाय्यं परमं नराः ॥
कुर्वन्त्यसंशयं मूढाः कलौ वृद्धिङ्गते सदा ।
अनृतं बहु जल्पन्ति निन्दन्ति बहु सज्जनान् ॥
कूटसाक्ष्यं प्रदायाथो मिथ्या सत्यापयन्ति वै ।
गायत्रीलोपमापन्ना तन्त्राणामुदयोऽभवत् ॥
विश्वास्य निर्दयं घ्नन्ति चरमे युग आगते ।
यवना देवमूर्त्तीनां भङ्गं कुर्वन्ति वै बलात् ॥

(क्रमशः)

रसमीमांसा

(पूर्वतोऽनुवृत्ता)

[निबन्धकः—साहित्यविद्याप्रवीणः बु-वेङ्कटरमणार्यः]

विद्याधरः—

शाणोत्कीर्णमिवोज्ज्वलद्युति पदं बन्धोऽर्धनारीश्वर-
श्लाघालङ्घनजाङ्घिको दिवि लतोज्झितैव पार्थीद्गतिः ।
किञ्चित्पीडितचन्द्रमण्डलगलत्पीयूषहृद्यो रस-
स्तत्किञ्चित् कविकर्म्म मर्म्म न पुनर्वाग्डिण्डिमाडम्बरः ॥

(एकावली पृ० १६)

विद्यानाथः—

"रसप्रधानाः शब्दार्थाः—" (प्रतापरुद्रीयम् पृ० २)

"अथ सर्वेषां प्रबन्धानां जीवितभूतस्य रसस्य स्वरूपं निरूप्यते (प्र. रु. पृ. १५५. रसप्र० बा. म.)

तत्रभवता रत्नापणव्याख्यानिर्माता कुमारस्वामिसोमयाजिना महामहोपाध्यायमल्लिनाथसूनुना "रसप्रधानाः शब्दार्थाः" इति कारि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काया विवृतिरेवं व्यरूपि—"रसप्रधाना रसजीविता इत्यर्थः। यद्यपि वस्त्वलङ्काररसात्मना त्रिविधस्यापि व्यङ्ग्यस्य जीवितत्वमुत्तरत्र वक्ष्यति, तस्मात् स्वात्ममात्रविश्रान्तत्वेन प्राधान्याद्रसस्यैव मुख्यं जीवितत्वम्। वस्त्वलङ्कारव्यङ्ग्ययोस्तु सर्वथा रसपर्यवसानेनाप्राधान्यात्तदाभेऽपि वाच्यादुत्कृष्टत्वसाम्यादौपचारिको जीवितत्वव्यवहार इति न कश्चिद्विरोध इति ध्वनिलोचनरहस्यम्" इति।

वाग्भटः—

"साधुपाकेष्वनास्वाद्यं भोज्यं निर्लवणं यथा।
तथैव नीरसं काव्यमिति ब्रूमो रसान् वयम्॥"

(वाग्भटालङ्कारः)

काव्यानुशासनस्य कर्ता वाग्भट्टः—

"दोषमुक्तं गुणयुक्तमलङ्कारभूषितं शब्दार्थरूपमुक्तं काव्यशरीरम्। परं तत्त्वप्राणिशरीरमिव निरात्मकं न प्रतिभासते। काव्यस्य प्राणभूतान् रसानाह। तथाहि—

"यामिनीवेन्दुना मुक्ता नारीव रमणं विना।
लक्ष्मीरिव ऋते त्यागान्न वाणी भाति नीरसा॥" इति।

(काव्यानुशासनम्)

काव्यप्रकाशलक्षणं बहुधा खण्डयित्वा वस्त्वलङ्कारध्वन्योः काव्यात्मतां चित्रस्य काव्यत्वं च निराकृत्य रसवदेव वाक्यं काव्यं ब्रुवता साहित्यदर्पणकारेण विश्वनाथकविराजेन रसस्यैव प्रधानतोररीकृतेति वदनं पिष्टपेषणायमानमिति न विस्तरेण प्रतिपादितं तन्मतम्।

किञ्च रमणीयार्थप्रतिपादकशब्दस्यैव काव्यत्वमङ्गीकुर्वाणैर्जगन्नाथपण्डितराजै रसप्रस्तावे —

"एवं पञ्चात्मके ध्वनौ परम-रमणीयतया रसध्वनेः, तदात्मरसस्तावदभिधीयते" इति प्रतिपादितम्। अस्य रसगङ्गाधर इति निबन्धाभिधानमेव रसस्य प्राधान्यं सुव्यक्तीकरोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये पुनरालङ्कारिका रसविषयमधिकृत्यैव पृथक् पद्धतीर्निबबन्धुः, यथा रसमञ्जरीं रसतरङ्गिणीं च कुर्वाणो भानुदत्तः, रसार्णवसुधाकरस्य प्रमाता शिङ्गभूपालः, कर्णभूषणस्य कर्ता गङ्गानन्दः, रसचन्द्रिकाया रचयिता विश्वेश्वरपण्डितश्च, तेषां मते तत्प्राधान्यमवश्यमभ्युपेयमेव ।

ये पुनराचार्याः प्रत्येकमलङ्कारविषयमधिकृत्यैव निबन्धान् रचयामासुस्तेषामपि मते रसस्यैव प्रधानप्रतिपाद्यत्वमाकलनीयम् । प्रत्येकं चित्रविषय एव निबन्धिता ग्रन्थास्त्वानन्दवर्धनकृतध्वन्यालोकतोऽतीव नवीना एव परिदृश्यन्ते । ध्वनिकृदनन्तरभाविनां प्रायशः सर्वेषामपि तस्मिन्मतीवादर इति पूर्वमेवोक्तम् । तन्मतमेव तैराश्रीयत इति च नापूर्वम् ।

तथा च ध्वनिकारेण—

"वाच्यवाचकचारुत्वे हेतूनां विविधात्मनाम् ।
रसादिपरता यत्र स ध्वनेर्विषयो मतः ॥
ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥
रसभावादितात्पर्य्यमाश्रित्य विनिवेशनम् ।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम् ॥"

इति प्रतिपादितम् । सर्वैरप्यलङ्कारै रसपरतन्त्रतयैव भाव्यम् । तथात्व एव तेषामलङ्कारत्वसिद्धिः । अलङ्क्रियते अनेनेति चारुत्वहेतुः खल्वलङ्कारः । रसस्तावदङ्गी अलङ्कार्य्यः । यदि तं नालङ्कुर्युरलङ्कारा निरर्थका एव ते भवन्ति ।

एवं रसस्य प्रधानतायां प्रमाणानि प्रदर्शितानि । वस्त्वलङ्कारव्यङ्ग्याभ्यां रसव्यङ्ग्यस्याभ्यर्हितत्वे किं मानमित्यपरत्रैवाकलनीयम् । तौ तावद् वस्त्वलङ्कारौ सर्वथा रसमेवोपकुरुत इति तदनुयायित्वं तयोरितः पूर्वमेवोक्तम् । रसस्तु स्वतन्त्रः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमपरो विशेषः, यत्तौ वस्त्वलङ्कारौ वाच्यतामपि सहेते। रसस्तु स्वप्नेऽपि न सहते वाच्यताम्। तथाहि—यत्प्रतीयमानं वस्तु यश्चालङ्कारो रूपकादिर्वा विनापि व्यञ्जनाव्यापारेण वाच्यतयापि प्रतिपाद्यन्ते। न तावद्रसः शब्देनाभिधातुं शक्यते। सर्वदा तस्याप्रतीयमानस्वभावत्वात्। तदाह ध्वनिकारः—

"यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो रसादीनां प्रतीतिः केवलाच्च स्वाभिधानादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम्, न त्वभिधेयत्वं कथञ्चि"-दिति।

एवञ्चास्य सर्वदा व्यङ्ग्यत्वेन किं फलमिति चेत्; यतः स एवाह—"साररूपो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरां शोभामावहति। प्रसिद्धिश्चेयमस्त्येव विदग्धपरिषत्सु, यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न वाच्यत्वेन" इति। तस्माद्रमणीयतया इतरापेक्षया रस एव सङ्गाव इति प्रपञ्चितम्।

अथास्य रसस्य प्रयोजनमभिधानीयम्। वेदशास्त्रपुराणातिरिक्तस्य वाङ्मयस्य काव्यस्वरूपस्य यावन्ति प्रयोजनानि तावन्ति रसविषयेऽपयाकलनीयान्येव। यदि न स्यात्प्रयोजनं रसस्य तन्नास्त्येव काव्यस्यापि। रसवत्त्वेनैव काव्यस्योपादेयत्वात्। रसस्तावदानन्दस्वरूप इत्युत्तरत्र वक्ष्यते। यदि काव्ये रसो निबध्येत सर्वेऽपि तत्र प्रवर्तन्ते। यथा प्रभुसुहृद्वाक्ययोरादराभावेऽपि कामिनीविलासे सर्वेषामादरस्तथा वेदपुराणवाक्ययोः प्रवृत्त्यभावेऽपि रसमयत्वात्काव्यस्य पठने प्रवृत्तिर्दृश्यते। अतश्चान्याकर्षणशीलो रस इति फलितम्।

रसस्य प्रयोजनम्।

वस्तुतस्तु रसस्येदं मुख्यं प्रयोजनं तदास्वादनजनितगलितवेद्यान्तररूपानन्दानुभव एव। क्षणभङ्गुरेऽस्मिन् संसारे न किञ्चिदवशिष्यते। सुकृतदुष्कृते अपि पुनर्जन्मकारणे। तस्मात्सर्वैरपि सहृदयै-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रानन्द एवावश्यं भोग्यः। द्विविधश्चायमानन्दः पारलौकिक ऐहिकश्चेति। पारलौकिकस्तु नित्यो निर्विषयश्च। ऐहिकस्त्वनित्यो लौकिकविषयविशिष्टश्च। प्रथमः परब्रह्मास्वादस्वरूपो द्वितीयश्च परब्रह्मास्वादसब्रह्मचारी। परब्रह्मास्वाद एवोत्कृष्ट एतयोः, परं तु न स सर्वजनसुलभः। सकलमिदं चराचरात्मकं प्रपञ्चं मिथ्याभूतमिति निश्चित्य इन्द्रियार्थेभ्यश्चेन्द्रियाणि निवर्त्य मोक्षमध्यवस्यद्भिर्मुमुक्षुभिर्मुनिभिरेव केवलं लभ्यः। "आनन्दो ब्रह्मेति व्यजानात्" इति श्रुतेरयमेवानन्दो ब्रह्मपदवाच्यः।

ये तावल्लौकिकीं वासनां परित्यक्तुमसमर्थास्तैस्तावद्रसास्वादनसमुद्भूतो विगलितवेद्यान्तरो लौकिक एवानन्दोऽनुभवनीयः। यद्येतदानन्दस्यानुभवयोग्यता नास्तीति कश्चिन्मन्येत तदावस्थाचतुष्टयपरिगणनं व्यर्थमेव भवेत्। गार्हस्थ्ये खलु जनस्य लौकिकानन्दानुभवयोग्यता वर्त्तत एव। चरमावस्थयोस्तावदलौकिकानन्दविषय एव यतितव्यम्। ततश्च सर्वसहृदयजन्मनो मुख्यं प्रयोजनं रसास्वादनरूपो वा परब्रह्मास्वादनरूपो वाऽनन्द एवेति फलितम्। अत एवेतरशास्त्रापेक्षया साहित्यमीमांसाशास्त्रस्य, ततश्च शारीरमीमांसाशास्त्रस्य च प्राधान्यमवश्यमेवोररीकर्त्तव्यम्। तथा च रसस्य मुख्यप्रतिपाद्यत्वादानन्दस्वरूपत्वाच्च यस्मिन् काव्ये रसो न निबध्यते तदसत्काव्यमिति, तन्मूला च "काव्यालापांश्च वर्जयेत्" इति हि स्मृतिरिति चाकलय्य सर्वैरपि कविभिः सहृदयैश्च रसपरतन्त्रतयैव भाव्यमिति दिक्।

अथ प्रतिपादनीये च रसस्वरूपे तत्कारणसामग्र्या अवगतिं विना तत्स्वरूपं न सम्यग्ज्ञायत इति तत्सामग्रीनिरूपणमेवादौ क्रियते। विभावानुभावव्यभिचारिणो रससामग्री। तत्र विभावाः कारणानि। रत्यादिस्थायिभावानां लोके तत्तन्नायकगतानां यान्यालम्बनतया उद्दीपनतया वा कारणत्वेन प्रसिद्धानि तान्येषु काव्य-

विभावादिसामग्री-निरूपणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाट्ययोर्व्यञ्जसानेषु विभावशब्देन व्यपदिश्यन्ते। वासनारूपतयाति-सूक्ष्मेण रूपेणावस्थितान् रत्यादीन् स्थायिनो विभावयन्ति आस्वादन-योग्यतां नयन्तीति विभावनाव्यापारयोगाद्विभावाः। तस्माद्रसनिष्पत्ति-कारणता विभावानां सिद्धा। वागाद्यभिनयसहिताः स्थायिव्यभि-चारिलक्षणाश्चित्तवृत्तयो विभाव्यन्ते विशिष्टतया ज्ञायन्ते यैस्ते विभावा इत्यपरनुसन्धेयम्। ते चालम्बनोद्दीपनभेदेन द्विविधाः। रसस्य सम-वायिकारणमालम्बनविभावः—नायिका नायकस्य। उद्भूते च रत्यादौ यानि तत्पोषकात्मकत्वेन वर्त्तन्ते तान्युद्दीपनकारणानि विभावाः। इतरत्सर्वं कारणजातमुद्दीपनविभावः। स चतुर्विधः। आलम्बनगुण-चेष्टालङ्कृति-तटस्थ-भेदात्। रूपयौवनादिरालम्बनगुणः, तच्चेष्टा च यौवनप्रादुर्भूतहावभावादिरूपा। नूपुराङ्गदाद्यलङ्करणम्। मलया-निलचन्द्राद्यास्तु तटस्थाः।

अनुभावाः कार्याणि। रत्यादिस्थायिभावानां लोके यानि प्रसि-द्धानि कार्याणि तानि काव्यनाट्ययोरनुभावशब्दव्यपदेश्यतां भजन्ते। रत्यादिस्थायिनोऽनुभावयन्ति अनुभवविषयान् कुर्वन्तीति अनुभावना-व्यापारयोगादनुभावाः। रत्यादिजन्यानि नायिकादिभेदेन नाना-विधानि कटाक्षभुजाक्षेपप्रभृतीनि कार्याण्यनुभावा इत्यर्थः। स्थायि-व्यभिचारिलक्षणं चित्तवृत्तिविशेषं सामाजिकजनोऽनुभवन्ननुभाव्यते साक्षात्कार्यते यैस्तेऽनुभावा इत्यपरनुसन्धेयम्।

व्यभिचारिणः सहकारीणि। रत्यादिस्थायिभावैर्यानि सह चरन्ति तानि नाट्यकाव्ययोर्व्यभिचारिशब्देनोच्यन्ते। विशेषेणाभितः सर्वाङ्ग-व्यापितया रत्यादीन् स्थायिनः काव्ये चारयन्ति सञ्चारयन्ति मुहुर्मुहु-रभिव्यञ्जयन्तीति वा व्यभिचारणव्यापारयोगाद् व्यभिचारिणः। उल्लि-खितकार्यस्य रत्यादेर्जनने झटिति प्रतीतौ वा सहायभूतानि निर्वेदा-दीनि त्रयस्त्रिंशद्भावा व्यभिचारिणः। एवमेषव रससामग्री। परन्तु कैश्चित्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः ॥"

(दशरूपकम्, प्रतापरुद्रयशोभूषणञ्च)

इति पठित्वा सात्त्विका अपि रससामग्रीत्वेनोपवर्णिताः । परगतसुखादिभावनया भावितान्तःकरणत्वं सत्त्वम्, ततो भवाः सात्त्विकाः । ते चाष्टौ—

"स्तम्भः पुलकरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू ।
अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्त्तिताः ॥"

इति । तन्मते तेषामपि रसकारणत्वम् ।

बहुभिस्तु पृथक्तया न गणिताः सात्त्विकाः । इदमत्रानुसन्धेयम्—यद्यपि सात्त्विकानामपि भावत्वं सुस्थमेव तथापि तेषामनुभावरूपत्वान्न ते पृथग्गण्यन्ते । विभावादिदर्शनजन्या अनुरागनिर्वेदादिमनोवृत्तयो विभावादितन्मयीभवनरूपेण सत्त्वशब्दाभिधेयेन सामाजिकमनसोऽत्यन्तानुकूल्यजन्येनासाधारणकारणेनावस्थान्तरमापन्नाः स्तम्भादयः सात्त्विका अनुभावाश्च तादृशा एव । हेमचन्द्रेण तावदुपाधिभेदेन भेदः स्वीकृतः । तथाहि—

"बाह्यास्तु स्तम्भादयः शरीरधर्मा अनुभावाय ते चान्तरालिकान् भावान् गमयन्तः परमार्थतो रतिनिर्वेदादिगमका इति फलितम् ।"

(काव्यानुशासनम्, पृ १००)

अत एव तेन पृथगनुभावा न विविचिताः ।

सर्वालङ्कारिकप्रमाणभूतैर्नाट्याचार्यैर्भरतमुनिभिरपि सात्त्विकाः पृथङ् न गणिताः । "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"-रिति हि तन्निर्मितं सूत्रम् । तस्मात्सात्त्विकास्त्वनुभावाभिन्ना एवेति सहृदयैराकलनीयमिति दर्शितत्व रससामग्रीदिक् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याप्रस्थानम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—कालीघट्टवास्तव्यः श्रीगुरुपदशर्म्महालदारः]

अर्थाश्च तेषां प्रदर्शिताः। शब्दज्ञानाय च निरुक्तमाकाङ्क्षितमिति शब्दास्त्रिविधा उक्ताः प्रत्यक्षवृत्तयः, परोक्षवृत्तयोऽतिपरोक्षवृत्तयश्चेति। तत्र प्रत्यक्षवृत्तयः शब्दा उक्तक्रियाः परोक्षवृत्तयोऽन्तर्लीनक्रियाः, अतिपरोक्षवृत्तयस्तु यत्र परोक्षवृत्तिमापाद्य प्रत्यक्षवृत्त्या ते निर्वक्तव्याः। महाभारते निरुक्तेरुदाहरणं यथा—

किं कारणं जरत्कारो नामैतत् प्रथितं भुवि।
जरत्कारुनिरुक्तित्वं यथावद् वक्तुमर्हसि॥

सौतिरुवाच—

जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम्।
शरीरं कारु तस्यासीत् तस्य धीमाञ्छनैः शनैः॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते।
जरत्कारुरिति ब्रह्मन् वासुकेर्भगिनी तथा॥ इति।

वेदानामुपवेदा ये सन्ति त इदानीमुच्यन्ते। आयुर्वेदश्चिकित्साशास्त्रम्। स च चतुर्व्यूहो रोगो रोगहेतुरारोग्यं भैषज्यमिति। तस्य निरुक्तिर्यथा भावप्रकाशे—

'अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति वा।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः॥' इति।

ब्रह्मवैवर्त्ते वैद्यानामपि लक्षणमुक्तम्—

"आयुर्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्।
धर्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद् वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥ इति ।"

चरणव्यूहमते आयुर्वेद ऋग्वेदस्य उपवेदः, वैद्यशास्त्रमते तु स आथर्वण इति । तथा हि चरके सूत्रस्थानम्—"तत्र चेत् प्रष्टारः स्युश्चतुर्णामृक्सामयजुरथर्ववेदानां कं वेदमुपदिशन्त्यायुर्वेदविदः, तत्र भिषजा पृष्टेनैवं चतुर्णामृक्सामयजुरथर्ववेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या । वेदो ह्याथर्वणः स्वस्त्ययनवलिमङ्गलहोमप्रायश्चित्तोपवासमन्त्रादिपरिसंग्रहाच्चिकित्सां प्राह" इति । तत्र पौराणिकाश्चाहुः—

"ऋग्यजुःसामाथर्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः ।
विचिन्त्य तेषामर्थं चैवायुर्वेदं चकार सः ॥ इति ।

गवायुर्वेदस्य चान्तर्भाव आयुर्वेदे बोद्धव्यः ।

धनुर्वेद उपवेदो यजुर्वेदस्यैव भवति । तदुक्तं चरणव्यूहे भगवता शौनकेन 'यजुर्वेदस्य धनुर्वेद' इति । चतुर्णामाश्रमाणां ये धर्माः सन्ति तेषां रक्षक इव धनुर्वेदः । रक्षणाभावे सर्वा आश्रममर्य्यादा भिद्येरन्, धर्म्माश्च यथाभिमतकार्य्यादिना दुष्येयुरिति । तस्मादपरविद्यायां धनुर्वेदस्य चान्तर्भावः । यद्यपि धनुःशब्दश्चापे रूढस्तथापि स लक्षणया रक्षयितॄणामायुधमात्रे वर्त्तते । स्मरति च तत्र भगवानग्निः—

"चतुष्पादं धनुर्वेदं वेदे पञ्चविधं द्विज ।
रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्त्तितम् ॥
यन्त्रमुक्तं पाणिमुक्तं मुक्तसन्धारितं तथा ।
अमुक्तं बाहुयुद्धञ्च पञ्चधा तत् प्रकीर्त्तितम् ॥" इति ।

इह खलु यन्त्रशब्देन आग्नेयमस्त्रं बोद्धव्यम् । न ह्येतत् प्राचीनकालेऽपि लोकानामविदितव्यापारमासीत् ।

"आग्नेयमस्त्रं लब्ध्वा च भार्गवात् सगरो नृपः ।
जिगाय पृथिवीं हत्वा तालजङ्घान् स हैहयान् ॥"

इत्येवमादिस्मरणात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादचतुष्टयात्मको धनुर्व्वेदो भगवता विश्वामित्रेण प्रणीतः। तत्र प्रथमो दीक्षापादो द्वितीयः संग्रहपादस्तृतीयः सिद्धिपादश्चतुर्थः प्रयोगपाद इति पादयोजना। एवं तत्र येषामधिकारस्तेऽपि सर्व्वे चतुरङ्गव्यवस्थातश्चतुर्व्विधा भवन्ति।

गन्धर्व्ववेद उपवेदः सामवेदस्य भवति। तदुक्तं चरणव्यूहे 'सामवेदस्य गन्धर्व्ववेद' इति। गन्धर्व्वा देवयोनिस्तद्भेदा यथा—

हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा।
गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः॥

नाट्याचार्य्येण भरतेनैव गन्धर्व्ववेद उपवर्णितः। तत्र नृत्यगीतवाद्यादिभेदा उक्ताः। आराधनसंसिद्धये तेषामपरविद्यास्वन्तर्भावः। गीतादिभिराराधनञ्च प्रसिद्धम्। तदुक्तं काशीखण्डे—

'गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते॥' इति॥
गीतविद्याप्रभावेन देवर्षिर्नारदो महान्।
मान्यो वैष्णवलोके वै श्रीशम्भोश्चातिवल्लभः॥
तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्ल्लभौ।
नादरूपी शिवः साक्षान्नादतत्त्वविदौ हि तौ॥
यदि गीतं क्वचिद् गीतं श्रीमद्धरिहरात्मकम्।
मोक्षं तु तत्फलं प्राहुः सान्निध्यमथवा तयोः॥' इति च।

गीतादिविद्याभेदे याः कलाश्चतुःषष्टिविधाः शैवतन्त्रोक्तास्ताः सर्व्वा एवं वर्त्तन्ते। १—गीतम्, २—वाद्यम्, ३—नृत्यम्, ४—नाट्यम्, ५—आलेख्यम्, ६—विशेषकच्छेद्यम्, ७—तण्डुलकुसुमवलिविकाराः, ८—पुष्पास्तरणम्, ९—दशनवसनाङ्गरागाः, १०—मणिभूमिकाकर्म्म, ११—शयनरचनम्, १२—उदकवाद्यम्, १३—उदकघातः, १४—चित्रायोगः, १५—मालाग्रथनविकल्पाः, १६—केशशेखरापीडयोजनम्, १७—नेपथ्ययोगः, १८—कर्णपत्रभङ्गाः, १९—गन्धयुक्तिः, २०—भूषण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योजनम्, २१—इन्द्रजालम्, २२—कौचुमारयोगः, २३—हस्तलाघवम्, २४—चित्रशाकपूपभच्यविकारक्रिया, २५—पानकरसरागासवयोजनम्, २६—सूचीवापकर्म्माणि, २७—सूत्रक्रीडा, २८—प्रहेलिका, २९—प्रतिमाला, ३०—दुर्वचकयोगाः, ३१—पुस्तकवाचनम्, ३२—नाटिकाख्यायिकादर्शनम्, ३३—काव्यसमस्यापूरणम्, ३४—पट्टिकावेत्रवाणविकल्पाः, ३५—तर्कुकर्म्माणि, ३६—तच्चणम्, ३७—वास्तुविद्या, ३८—रूप्यरत्नपरीचा, ३९—धातुवादः, ४०—मणिरागज्ञानम्, ४१—आकरज्ञानम्, ४२—वृचायुर्वेदयोगाः, ४३—मेषकुक्कुटलावकयुद्धविधिः, ४४—शुकसारिकाप्रलापनम्, ४५—उत्सादनम्, ४६—केशमार्जनकौशलम् ४७—अचरमुष्टिकाकथनम्, ४८—म्लेच्छितकविकल्पाः ४९—देशभाषाज्ञानम्, ५०—पुष्पशकटिकानिमित्तज्ञानम्, ५१—यन्त्रमातृका, ५२—धारणमातृका, ५३—सम्पाठ्यम्, ५४—मानसी काव्यक्रिया, ५५—क्रियाविकल्पः, ५६—छलितकयोगः, ५७—अभिधानकोषच्छन्दोज्ञानम्, ५८—वस्त्रगोपनानि, ५९—द्यूतविशेषः, ६०—आकर्षक्रीडा, ६१—बालकक्रीडनकानि, ६२—वैनायकीविद्याज्ञानम्, ६३—वैजयिकविद्याज्ञानम्, ६४—वैतालिकीविद्याज्ञानम्। इति। इमाश्च विद्याः संसारयात्रानुवर्त्तनाय कौटिल्यादिपादैः शास्त्रान्तरे व्यवस्थापिताः।

अर्थशास्त्रमपि बहुविधं शिल्पशास्त्रं गजशास्त्रं हयशास्त्रं नीतिशास्त्रमित्येवमादि। तेषां प्रपञ्च आकरे द्रष्टव्यः। यद्यपि अर्थेन धर्मो भवतीति अर्थशास्त्रस्य प्रयोजनं तथापि धर्म्मशास्त्रार्थशास्त्रयोर्विरोधे ह्यर्थशास्त्रस्य वाध एव। धर्म्मशास्त्रात् तस्य दुर्बलत्वात्। तदुक्तं भगवता याज्ञवल्क्येन—

"स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।
अर्थशास्त्रात्तु बलवद् धर्म्मशास्त्रमिति स्थितिः॥" इति।

शास्त्रान्तरं च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"स्मृत्यर्थेन विरोधे हि अर्थशास्त्रस्य बाधनम् ।
परस्परविरोधे तु न्याययुक्तं प्रमाणवत् ॥" इति ।

एतच्च विवृतं मिताक्षरायाम्—"यद्यपि समानकर्त्तृकतया अर्थशास्त्रधर्म्मशास्त्रयोः स्वरूपगतो विशेषो नास्ति, तथापि प्रमेयस्य धर्म्मस्य प्राधान्यादर्थस्य चाप्राधान्याद् धर्म्मशास्त्रं बलवदित्यभिप्रायः" इति। तदेव—

"आततायिनमायान्तं हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥"

इति वचनमर्थशास्त्रत्वेन "मा हिंस्यात् सर्व्वा भूतानी"ति धर्म्मशास्त्रेण बाध्यते ।

उपवेदा एवं सुस्थिताः । इदानीं वेदानामुपाङ्गानि वर्ण्यन्ते। तत्र प्रथमं पुराणं गृह्यते । आथर्व्वणिका मन्यन्ते यज्ञोच्छिष्टं पुराणमिति। 'ऋचः सामानि छन्दांसि पुराणं यजुषा सहे'ति श्रुतेः। तच्च 'सदेव सोम्येदमग्र आसीदि'त्यादिकं जगदवस्थानमुपक्रम्य सर्गप्रतिपादकं वाक्यजातं भवति। महर्षिः पाराशरो योगज्ञानादिसम्पन्नस्तद्वक्ता किलेति प्रसिद्धिः। तदुक्तं रेवामाहात्म्ये—'अष्टादशपुराणानां वक्ता सत्यवती सुत' इति। तेषां श्रवणफलं चोक्तं भगवता मनुना—

'स्वाध्यायं श्रावयेत् पित्रे धर्म्मशास्त्राणि चैव हि ।
आख्यानानीतिहासांश्च पुराणानि खिलानि च ॥' इति ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ছান্দোগ্যমন্ত্রভাষ্যম্

ভট্ট-গুণবিষ্ণুপ্রণীতম্

শ্রীদুর্গামোহনভট্টাচার্য-কাব্য-সাংখ্য-পুরাণতীর্থ, এম্.-এ.

সম্পাদিতম্

সামবেদীয় গৃহ্যকর্ম্মে প্রযোজ্য বৈদিক মন্ত্রগুলির "গুণবিষ্ণু-টীকা" বাঙ্গালা ও মিথিলাপ্রদেশে সুপ্রসিদ্ধ। কালক্রমে এই টীকার হস্তলিখিত পুথিগুলি অত্যন্ত ভ্রমপ্রমাদ-পরিপূর্ণ হইয়া পড়িয়াছে। এইরূপ অবিশুদ্ধ আদর্শ পুথি অবলম্বনে "গুণবিষ্ণু-টীকা" বা ছান্দোগ্যমন্ত্রভাষ্যের কিয়দংশ কয়েক বার দশকর্ম্ম-পদ্ধতির পাদটীকারূপে মুদ্রিত হইয়াছিল; এইবার ইহা **বহু আদর্শ-পুস্তক অবলম্বনে এবং মুদ্রিত ও অমুদ্রিত নানাবিধ বৈদিক গ্রন্থের সহায়তায় বিশুদ্ধরূপে এবং সমগ্রভাবে সংস্কৃত-সাহিত্য-পরিষৎ হইতে প্রকাশিত হইল।**

ইহাতে **বিবাহ, অন্নপ্রাশন, চূড়াকরণ, উপনয়ন** প্রভৃতি **দশবিধ সংস্কারে**; স্নান, সন্ধ্যা, শ্রাদ্ধ প্রভৃতি নানাবিধ গৃহকর্ম্মে আবশ্যক মন্ত্রগুলি অতি সরল ভাবে ব্যাখ্যাত হইয়াছে।

গ্রন্থের প্রারম্ভে এলাহাবাদ বিশ্ববিদ্যালয়ের ভাইস্-চ্যান্সেলর **মহামহোপাধ্যায় ডাঃ শ্রীযুক্ত গঙ্গানাথ ঝা** মহাশয় লিখিত ইংরাজী মুখবন্ধ সন্নিবেশিত হইয়াছে। তৎপর অতি বিস্তৃত ইংরাজী ভূমিকায় সম্পাদক মহাশয় গুণবিষ্ণু ও তাঁহার ভাষ্যসম্বন্ধে বহু বিষয়ের আলোচনা করিয়াছেন এবং গুণবিষ্ণুর বঙ্গীয়ত্ব ও সায়ণাচার্য্য অপেক্ষা প্রাচীনত্ব প্রমাণ করিয়াছেন।

এই গ্রন্থের সাহায্যে হিন্দুগণ বিশুদ্ধভাবে মন্ত্র উচ্চারণ করিতে পারিবেন। মন্ত্রার্থ অবগত হইতে পারিলে, গ্রন্থসন্নিবিষ্ট **সূচীপত্র ও পরিশিষ্ট**-সাহায্যে মন্ত্রগুলির আকরস্থান ও বিনিয়োগপ্রমাণ জানিয়া তদ্বিষয়ে নিঃসন্দেহ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

হইতে পারিবেন। বিভিন্ন বৈদিক গ্রন্থ হইতে সংগ্রহ করিয়া প্রতি মন্ত্রের মূল এবং গৃহ্যসূত্র হইতে তাহার বিনিয়োগ প্রদর্শিত হইয়াছে।

এই গ্রন্থ দেশে বিদেশে সর্ব্বত্র প্রশংসিত হইয়াছে। **প্রত্যেক আনুষ্ঠানিক হিন্দুর পক্ষে ইহা পরম উপযোগী।**

প্রাপ্তিস্থান—সংস্কৃত-সাহিত্য-পরিষৎ
শ্যামবাজার, কলিকাতা।

মূল্য—৩৷৷০
সভ্যপক্ষে—৩৲

मञ्जु-भाषिणी

इयमेकैव जगति संस्कृतभाषामयी 'साप्ताहिकी' वृत्तान्तपत्रिका। संस्कृतभाषा-ग्रन्थ-प्रकाशकानाम् अनुत्तमं विज्ञापनसाधनम्। सर्वदेशेषु प्रचलति।

भारत-ब्रह्मदेश-लङ्का-वासिभिर्देयं वार्षिकं मूल्यम्—२-०-० ; अन्यदेशीयैर्देयम्मूल्यं ६ शिलिंग।

मैनेजर—मञ्जुभाषिणी
CONJEEVERAM (Madras.)

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishad, Shyambazar, Calcutta
Printed at
Siddheswar Press,
39/2, Shibnarayan Das's Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Reg. No. C. 1073.
Digitized by Arya Samaj Foundation Chennai and eGangotri
Vol. XIV, No. 2.] [June, 1931.

१८५३ शकीये ज्यैष्ठे १४श-वर्षस्य २य-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री, एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকা কেশরঞ্জন মাথায় মাথিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথা মাথিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা, প্রভৃতি উপসর্গ বিদূরিত হ দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থের গৃহেও কেশরঞ্জনের সমাদর। আপনি ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়া অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীব রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মা (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারি হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বল নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষে এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগে নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎস দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণ বিবরণ, রোগীর পরিচর্য্যা এ দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে মূল্য ২৷৷০ টাকা, ডাকমাশুল ও প্যাকিং ৮০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

June, 1931.	१८५३ शकीये ज्यैष्ठे १४वर्षस्य २य-संख्या	Vol. XIV, No. 2.

उपनिषत्कथा

(छान्दोग्ये तृतीयावृत्तिः)

[निबन्धकः—महामहोपाध्यायः श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः]

अस्ति छान्दोग्योपनिषदि चतुर्थप्रपाठके तृतीयखण्डे सत्यकामाख्यायिका नाम परमरमणीयः कथाभागः। यमधिकृत्य गवेषणागरीयांसः पाश्चात्त्या विद्वांसस्तदनुवर्त्तिनोऽस्मद्देशीयाश्च केचनार्वाचीनाः सत्यसन्धस्यापि सत्यकामस्य स्वरूपं स्वात्मानुरूपं न्यरूपयन्। तद्विषये चास्मदीयं वक्तव्यं यथास्थानं निवेदयिष्यामः। साम्प्रतं प्रस्तुतार्थप्रस्तावनामिवारचयामः।

सत्यकामो नामान्वर्थनामा कश्चिद् ब्राह्मणतनयः शैशवपदवीमनुभवन्नासीत्। स च जवालाया मातुरपत्यमिति जावाल इत्यपि गीयते। मृतपितृकोऽसौ शिशुरात्मन उपनयनयोग्यं वयः समुपस्थितमित्यनुचिन्तयन् "जवालां मातरमामन्त्रयाञ्चक्रे—ब्रह्मचर्य्यं भवति, विवत्स्यामि" इति। ब्रह्मचर्य्यवासो ह्युपनयनानन्तरमेव सम्भवति। य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवोपनेता वेददाता गुरुः, तस्मिन्नेव ब्रह्मचर्य्यं चरन्ति ब्रह्मचारिण इति हि श्रुतिस्मृतिवादाः। ततश्च ब्रह्मचर्य्यप्रार्थनयैव तस्योपनयनप्रार्थनमपि निःशब्दं विज्ञायत एव। उपनयनग्रहणे हि गोत्रपरिचयो नितरामपेक्ष्यते, इत्यमन्तराकलयन् सत्यकामः पुनरपि मातरमाह— "भवति, किंगोत्रोऽस्मि", तन्मे निवेद्यताम्। तदहं गुरवे यथायथं निवेदयिष्यामीति।"

प्रियपुत्त्रेण सप्रश्रयमेवमभिधीयमाना जवाला स्वात्मनो गोत्रपरिचयेऽनभिज्ञतामावेदयन्ती सादरं "हैनमुवाच—नाहमेतद् वेद तात यद्गोत्रस्त्वमसि। बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साहमेतन्न वेद यद्गोत्रस्त्वमसि, जवाला तु नामाहमस्मि, सत्यकामो नाम त्वमसि, स सत्यकाम एव जावालो ब्रवीथा इति।"

एतस्मादेवं प्रतीयते यत्—जवाला किल गृहधर्म्मरता गृहस्थोचितां परिजनपरिचर्य्यामभ्यागतसत्क्रियाञ्च पर्य्याप्तमाचरन्ती परिचारिणीव तदेकव्यग्रमानसासीत्। वयश्च यौवनमात्रं न प्रौढपदवीमयासीत्। अजातविवेकविज्ञानावसरे तस्मिन्नेव वयसि सा सत्यकामं सुषुवे। ततश्च गृहकर्म्मणि गुरुशुश्रूषादौ च समाहितचित्ततया, यौवनस्य च स्वभावत एव परिणामचिन्ताविमुखतया जवाला किल ज्ञातव्यमपि पत्युर्वंशपरिचयादिकं नाज्ञासीत्। तस्मादेव सा स्वकीयमज्ञानमनाशङ्कमाविष्कुर्वती न ह्रियमाप।

एतद्व्याख्यानावसरे च भगवन्तः शङ्करपादा अप्येवमेवाहुः—"बहुभर्त्तृगृहे परिचर्य्याजातमतिथ्यभ्यागतादि चरन्ती अहं परिचारिणी— परिचरन्तीति परिचरणशीला एवाहम्। परिचरणचित्ततया गोत्रादिस्मरणे मम मनो नाभूत्...। तदैव ते पितोपरतः, अतोऽनाथाहम्, साहमेतन्न वेद—यद्गोत्रस्त्वमसि" इत्यादि।

अत्र हि जवालायाः कुलगोत्रादिपरिचयानभिज्ञाने कारणत्रयमुपन्यस्तमाचार्य्यपादैः—प्रथमं गृहकर्म्मव्यापृतता, द्वितीयं वयसोऽल्पता,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयं तदानीं पत्युरुपरमः, येन सा सहायसम्पत्परिहीना अनाथा संवृत्ता। एभिरेव कारणैरलब्धावसरा गोत्रसंविज्ञाने जबाला स्वात्मनो सत्यधर्म्मपरायणतामुपक्षिपन्ती निराशङ्कमात्मजमाह—सत्यकाम, गच्छ त्वं गुरुसमीपं, स चेत् त्वां पृच्छेत्, तर्हि ब्रवीयाः—अहमस्मि जबालाया अपत्यं जाबालः सत्यकामो नामेति। एवमभिधाय सा सत्यकामं तनयं गुरवे विसर्जयामास।

मात्रैवमभिधाय विसर्जितः सत्यकामः सोत्साहं गुरुमभिप्रतस्थे। समुचितगुरुलिप्सया प्रतिष्ठमानः "स ह हारिद्रुमतं (हरिद्रुमतोऽपत्यं) गौतममेत्योवाच—ब्रह्मचर्य्यं भगवति वत्स्यामि, उपेयां भगवन्तमिति।"

उपनयनार्थं गुरुकुलमुपेत्य स्वमाशयञ्च गुरवे निवेद्य यावदसौ तद्वचनं प्रतीक्षते, तावदेव गुरुर्गौतमस्तत्परिचयजिज्ञासया "तं होवाच—किंगोत्रो नु सोम्यासीति"। वत्स, यद्यस्मत्त उपनयनमभिकाङ्क्षसि, तर्हि प्रथममात्मनो गोत्रादिकमावेदय, अन्यथा कया विधया कथं वा त्वमुपनेतव्यो भवेः। भगवता गौतमेनैवमभिधीयमानः सत्यसन्धः सत्यकामः "स होवाच—नाहमेतद्वेद भोः, यद्गोत्रोऽहमस्मि" इति। भगवन्, न केवलमहमेवात्र असंविज्ञानदोषभाक्, मदेकपुत्रा जनन्यपि नैतद्विजानाति। एतद्विविदिषया चाहम्—"अपृच्छं मातरं सापि चैतद्विषयेऽसंविज्ञानं प्रख्यापयन्ती—"सा प्रत्यब्रवीत्—बह्वहं चरन्ती परिचारिणी" इत्यादि।

एवमभिहितो गौतमः शिशोः सत्यकामस्य ब्राह्मणकुमारोचितमेवमार्जवं सत्यवादित्वञ्चावेक्ष्य प्रसन्नमनाः "तं होवाच—नैतदब्राह्मणो विवक्तुमर्हति। समिधं सोम्याहर, उप त्वानेष्ये, न सत्यादगा इति।" सत्यवदनं हि ब्राह्मणस्य शीलम्। ब्राह्मणो हि सत्यानुरोधेन सम्पदो विजहाति, मानमपचिनोति, ग्लानिमनुगच्छति, मरणमप्यङ्गीकरोति, तथापि न विजहाति सत्यम्। यतोऽयमात्मनोऽभीष्टसिद्धयेऽन्यतमना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रित्य सत्यमवादीत्, तन्नूनमयं ब्राह्मणकुमार इति मनसि समाकलय्य उपनयनविधौ स्वसम्मतिमाज्ञापयन्नाश्वासयंश्च वचनोपष्टम्भेन सत्यकामं समिदाहरणार्थमादिदेश। सोऽपि तदादेशं शिरसि धारयन् गुर्वर्थं समिधमाजहार। गौतमश्च स्वच्छन्दानुवर्त्तिनं कुमारं सत्यकामं यथान्यायमुपनिन्ये।

परचर्चाचातुर्य्यमार्जवमित्याकलयन्तः स्वान्तःकरणवृत्तिभिर्जगदुपरञ्जयन्तोऽनल्पकल्पनाकुशलाः केचित् खलु वैदेशिकास्तच्चित्तदत्ताशया अस्मदीयाश्च केचन प्राज्ञम्मन्या इदमेव सत्यकाम-जाबालोपाख्यानमधिकृत्य यथाभिमतं कल्पनाकौशलमाविष्कुर्वन्ति। ते हि शुद्धशीलामपि जबालां बहुपुरुषगामितया व्यभिचारिणीं कल्पयन्ति, सत्यकाममपि जारजत्वेन चित्रयन्ति, सत्यकामं प्रति जबालाया उक्तिमेव स्वपक्षे प्रमाणयन्ति, संस्कृतभाषायाश्चात्मनो नवमिव प्रज्ञाप्रकर्षं प्रकटयन्ति। ते खलु गुरुपरम्पराधिगतविद्यानां शुद्धसत्त्वानामध्यात्मतत्त्वपरिशीलनव्रतानां वेदवेदान्तविश्रान्तमतीनामाचार्य्याणामपि वचांसि नाद्रियन्ते, गुरुपारम्पर्य्यं न बहुमन्यन्ते, न्यायं नावबुध्यन्ते, सत्पक्षं नाश्रयन्ते, परमात्मनो मनोवृत्तिमेव प्रमाणसारतया समालम्बन्ते। ते चात्रैवं जल्पन्ति—जबाला खलु न बाला, नापि मुग्धा ; सा तु पुत्रवत्यापन्नयौवनापि सती यदात्मनोऽवश्यज्ञातव्यमपि पत्युः परिचयं नाम च निर्वक्तुं न शशाक, तस्मान्नूनमियं व्यभिचारिणी वेश्याप्रायैव। तत एव च केनायमुत्पादित इति निर्णेतुमशक्यत्वादेव "एतन्न वेद" इत्याद्याह।

सा हि यौवने वयसि वर्त्तमाना दासीवृत्त्या च जीवन्ती अस्वामिकतया बहूनां पुरुषाणामुपभोग्या ध्रुवमासीत्। अनियतपुरुषगामितया 'काकतालीय'न्यायेन समुत्पन्नः पुत्रः कस्येति विवेक्तुमशक्य एव। अशक्यत्वादेव तदवधारणे प्रयासमपहाय सत्यवादित्वमात्मनः ख्यापयामास "नाहमेतद्वेद" इत्याद्युक्तिभिः। सा चेदेवं न भवेत्, कथं तर्हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा स्वयमेव "बहु अहं चरन्ती परिचारिणी यौवने त्वामलभे" इत्यादिभिर्वचनजातैरात्मनो बहुचारिणीभावं परिचारिणीभावञ्च निःशङ्कं कथयेत् ? अतस्तदुक्तिभिरेव तस्या दास्यं व्यभिचारपरत्वञ्च सम्यगवगम्यते। विशेषतश्च पुरा किल भारते वर्षे दाम्पत्यसम्बन्ध इदानीमिव नासीत्, येन तथाविधाचारो दोषदृष्ट्या परिक्ल्प्येत। अतश्चैवमध्यवसातव्यम्, यद् जबाला न जात्या ब्राह्मणी, तदपत्यं सत्यकामश्च न जात्या ब्राह्मणः, परन्तु सत्यवादित्वेन ब्राह्मणगुणसम्पन्नः। य एव हि सत्यवादी, स एव ब्राह्मणाधिकारं लभते। सत्यकामश्च सत्यवादी, ततः सोऽपि ब्राह्मणाधिकारं कथं न लभताम् इति मनसि निधाय गौतमेन तदुपनयनमनुज्ञातमित्यतो वर्णादिविभागोऽपि तदानीमिदानीन्तन इव नासीदित्यप्यनुमीयतामित्येवमनल्पकल्पनाकल्पवल्लरीमधिरूढास्ते यथेच्छं जल्पन्ति। तेषां मुखमुद्रणायेदमभिधीयते। (क्रमशः)

विद्याप्रस्थानम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—कालीघट्टवास्तव्यः श्रीगुरुपदहालदारः]

शतपथीयसंवादतः पुराणलक्षणं बृहदारण्यकभाष्ये शङ्कराचार्यपादैरुक्तं पुराणमसद्वा इदमग्र आसीदिति। तदेव सायणाचार्य्य ऐतरेयब्राह्मणोपक्रमे—इदं वा अग्रे नैव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणमिति। तत्रैव पौराणिका आहुः—

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥' इति।

शुकपरीक्षित्संवादे तु महदल्पव्यवस्थाभेदात् पुराणस्य द्वैविध्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र दशापि लक्षणानि पृथक् पृथङ्निरूप्यन्ते तन्महापुराणं, यत्र तु पञ्चसु लक्षणेषु अन्येषामन्तर्भावस्तदल्पमिति। तदुक्तं—

'सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च।
वंशानुचरितं वंशः संस्था हेतुरपाश्रयः॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया॥' इति।

तत्र केचित् पञ्चविधमित्यस्यायमभिप्रायः—सर्गः प्रतिसर्गो वंशो मन्वन्तरं वंशानुचरितं चेति।

अष्टादशविधं पुराणम्। तद्भेदा विष्णुपुराणे वर्णिताः।—

ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।
तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा॥
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्।
वाराहं द्वादशं चैव स्कान्दं चैव त्रयोदशम्॥
चतुर्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतम्।
मात्स्यञ्च गारुडं चैव ब्रह्माण्डञ्च ततः परम्॥ इति।

तत्र भागवतं देवीभागवतमिति नीलकण्ठादयः शाक्ताः, श्रीधरादयस्तु सात्वता विष्णुभागवतमिति। अन्यैः पुनर्नागोजिभट्टादिभिर्विष्णुभागवतस्य पुराणत्वं स्वीकृत्य देवीभागवतस्य धर्म्मशास्त्रेष्वन्तर्भाव उक्तः। उदारस्तृतीयः कल्पः किन्तु देवीभागवतेनासौ सर्वथा विसंवदति। एवं वस्तुगतौ सत्यामस्मन्मते हि मीमांसादिवत् पूर्वभागो देवीभागवतमुत्तरभागो विष्णुभागवतमिति द्वयमेव मिलित्वा पञ्चमं भागवतं भवति। महाभारतपुराणशास्त्रादिभिश्चित्तप्रसादमलभमानस्य कृष्णद्वैपायनस्य नारदोपदेशतो विष्णुभागवतप्रणयनेन तल्लाभ इति शास्त्रप्रसिद्धेः।

तेषामुपपुराणान्यपि सन्ति। तानि यथा कौर्म्मे—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदीयमतः परम्॥
कापिलं वारुणं चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वामनं चैव कालिकाह्वयमेव च॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तं मारीचं तथैव भार्गवाह्वयम्॥ इति।

एतानि खलु निदर्शकत्वेन भवन्ति, बृहन्नन्दिकेश्वरादीनामुपपुराण-मध्ये पठितत्वात्। उपपुराणानामपि महदल्पव्यवस्थाभेदात् पूर्व्वोक्तं दशलक्षणवत्त्वं पञ्चलक्षणवत्त्वं वा बोध्यम्।

अथ स्मृतिपदवाच्यं धर्म्मशास्त्रम्। मन्वादयस्तस्य स्मर्त्तारो भवन्ति। उक्तञ्च—

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्यौशनोऽङ्गिरो-
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ॥
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥" इति।

एते प्राधान्यादुक्ता अन्ये तु वृद्ध-देवल-सोम-जमदग्नि-प्रजापति-विश्वामित्र-जातूकर्ण-वृद्धशातातप-पैठीनसि-पितामह-बौधायन-जावालि-च्यवन-मरीचि-कश्यपादय इति। तत्रापि मनोः प्राधान्यं सर्वतो ग्राह्यम्। यदाह भगवान् बृहस्पतिः—

"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥" इति।

अन्येषामपि स्मृतयो वर्णाश्रमधर्म्मविशेषेषु प्रमाणमिति दिक्।

यान्येव पञ्चरात्रविष्णुधर्म्मशिवधर्म्मगृह्यासंग्रहादीनि सन्ति, तेषामपि धर्म्मशास्त्रेष्वन्तर्भावः। यदेव पुना रामायणं महाभारतञ्च तदपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्मशास्त्रेषु गृहीतं वेदितव्यम्। सांख्यपातञ्जलयोर्धर्म्मशास्त्रान्तर्भावेऽपि स्वशब्देनैव दर्शनानां प्रस्थानभेदे तयोः पृथगेव सङ्गतिर्वाच्या।

अथ न्यायमीमांसे। ननु, यद्यपि आत्मसाक्षात्कारो मोक्षः, यद्यपि स आत्मसाक्षात्कारश्चित्तशुद्धिद्वारा नितरां प्रवर्त्तते, यद्यपि कर्म्माणि चित्तशुद्धिं जनयन्ति, यद्यपि वेदः कर्म्मादिप्रतिपादको भवति, तर्हि पुनर्दर्शनानां किं प्रयोजनम् ?

उच्यते। विनैवोपदेशं स्वभावतो लोका देहातिरिक्तमात्मानमपह्नुवाना वेदबाह्यं शास्त्रमनुवर्त्तमानाः सुखमेव पुरुषार्थं मन्यमानाश्चानुभूयन्ते। तदेव तेषां रञ्जनार्थं लोकायतादिकं शास्त्रमपि प्रवृत्तम्। तत्कर्त्तारश्च आहुः—

"अङ्गनालिङ्गनाज्जन्यसुखमेव पुमर्थता।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते॥
लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः।
देहस्य नाशो मुक्तिस्तु न ज्ञानाद् मुक्तिरिष्यते॥
अत्र चत्वारि भूतानि भूमिवार्य्यनलानिलाः।
चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥
किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।
अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः॥
देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः।
मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकी॥" इति।

एतदुक्तं भवति देह एव चैतन्यापरपर्य्याय आत्मा यस्य विनाशो मरणाख्यो मोक्षस्तस्मात् कामिनीकाञ्चनादिसुखावाप्तिः पुरुषार्थता परमेश्वरस्य शशविषाणायत इति।

एवं वस्तुगतौ सत्यां तत्पक्षनिरसनाय प्राचीनैः सरण्यो नानाविधा दर्शिताः। ताः सर्व्वा दर्शनशब्दाभिलप्या भवन्ति। दर्शनानि षट्। तदुक्तं हयशीर्षपञ्चरात्रे—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'गौतमस्य कणादस्य कपिलस्य पतञ्जलेः ।
व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि ॥' इति ।

षट्स्वपि दर्शनेषु सत्सु सर्वेषामभिप्राय एक एव भवति । आत्मनि तेषां तात्पर्य्यावधारणात् । अत एव दर्शनानां प्रयोजनं वेदबाह्य-चार्व्वाकादिमतनिराकरणपूर्वकं जगत्कारणतया सर्वत्र आत्मसंस्थापन-मिति । आत्मनि सिद्धे वेदप्रतिपाद्यं ब्रह्म स्वत एव सिध्यतीति प्रागेव युक्तितो न्यायशास्त्रेण प्रतिपादितमात्मा देहातिरिक्तो न तु देह इति । देहातिरिक्तत्वेऽपि न्यायशास्त्रे तस्य बहुत्वं गुणाश्रयत्वं चाभ्युपगतम् । बहिर्मुखप्रवणानामधिकारिणामेकपदे तस्य सूक्ष्मनिर्गुणत्वादिविषये प्रवेशासम्भवात् । शास्त्रञ्च—'अधिकारिविभेदेन शास्त्राण्युक्तान्यशेषत' इति । तदुक्तं परिशनिष्ठैरुदयनाचार्य्यपादैः—"आत्मा तु किं स्वप्रकाश-सुखस्वभावोऽन्यथा वेति पृच्छामः । आज्ञोऽसि चेत्, उपनिषदं पृच्छ । मध्यस्थोऽसि चेत्, अनुभवं पृच्छ । नैयायिकोऽसि चेत्, नैयायिक-सुखज्ञानातिरिक्तस्वभाव इति निश्चिनुयाः" इति ।

न्यायशास्त्रं द्विविधं कणाददर्शनमक्षपाददर्शनं चेति । तत्र—

'यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥'

इत्येवमादि श्रौतप्रामाण्याद् दुःखहानोपायः श्रवणमनननिदिध्यासनै-रात्मसाक्षात्कारो यतः श्रवणोत्तरं मननमभ्युपेयं मननं चानुमानस्वरूप-मनुमानञ्च व्याप्तिज्ञानापेक्षं व्याप्तिज्ञानञ्च द्रव्यगुणकर्म्मसामान्यविशेष-समवायरूपपदार्थविवेकसापेक्षमिति पदार्थषट्कं कणादेन वैशेषिक-दर्शने व्यवस्थापितम् । तत्र भाष्यकारादिभिरधिकरणबलादभावोऽपि पदार्थत्वेन गृहीतः । अतः षण्णां भावपदार्थानामभावसप्तमानां द्रव्या-दीनां साधर्म्यवैधर्म्याभ्यां श्रुतिविहितमननदृढीकरणमेव वैशेषिकस्य प्रयोजनम् । तत्र परिशनिष्ठ उदयनाचार्य्य आह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न्यायवर्त्मैयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥" इति ।

तदेव दशाध्यायं वैशेषिकदर्शनमुद्देशो लक्षणं परीक्षा चेति त्रिविधां शास्त्रप्रवृत्तिमादाय भगवता कणभक्षेण प्रणीतं तस्य भाष्यमपि पदार्थधर्मसंग्रहकारादिभिराचार्य्यैः सम्यगारचितम् । तत्र प्रथमाध्याये आह्निकद्वयशालिनि जातिमतां द्रव्यादीनां विचारः । द्वितीये तथाविधे भूतविशेषादिप्रतिपादनम् । तृतीये तथाविध आत्मान्तःकरणलक्षणम् । चतुर्थे तथाविधे शरीरतदुपयोगितादिनिर्णयः । पञ्चमे तथाविधे कर्म्मस्वरूपविवेचनम् । षष्ठे तथाविधे दानप्रतिग्रहादिधर्म्मप्रतिपादनम् । सप्तमे तथाविधे गुणसमवायनिरूपणम् । अष्टमे तथाविधे निर्विकल्पसविकल्पप्रत्यक्षप्रमाणचिन्तनम् । नवमे तथाविधे बुद्धिविशेषप्रतिपादनम् । शेषतो दशमे तथाविधेऽनुमानभेदविचारः । एवं वैशेषिकदर्शनेन वेदानामभ्युदयनिःश्रेयसहेतुत्वमात्मसाक्षात्काराय साधितं भवति ।

तत्त्वज्ञानाद्दुःखोच्छेदलक्षणं निःश्रेयसमिति प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानमक्षपाददर्शने निरूपितम् । तदाह सूत्रकारः 'प्रमाण-प्रमेय-संशयप्रयोजन-दृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम' इति । एतेषां षोडशपदार्थानां लक्षणमपि निर्द्धारितं "प्रत्यक्षानुमानशब्दाः प्रमाणानी"त्येवमादि "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमि"त्यन्तादिति । एतद्दर्शनकारो भगवान् गौतमो य एव ह्यक्षपाद इति नाम्ना प्रसिद्धः । तस्य भाष्यकारो भगवान् वात्स्यायनश्चाणक्यापरपर्य्यायस्तद्वार्त्तिककार उद्योतकरभारद्वाजस्तट्टीकाकारो वाचस्पतिमिश्रो यस्य परिशुद्धौ सर्वतन्त्रस्वतन्त्र उदयनाचार्य्यो नव्यन्यायसरणिमकार्षीत् । एते खलु सर्वे नैयायिकाः प्राचीना नवीनस्तु गङ्गेशोपाध्यायो यः प्रत्यक्षानुमानोपमानशब्दाख्यखण्डचतुष्टयात्मकं तत्त्वचिन्तामणिनामकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकरणग्रन्थं प्राणैषीत्, वर्द्धमानस्तत्त्वचिन्तामणेः प्रकाशकारः, यज्ञपतिस्तत्त्वचिन्तामणेः प्रभाकारः, पक्षधरमिश्रस्तत्त्वचिन्तामणेरालोककारः, रघुनाथशिरोमणिस्तत्त्वचिन्तामणेर्दीधितिकारः, मथुरानाथतर्कवागीशस्तत्त्वचिन्तामणिदीधित्योष्टीकाकारः, जगदीशगदाधरौ दीधितिटीकाकाराविति। एवं न्यायशास्त्रेषु पदार्थज्ञानदृढीकरणेन तत्त्वविचारसौकर्य्यं साधितम्। तदुक्तं वात्स्यायनेन—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्म्मणाम्।
आश्रयः सर्वधर्म्माणां विद्योद्देशे गरीयसी॥ इति।

इत्थं पदार्थाननुवदता न्यायशास्त्रेण गुणाश्रयत्वमभ्युपगम्य देहातिरिक्तत्वमात्मनः प्रतिपादितम्। तदुक्तं विज्ञानभिक्षुणा—'न्यायवैशेषिकाभ्यां सुखदुःखाद्यनुवादतो देहादिमात्रविवेकेनात्मा प्रथमभूमिकायामनुमापित' इति। तदनन्तरं सांख्ये तस्य गुणाश्रयत्वं निरसितम्। तन्निरसनेऽपि चात्मनो बहुत्वमभ्युपगतम्। अचतुरचेतसामधिकारिणामेकदा ब्रह्मण एकत्वे प्रतिष्ठाभावात्। तदेव छान्दोग्योपनिषदि श्रूयते—'सोपानारोहणवत् स्थूलादारभ्य सूक्ष्मं सूक्ष्मतरञ्च बुद्धिविषयं ज्ञापयित्वा तदतिरिक्ते स्वाराज्येऽभिषिच्यामो'ति।

घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा।
देहद्रष्टा तथा देहो नाहमित्यादिरूपतः॥

इत्यादिना देहाद्यात्मनिरसनात् तत्त्वजिज्ञासुरात्मनो निर्गुणत्वप्रतिपादनपरे सांख्यशास्त्रे प्रवर्त्तते। सांख्यशास्त्रञ्च द्वेधा स्यात् कापिलमतेन हैरण्यगर्भमतेन वा। तत्र प्रथमेन विवेकवैराग्याभ्यासो द्वितीयेन तु भगवदुपास्तिरिति विशेषः। यथाहुः—

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्।
अत्र वः संशयो मा भूज् ज्ञानं सांख्यं परं मतम्॥ इति।

तत्त्वसंग्रहरूपेण सांख्यशास्त्रमथातस्तत्त्वसमाम्नाय इत्यादेस्त्रिविधं दुःखमित्यन्तात् कृपासिन्धुः कपिलमूर्त्तिरादिविद्वान् भगवान् नारायण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदिदेश। तत्र संक्षेपेण चतस्रो विधाः सम्भाव्यन्ते मूलप्रकृतिः प्रकृति-विकृतिर्विकृतिरनुभयः पुरुषश्चेति।

मूलप्रकृतिः प्रधानमव्यक्तं वा। मूलं सत्त्वानामादिरिति। प्रकृतिः प्रकरणात् प्रसवधर्म्मकत्वाद्वा। तथा हि ब्रह्मवैवर्त्तपुराणम्—

प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता॥ इति॥

सा च प्रधानमित्युच्यते, प्रकर्षेण धीयते स्थाप्यते निखिलमत्रेति निर्वचनात्। ननु, कथं सा प्रधानत्वेन गृहीता? उच्यते। सृष्टेरेकमूलत्वमभ्युपगमनीयम् अनेकेभ्यः कार्य्योत्पत्त्यभ्युपगमे कारणानवस्थानदोषप्रसङ्गात्। तन्त्वादयो ह्यवयवाः स्वांशगतैः सूक्ष्मैः परस्परं संयुज्यमाना अवयविनमुत्पादयन्ति, ते च तन्त्वादयः स्वांशभूतैरवयवैः संयुज्यमानैरुत्पाद्यन्ते, ते पुनस्त्रसरेणुभिः स्वकीयैरंशैः, त्रसरेणवश्च द्व्यणुकादिभिस्तथाभूतैः, द्व्यणुकादयः पुनः परमाणुभिस्तथाभूतैः, परमाणवोऽपि पुनः शक्तिविशेषाणां सङ्घातमात्रत्वात् तद्गतैः स्वांशैरिति न क्वचित् कारणव्यवस्थितिरुपलभ्यते। अत एव कारणव्यवस्थासंसिद्धेर्र्नानाविधपरिणामशक्तियुक्तं स्वयं तु क्षरणादिस्वभावरहितं कृत्स्नस्य जगतः सर्व्वावस्थाश्रयस्वरूपमेकं द्रव्यं कारणत्वेनाश्रयणीयम्। तच्च कारणमव्यक्तं गुणसाम्यरूपा प्रकृतिरिति तत्कल्पनहेतूनुपन्यस्यति-सांख्यकारिका—

भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च।
कारणकार्य्यविभागादविभागाद्वैश्वरूप्यस्य॥
कारणमस्त्यव्यक्तम्। इति।

अतः सैव प्रकृतिरेका स्वयमचेतनाऽनेकचेतनभोगापवर्गार्था सनातनी न कस्यचिद् विकृतिः, त्रिगुणं वैश्वरूप्यं तु गुणत्रयसाम्यप्रकृत्येककारणकमिति प्रकृतिः प्रकृतिरेवेति निश्चीयते।

सामान्याहंकारादयः सप्त प्रकृतयो विकृतयश्च भवन्ति। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्याहंकारो विशेषाहंकारं जनयतीति प्रकृतिः, स च प्रकृतेर्जात इति विकृतिर्विकारः। विशेषाहङ्कारः शब्दतन्मात्रं जनयतीति प्रकृतिः, स च सामान्याहङ्काराज्जात इति विकृतिः। शब्दतन्मात्रमाकाशमुत्पादयतीति प्रकृतिः, तच्च विशेषाहङ्कारादुत्पन्नमिति विकृतिः। स्पर्शतन्मात्रं वायुमुत्पादयतीति प्रकृतिः, तच्च विशेषाहङ्कारादुत्पद्यत इति विकृतिः। रूपतन्मात्रं तेज उत्पादयतीति प्रकृतिः, तच्च विशेषाहङ्कारादुत्पद्यत इति विकृतिः। रसतन्मात्रमप उत्पादयतीति प्रकृतिः, तच्च विशेषाहङ्कारादुत्पद्यत इति विकृतिः। गन्धतन्मात्रं पृथिवीमुत्पादयतीति प्रकृतिः, तच्च विशेषाहङ्कारादुत्पद्यत इति विकृतिः। अत उत्पादकत्वादुत्पन्नत्वाच्च सप्तैमाः प्रकृतिविकृतय उच्यन्ते।

विशेषाहङ्कारस्त्रिविधो वैकारिकस्तैजसो भूतादिश्चेति। तत्र वैकारिकः सात्त्विक इन्द्रियादिः, भूतादिस्तामसो महाभूतहेतुभूततन्मात्रहेतुः, तैजसो राजस उभयोरनुग्राहक इति केचित्। पौराणिकास्तु भूतादिस्तामसः च्त्यादिहेतुभूततन्मात्रहेतुः, तैजसो राजस इन्द्रियादिः, वैकारिकः सात्त्विको देवादिरुभयोरनुग्राहक इति। तथा हि कौर्म्मे—

> वैकारिकस्तैजसश्च भूतादिश्चैव तामसः।
> त्रिविधोऽयमहंकारो महतः संबभूव ह॥
> तैजसादीन्द्रियाणि स्युर्देवा वैकारिका दश।
> एकादशं मनश्चात्र स्वगुणेनोभयात्मकम्॥
> भूततन्मात्रसर्गस्तु भूतादेरभवन् प्रजाः। इति।

अत आकाशादीनि पञ्चमहाभूतानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्म्मेन्द्रियाणि मनश्चेति षोडशको गणः केवलविकारः। स एव गणः केवलविकारोऽन्यस्मादुत्पन्नो न तु ततोऽन्यदुत्पद्यत इति।

पुरुषस्तु निष्परिणामत्वेन न कस्यचित् प्रकृतिरन्येषामनुत्पादक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वात्, न च कस्यचिद् विकृतिर्जनयितृत्वेऽसकाशादनुत्पन्नत्वात्। एवं स पुरुष आत्मा विरूपितः सूक्ष्मः सर्व्वगतो नित्यो निर्गुणो निर्धर्म्मको द्रष्टा चैतन्यमात्रवपुः क्षेत्रविदप्रसवधर्म्मा प्रतिशरीरं भिन्नश्चेति। पुरुषः पुराणत्वात् पुरि शयनाच्च। आत्मशब्दः स्वभावे वर्त्तते वृत्त्यभावात् सुखलक्षणत्वाच्च। सूक्ष्मो निरवयवत्वात्। सर्व्वगतः सर्व्वत्र पदार्थैर्जडादिभिरप्रतिहतत्वाद् विश्वव्यापकत्वाच्च। यदुक्तं बहुत्वे ससीमत्वमित्युत्सर्गो निरपवाद इति, तदेव गुणपदार्थे स्याज्ज्ञपदार्थे तु तदपवादो न विप्रतिपन्नः। नित्योऽकृतकत्वात्। निर्गुणः सत्त्वरजस्तमोगुणैरननुविद्धत्वात्। निर्धर्म्मकः स्वरूपप्रतिष्ठितत्वात्। द्रष्टा सर्वत उदासीनत्वात्। क्षेत्रवित् क्षेत्रोत्थगुणवेदनात्। यथाहुः पौराणिकाः—

तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः॥ इति।

अप्रसवधर्म्मा गुणकार्य्यराहित्यात्। तदुक्तम्—

जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः।
तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः॥ इति।

प्रतिशरीरं भिन्नो जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेस्त्रैगुण्यविपर्य्ययाच्चैव। एवंभूते तत्त्वे प्रकृतिपुरुषसन्निधिमात्रेण पुरुषस्य चैतन्यं प्रकृतावध्यस्य प्रकृतेश्च कर्त्तृत्वं स्फटिकमणौ जपाया अरुणिमानमिव पुरुषेऽध्यस्य मूढाः कर्त्ताहं भोक्ताहमिति मन्यन्ते। तदेव प्रकृतिरचेतनापि चेतनावतीव प्रवर्त्तते। दृष्टान्तश्च तत्र यथाऽनुष्णाशीतो घटः शीतसंयुक्तः शीत उष्णसंयुक्त उष्णो भवति। यद्यपि लोके पुरुषश्चेतनस्वभावः कर्त्तेति प्रयुज्यते, तथापि वस्तुत एव प्रकृतिरध्यवसायं करोति, न तु पुरुषः। यथा निरपराधो जनश्चौरैः सह गृहीतश्चौरतया प्रतीतस्तथा प्रकृतिः कर्वन्नपि तत्संसर्गात् पुरुषोऽकर्त्ता कर्त्तेव भवतीत्यवधारणात्। एवमज्ञानाद् भोगस्तत्त्वज्ञानादपवर्गः। तदेतत् सांख्यवृद्धाः प्रत्यक्षानुमानाप्तवचनैः साध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्ति। तत्र प्रत्यक्षं दृष्टमक्षमिन्द्रियं प्रतीत्य यदुत्पद्यते तदिति भावः। यथा चक्षुःकर्णनासिकाजिह्वात्वचां रूपादयः पञ्चेन्द्रियार्थाः पञ्चानां प्रत्यक्षं प्रमाणम्। प्रथममेतद् मुख्यं सकलप्रमाणानाम्, अनुमानादीनां तदधीनत्वात् सर्व्ववादिनामविप्रतिपत्तेश्च। य एव व्यापारः प्रत्यक्षेण साधयितुं न पार्य्यते तत्रानुमानस्यावकाशः। कमपि व्यापारमन्वीक्ष्य ततः पश्चान्मीयत इत्यनुमानम्। यथा धूम-व्यापारमन्वीक्ष्य वह्नेरस्तित्वं साध्यते। अनुमानं त्रिविधमाख्यातं —पूर्व्ववत्, शेषवत्, सामान्यतो दृष्टं चेति। तत्र पूर्व्वमस्यास्तीति पूर्व्व-वत्। यथा विशिष्टघनोदयेन भविनीं वृष्टिं साधयति पूर्व्वदृष्टत्वात्। पुनर्यथा नदीपूरदर्शनादुपरि वृष्टो देव इति प्रत्ययः। शेषवद् यथा समुद्रात् कमपि जललवं प्राश्य शेषस्य क्षाररसानुमानम्। सामान्यतो दृष्टं गतिमांश्चन्द्रः क्षितिवदिति। स्थितिमान् सूर्य्यः स्थाणुवदिति वा। प्रत्यक्षेणानुमानेन वा यत्र कश्चिद् व्यापारः साधयितुं न शक्य-स्तत्रागमस्यावकाशः। नित्यानित्यभेदाद् द्विविधः स आगमः। नित्यो यथा—"नासदासीन्नो सदासीत् तदानीं तम आसीदि"त्येवंजातीयकः। अनित्यो यथा—"मा हिंस्यात् सर्व्वा भूतानि"। कुतस्तस्यानित्यत्वम्? 'वायव्यं श्वेतमालभेते'त्येवमादिना स एव बाध्यत इति। तथा हि स्मर्य्यते—

"आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च।
ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्॥
मूलरामायणं चैव पुराणं चैतदात्मकम्।
ये चानुयायिनस्तेषां सर्वे ते च सदागमाः॥" इति।

आगमः पुनराप्तवचनम्। तद् यथा—

"नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः।"

पुनर्यथा—"योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्।"

आप्तिः साक्षादर्थप्राप्तिर्य्यथार्थोपलम्भस्तया वर्त्तन्त इत्याप्ता वासुदेव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनत्कुमारादय आचार्य्या रागद्वेषादिरहिताः श्रुतार्थग्राहिणस्तद्वचनम्। इत्थं सांख्यवृद्धानां प्रमाणसिद्धिः।

सिद्धानि चेत् प्रमाणानि प्रत्यक्षानुमानशब्दा इति, तर्हि किमुपमानार्थापत्त्यभावसम्भवैतिह्यादीनि न स्युः? प्रमेयव्यवस्थार्थं प्रमाणस्वीकारः। त्रिविधप्रमाणसिद्धौ सर्व्वाणि प्रमाणान्तराणि सिद्धानि भवन्ति। प्रमाणत्रये तेषामन्तर्भावात्। तथा हि गौरिव गवय इत्युपमानम्। तदेवानुमाने नितरामन्तर्भूतम्। उपपाद्यानुपपत्त्या या ह्युपपादकस्य कल्पना सा खल्वेवार्थापत्तिः। साऽप्यनुमानम्। तद् यथा—पीनो देवदत्तो दिवा न भुङ्क्ते। अतोऽनुमीयते नितरां स रात्रौ भुङ्क्त इति। तत्रैव नैयायिका अपि समामनन्ति—

"अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः॥" इति।

अभावो नाम प्राक्प्रध्वंसेतरेतरात्यन्ताभावलक्षणो भवति। तत्र ग्रावणि प्रतिमा प्रागुत्पत्तेर्नोपलभ्यत इति प्रागभावः। प्रध्वंसाभावो यथा दण्डाघातेन प्रध्वस्तो घटो नोपलभ्यते। इतरेतराभावो यथा घटे पटत्वं पटे घटत्वम्। अत्यन्ताभावो द्वितीयशिरस्तृतीयबाहुशशविषाणवन्ध्यासुतगगनकुसुमवदिति। सोऽप्यनुमानविशेषः। सिन्धुदेश इत्युक्ते सप्तसिन्धव इति बोधसम्भवः। स शाब्दः श्रौतनिर्देशात्। रावणह्रदे विकटविग्रहो दृष्ट इत्युक्ते तत्र लङ्केश्वरेण देवादिदेवो महादेव उपासित इति बोध ऐतिह्यम्। यद्वा शतद्रुरित्युक्ते देवो वशिष्ठः कण्ठे शिलां बद्ध्वा नद्यामस्यां प्रविष्टस्ततो भीत्या सा स्वयमेव शतधा द्रुतेति ज्ञानमैतिह्यम्। तदप्यनुमानमेव। प्रतिभाऽपि प्रमाणमिति केचित्। प्रतिभा यथा—नैष्कर्म्यमाप्नोति सिद्धिं रोचनार्था फलश्रुतिरित्युक्ते कर्म्मणि कामनालेशविवर्जिते गुणाधिक्यमस्तीति प्रतिभा संजाता। साप्यनुमानमेव। इत्थं प्रत्यक्षानुमानशब्दात्मकप्रमाणसिद्धिः सांख्यदर्शने निर्द्धारिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्गापुष्पाञ्जलिः

[निबन्धकः—महामहोपाध्यायो दुर्गाप्रसादद्विवेदी]

अथ त्रयोदशः स्तवः

अयं दाता तुष्येदयमपि धरित्रीपरिवृढः
प्रसीदेदित्याशा जगति बहु तावद् भ्रमयति ।
शिवे ! यावद्युष्मच्चरणयुगले नम्रकमले
व्यपेतान्यासक्तिर्न हि भवति भक्तिः शिखरिणी ॥१॥

दिवा तत्तत्कार्यव्यतिकरपरीतेन मनसा
निशायामप्याराम्मुहुरुपचितस्वप्नमहसा ।
पराक्रान्तो दूये जननि ! जगतामेकशरणे !
कथं वीच्योपेच्छासरणिमनुसर्तुं प्रभवसि ॥२॥

बहु भ्रान्तं मातर्दिशि दिशि दुराशाहतधिया
परां काष्ठां नीतं मलिनमपि भूपालचरितम् ।
इतिप्रायैः कृत्यैः परिकलितकाये मयि दया-
सुधाधारासारैः शिशिरितदृशं पातय मनाक् ॥३॥

परित्यक्तो मित्रैरपि बहु विचित्रैरहरहः
कथैवान्येषां का प्रतिपदनिजार्थार्पितधियाम् ।
दुराधिव्याधिभ्यां व्यथित इह वर्त्ते त्रिजगतां
शरण्ये कर्णे किं गमयसि न मे क्रन्दितमिदम् ॥४॥

धृताप्युच्चैर्वाणी व्रजति बहुधा संशयपथं
कथं तिष्ठेत्पद्मा कमलशितनालक्षतपदा ।
इदानीं कारुण्यं जननि ! यदि चित्ते न कुरुषे
तदर्तिव्यस्तस्य प्रकथय कथंकारमवनम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वयाचार्याकृत्या (३५) कथितमपि पथ्यं न कलितं
न तथ्यं त्वत्सेवासरणिषु ममाद्यापि करणम् ।
अहो ध्यातुं वाञ्छन्नपि चटुलचित्तेन भुवनं
विहर्तुं जङ्गालः कथमिव भजाम्यम्ब ! भवतीम् ॥६॥
न सक्तिस्त्वत्पूजाविधिषु न च भक्तिस्तव पदे
क्व वा शक्तिर्ध्याने भवतु तरलानामविषये ।
इति क्लेशक्लिष्टे मयि यदि न ते मातरधुना
दयायोगो योगो भवति जनुषो निष्फल इह ॥७॥
सुधाधाराकारां मयि वितर दृष्टिं सकरुणा-
मये ! मातस्त्वत्तो गतिरिह ममान्या न भुवने ।
प्रसूपार्श्वं त्यक्त्वा कथय कथमन्यं शिशुरिया-
द्दया वा दण्डो वा भवतु पुनरौदास्यमतुले ॥८॥
संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता ।
मण्डिता सकलैश्वर्यैः सा परा सम्प्रसीदतु ॥९॥
इत्यवस्थानिवेदनम् ।

अथ चतुर्दशः स्तवः

अपारकारुण्यसुधासमुद्र-
रिङ्गत्तरङ्गावलिलीनचेताः ।
वन्दारुवन्दार्थितकल्पवल्लि !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥१॥
असीमसारल्यलताप्रतान-
विजृम्भणोद्यानविशालसीमा ।
निःशेषभक्तार्तिविनाशशीले !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥२॥

३५—गुरुमूर्त्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदारचारित्रविकाशगन्ध-
सञ्चारणाडम्बररोदसीका ।
हृद्यावदानोत्करभासमाने !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥३॥

संसारदावानलदीनभक्त-
प्रसादनैकामृतपूरपूर्तिः ।
उपासकप्रीणनबद्धकच्चे !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥४॥

दौर्भाग्यतूलज्वलनायमान-
(३६)सहस्रनामश्रवणार्द्रचित्ता ।
निसर्गसौभाग्यविसर्गनिष्ठे !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥५॥

क्लिश्यत्कविव्रततीवितान-
प्रकाशनानभ्रनभस्यवृष्टिः ।
समुच्छलद्भक्तिविशेषतुष्टे !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥६॥

दृक्पातमात्रार्पितसाध्यसिद्धि-
निषेवणानन्दितसाधकेन्द्रा ।
वदान्यसीमायितचित्तवृत्ते !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥७॥

पद्मासनोपेन्द्रमहेन्द्रमौलि-
मन्दारमालाङ्कितपादपीठा ।
मातः ! शिशूक्तिश्रवणस्वभावे !
दुर्गा-प्रसादस्य गतिस्त्वमेका ॥८॥

३६—सहस्रनाम—'श्रीमाता श्रीमहाराज्ञी—' इत्यादिलक्षणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवासक्तसुरासुरावलिशिरोमाल्यान्तरालस्खल-
झूलीधूसरपादपीठविलुठत्सौभासीमायिते ! ।
निर्व्याजस्थिरभक्तियोगसुलभे ! मातस्तवाराधने
चेतो मेऽनिशमुन्नताधिकरसं वैपुल्यमालम्बताम् ॥८॥

इत्यात्मार्पणम् ।

अथ पञ्चदशः स्तवः

यः पार्थिवं लिङ्गमुपेत्य शाल-
ग्रामो वटोऽश्वत्थमुखो भवंश्च ।
नानाविधान्मूर्तगुणान् प्रपेदे
(३७)तमष्टमूर्तिं शरणं प्रपद्ये ॥१॥

योऽम्भांसि पावित्र्यगुणस्य सीमा-
मासादयंस्तीर्थपरम्पराभिः ।
एतां त्रिलोकीं शतधा पुनीते
तमष्टमूर्तिं शरणं प्रपद्ये ॥२॥

य आश्रयात् त्रित्वमुपागतोऽपि
त्रेता त्रयीमन्त्रगुणेन भूयः ।
चराचराधारतयात्मभूत-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥३॥

३७—तदिति सर्वनाम्नः स्त्रीत्वेऽपि अष्टमूर्तिरिति समानम् । अष्टमूर्तिरिति प्रसिद्धं शिवशक्तिनाम । तथाच रघुकारः—'अवेहि मां किङ्करमष्टमूर्तेः' इति । 'अष्टमूर्तिरजाजैत्री' इति ब्रह्माण्डपुराणञ्च । उपबृंहणन्तु—'त्वमर्कस्त्वं सोमः—' इति शिवमहिम्नपद्यादौ । यावद्देवताविशेषाणां समष्टिः परमेश्वरः । अभियुक्तानां यत्र देवतापदेन व्यवहारः सः श्रौतः स्मार्तो वा देवतापदार्थं इति दिक् । विस्तरस्तु निरुक्तबृहद्देवतादिसन्दर्भतोऽवधेयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो योगिनां योगविभूतिसिद्धैर्
समाधिसिद्धान्तपथाधिरूढः ।
चतुर्विधप्राणिनिकायमूल-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥४॥

योऽनन्तखस्यापि गुरुर्गरीया-
नोऽश्मित्यहो ! व्यस्तसमस्तरीत्या ।
'खं ब्रह्म'पाठेन यजुष्ठमाप्त-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥५॥

यो देवपौरोगवतां प्रयातः
सूर्याश्रयात् तृप्तिकरः पितॄणाम् ।
आप्यायकः सर्वमहौषधीनां
तमष्टमूर्तिं शरणं प्रपद्ये ॥६॥

य उष्णताद्योत-खगर्क्षकेन्द्र-
मेकायनं मुक्तिपथोन्मुखानाम् ।
धामर्ग्यजुःसाममहोदयानां
तमष्टमूर्तिं शिवमेकमीडे ॥७॥

आत्मा य एको यत एव विष्वग्-
ब्रह्माण्डवैचित्र्यविकासभूमा ।
तमःप्रकाशादिविसर्गबीजं
तमष्टमूर्तिं सहशक्तिमीडे ॥८॥

तर्काग्नि(३६)तत्त्वनिलयं विलयं भ्रमाणा-
मानन्दसिन्धुसदनं कदनं कुसृष्टेः ।
एतन्महेश्वरपदस्तवनं हि यस्मिन्
ज्ञाते वसन्ततिलकायितविश्वमेतत् ॥९॥

इत्यष्टमूर्तिस्तोत्रम् ।

इति श्रीदुर्गाप्रसादकृतो दुर्गापुष्पाञ्जलिः समाप्त इति शिवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तपातालोपवर्णनम्

[निबन्धकः—श्रीवसन्तकुमार-रायविद्यारत्नः]

अवनेरप्यधस्तात् सप्तभूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ताः। अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति।

एतेषु बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्य्यानन्दभूतिविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहकामा मायाविनोदा निवसन्ति।

येषु महाराजमयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुर-सभा-चैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलङ्कृताश्चकासति।

उद्यानानि चातितरां मनइन्द्रियानन्दिभिः कुसुम-फलस्तबक-सुभग-किसलयावनत-रुचिरविटपविटपिनां लताङ्गालिङ्गितानां श्रीभिः समिथुनविविधविहङ्गजलाशयानाममलजलपूर्णानां झषकुलोल्लङ्घन-क्षुभितनीर-नीरज-कुमुद-कुवलय-कह्लारनीलोत्पल-लोहितशतपत्रादि-वनेषु कृतनिकेतनानामेकविहाराकुल-मधुर-विविधस्वनादिभिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि।

यत्र हि वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते।

यत्र हि महाहिप्रवरशिरोमणयः सर्व्वतस्तमः प्रबाधन्ते।

न वा एतेषु वसतां दिव्यौषधिरसरसायनाशनपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यं दौर्गन्ध्यं स्वेदः क्लमो ग्लानिरिति वयोऽवस्थाश्च भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ।

यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ।

अथातले मयपुत्रोऽसुरो तथैव निवसति । येन ह वा इह सृष्टाः षण्णवतिर्मायायाः काश्चनाद्यापि मायाविनो धारयन्ति । यस्य च जृम्भमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य इति । या वै विलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति । यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदान्ध इव ।

ततोऽधस्ताद् वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूयास्ते । यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण । यत्तच्चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति । तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ।

ततोऽधस्तात् सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः सधर्म्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ।

नो एवैतत् साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरेण समाहितमनसा सम्प्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ।

यस्य ह वाव क्षुत्पतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः कर्म्मबन्धनमञ्जसा विधुनोति। यस्य हैव प्रतिबाधनन्तु मुमुक्षवोऽन्यथैवोपलभन्ते। तद्भवतामात्मवतां सर्वेषामात्मन्यात्मद आत्मतमे च। नवै भगवान् नूनममुष्यानुजग्राह। यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्य्यमेवातनुतेति। यत्तद्भगवतानधिगतान्योपायेन याञ्चाच्छलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैः सम्प्रतिमुक्तो गिरिदर्य्यांञ्चापविद्ध इति होवाच।

नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेण आत्मानमयाचत आत्मनश्चाशिषो नो एव तद्दास्यम्। अतिगम्भीरवयसः कालस्य मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम्।

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वं पित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि। तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति।

यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयः। येनाङ्गुष्ठेन पदा दशकन्धरो योजनायुतायुतं दिग्विजय उच्चाटितः।

ततोऽधस्तात् तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता त्रिपुरारिणा त्रिलोक्याः शं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्य्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते।

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहक-तक्षक-कालिय-सुषेणादिप्रधाना महाभोगवन्तः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित् प्रमत्ता विहरन्ति।

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालकेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसा महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहत-बलावलेपा बिलेशया इव वसन्ति। ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्र-वर्णाभिरिन्द्राद्बिभ्यति।

ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्ख-कुलिक-महाशङ्ख-श्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महा-भोगिनो महामर्षा निवसन्ति, येषामु ह वै पञ्चसप्तदशसतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति। (श्रीमद्भागवते ५।२४)

विराड्देहतज्जीवतदन्तर्यामिणामभेदेनोपासनं कर्त्तव्यमित्या-शयेनाह—

पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥
द्वे जानुनी सुतलं विश्वमूर्त्ते-
रूरुद्वयं वितलञ्चातलञ्च।

(श्रीमद्भागवते २।१)

(२)

(विष्णुपुराणे २।५)

अतलं वितलञ्चैव नितलञ्च गभस्तिनम्।
महाख्यं सुतलञ्चोग्रं पातालञ्चापि सप्तमम्॥
शुक्लाकृष्णारुणापीता शर्कराशैलकाञ्चनाः।
भूमयो यत्र मैत्रेय! वरप्रासादमण्डिताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषु दानवदैतेया यक्षाश्च शतशस्तथा ।
निवसन्ति महानाग-जातयश्च महामुने ॥
स्वर्लोकादपि रम्याणि पातालानीति नारदः ।
प्राह स्वर्गसदां मध्ये पातालेभ्यो गतो दिवि ॥
आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः ।
नागैराभ्रियमाणासु पातालं केन तत्समम् ॥
दैत्यदानवकन्याभिरितश्चेतश्च शोभिते ।
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ॥
दिवार्करुचयो यत्र प्रभां तन्वन्ति नातपम् ।
शशिनश्च न शीताय निशि द्योताय केवलम् ॥
भक्ष्यभोज्यमहापान-मुदितैरतिभोगिभिः ।
यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः ॥
वनानि नद्यो रम्याणि सरांसि कमलाकराः ।
पुंस्कोकिलाभिलापाश्च मनोज्ञान्यपराणि च ॥
भूषणान्यतिरम्याणि गन्धाढ्यञ्चानुलेपनम् ।
वीणावेणुमृदङ्गानां स्वनास्तूर्य्याणि च द्विज ॥
एतान्यन्यानि चोदारभोग्यभोगानि दानवैः ।
दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः ॥
पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः ॥
योऽनन्तः पठ्यते सिद्धैर्देवो देवर्षिपूजितः ।
स सहस्रशिरा व्यक्तः स्वस्तिकामलभूषणः ॥
फणामणिसहस्रेण यः स विद्योतयन् दिशः ।
सर्वान् करोति निर्वीर्य्यान् हिताय जगतोऽसुरान् ॥
मदाघूर्णितनेत्रोऽसौ यः सदैवैककुन्तलः ।
किरीटी स्रग्धरो भाति साग्निः श्वेत इवाचलः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः ।
साभ्रगङ्गाप्रवाहोऽसौ कैलासाद्रिरिवोन्नतः ॥
लाङ्गलासक्तहस्ताग्रो बिभ्रन्मुषलमुत्तमम् ।
उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्त्तया ॥
कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः ।
सङ्कर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम् ॥
स बिभ्रच्छेखरीभूतमशेषं च्चितिमण्डलम् ।
आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः ॥
तस्य वीर्य्यं प्रभावश्च स्वरूपं रूपमेव च ।
न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि ॥
यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ।
आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति ॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोयाब्धिकानना ॥
गन्धर्व्वाप्सरसः सिद्धाः किन्नरोरगचारणाः ।
नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः ॥
यस्य नागवधूहस्तैर्गलितं हरिचन्दनम् ।
मुहुः श्वासानिलापास्तं याति दिक्चूदवासताम् ॥
यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः ।
ज्ञातवान् सकलञ्चैव निमित्तपठितं फलम् ॥
तेनेयं नागवर्य्येण शिरसा विधृता मही ।
बिभर्त्ति मालां लोकानां सदेवासुरमानुषम् ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तोत्सवः

[निबन्धकः—श्रीकालीचरणमिश्रः]

यद्यपि युगकालादिपरिच्छेदद्वारेण भारतीयराष्ट्रतन्त्रपरिणामप्रवाहोदन्तः शास्त्रत्वेन नोपनिबद्धो नो वा परिशीलित आसीत् पूर्वस्मिन् काले, अत एव भारतवर्षीयाणां प्राचीनेतिवृत्तदारिद्र्यं दुनोति साम्प्रतिकानां चेतांसि, तथाप्येतत् समर्थ्यादं दुरपह्नवप्रमाणबलेन च दृढतरं निरूपयितुं शक्यते यत्, सामाजिकपरिस्थितिविषये विद्याविनयधर्म्माचारादिविभवे लौकिकधनसम्पत्प्राचुर्य्ये इदं खलु भारतं वर्षं प्राचि काले समुत्कर्षकाष्ठापर्य्यन्तमध्यासीनमासीदिति। न केवलं साहित्यदर्शनादिविषय एव भारतीयानां नदीष्णता लोकविस्मयकर्य्यासीत्, अपि तु सुकुमारकलासु चतुःषष्टिसंख्ययाद्य यावत् साहित्यरसिकानामतिमात्रं प्रतीतासु भारतीयानां प्रावीण्यं स्वच्छन्दप्रचारं प्रववृत इत्यत्रापि नास्ति संशयलेशस्याप्यवकाशः। एतत्तु प्राचीनसाहित्यकृतप्रमाणामतिप्रकटमेव। ऐहिकधनसम्पत्समृद्ध्यात्यन्ततिरस्कृते लोकयात्राचिन्ताप्रसरे भूम्नानन्दपारिप्लवे च लोकसमाजे सलीलं समाजयात्रोत्सवादयः क्रियासमभिहारेण स्वतः प्रवर्त्तिता अभवन्। अद्यत्वेऽशक्यनिरूपणेऽपि प्राचीनानां संख्यामत्सरिणि समाजोत्सवे चित्रो वसन्तोत्सवः खलु सर्वेषां मूर्द्धन्यवास्थितेति निश्चप्रचमेतत्।

प्रतिवर्षं वसन्तकाले यदा प्रकृतिर्नानाविधमनोज्ञ-कुसुमविभूषिता, दिग्विभागाः पुलकितपरभृतध्वनिमुखरिताश्चूतवृन्चास्ताम्र-प्रवालस्तबकावनम्राः पुष्पितचारुशाखा नवीनमाधवीलतिका "मत्तद्विरेफपरिचुम्बितचारुपुष्पा मन्दानिलाकुलितनम्रमृदुप्रवालाः" शोभन्ते, यदा च "द्रुमाः सपुष्पाः, सलिलं सपद्मं, स्त्रियः सकामाः, पवनः सुगन्धिः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखाः प्रदोषा दिवसाश्च रम्याः"—सर्व्वमेव सर्व्वतश्चारुतरं भवति, तदास्य वसन्तमहोत्सवस्य सम्यगनुष्ठानावसरः।

वसन्तसमयः खल्वपूर्वमनोरमसौन्दर्य्येण चतुर्दिगामोदितविविध-मधुरसौरभेण च नूनं सकललोकचित्तचञ्चरीकानाकुलीकरोति। वसन्त-काले हि निसर्गशोभा मूर्त्तिमती। तथा च—

"आदीप्तवह्निसदृशैर्मरुतावधूतैः
सर्व्वत्र किंशुकवनैः कुसुमावनम्रैः।
सद्यो वसन्तसमये हि समाचितेयं
रक्तांशुका नववधूरिव भाति भूमिः॥"

अपि च—

"आकम्पयन् कुसुमिताः सहकारशाखा
विस्तारयन् परभृतस्य वचांसि दिक्षु।
वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविगमात् सुभगो वसन्ते॥"

इति कविचक्रवर्त्तिना कालिदासेनोपश्लोकितं वसन्तस्यानन्यसामान्यं कामनीयकम्।

यदा वसन्तसमागमे प्रकृतिदेवी वासांसि जीर्णानि विहायाभि-रामवसनभूषितास्ते, सुकुमार-कुसुमसौरभमयी वासन्ती वनराजिर्यदा धीरगतिमलयानिल-हिल्लोलस्य मृदुमन्दान्दोलनेन नर्त्तिता भवति, विहङ्गमराजकुलवसन्तदूतवृन्दं पुलकेन मधुरस्वरेण पञ्चमतानेन गायति, मधुलोभिनो मधुपा भृङ्गाश्च नवोद्भिन्नकिसलयदलानजस्रं विकम्पय्य समन्ततो विचरन्ति, तदैव खलु नागा नागरिकाश्च चूताङ्कुर-नवोद्गमालोकजनितौत्सुक्येनोत्सवदिवसागमनप्रतीक्षया कथं कथमपि कालं नयन्ति।

अस्मिन् वसन्तोत्सवे जनाः सर्वत्रासुक्तमौक्तिकसौवर्णालङ्काराः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सानन्दं सञ्चरन्ति । "मधुरमभिहन्यमानमृदुमृदङ्गानुगतसङ्गीतमधुरः" सर्वत्र जनानामुच्चरति चर्च्चरीध्वनिः । समन्ततः स्वच्छन्दमर्दलोद्दाम-शब्दमुखरितानि रथ्यामुखानि । प्रकीर्णानि च सर्वतः कुसुमपरागात् तण्डुलचूर्णानि सर्व्वाङ्गनद्धाभरणानां रमणीनां हेमालङ्कारा अतीव रमणीयपीतरागप्रभामुद्गिरन्ति । सर्व्वः प्रदेशः पीतवर्णमयो दृश्यते । कुत्रचिद्वा प्राङ्गणे सुदर्शनकुट्टिमः सिन्दूरपातेन नितरां लोहितः सञ्जातः । धारायन्त्रनिर्मुक्तसलिलशीकरैः सर्वं सिक्तं परिलक्ष्यते । कौसुम्भरागरञ्जितवेषा जनास्तत्र परस्परं सुखेन संक्रीडमाना दृश्यन्ते, कुत्रचिद् वा "वर्णोदकैः काञ्चनशृङ्गमुक्तैः" परिप्लुते पाददलनोत्पन्नेन कर्दमेन कृतक्रीडे प्राङ्गणे यास्ति स्थली तामुल्लासमत्तानां रमणीनां कपालच्युतसिन्दूररक्तिम्ना लोहितैश्चरणैर्जनाः सिन्दूरवर्णां कुर्वन्ति । गलिताङ्गरागैरवरोधैर्विगाह्यमानः "सन्ध्योदयः साभ्र इवैष वर्णं पुष्य-त्यनेकं" सलिलधारः । कुत्रचित्—

"तीरस्थली बर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम् ।
श्रोत्रेषु संमूर्च्छति रक्तमासां गीतानुगं वारि मृदङ्गवाद्यम् ॥"

क्वचिच्च—

"एताः करोत्पीडितवारिधारा दर्पात् सखीभिर्वदनेषु सिक्ताः ।
वक्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान् वारिलवान् वमन्ति ॥"

कुत्रचन पिष्टातकचूर्णैर्दिङ्मण्डलं छादितमकालसन्ध्याविर्भाव-विभ्रमसुत्पादयति । तरुणीनां रत्नालङ्कारमयूखस्यन्दिप्रभाजालेन कथञ्चिदालोकिते दिग्वलये शृङ्गयन्त्रसनाथा विटा अस्पष्टं दृश्यन्ते । कामिनीजना मदनपरवशा वेषं वहन्त्योऽभिनवं मदनलीलां सर्वत्र खलु नाटयन्ति द्विपदीखण्डञ्च गायन्ति । निपीय सुरां नार्य्योऽपि मत्ततां गच्छन्तितमाम् । तण्डुलमोदकादिभिर्विविधभक्ष्यैश्च वसन्तोत्सवोपायनं सर्वत्राभीक्ष्णं दीयते । सर्वेषामेव जनानां वसन्तविजयघोषणाव्यप-देशेन हर्षकलकलो गगनप्राङ्गणे भृशं ध्वनितो भवति । अहो !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदयोल्लासकराणीमानि सुदृश्यानि। इदानीमपि प्रत्यच्चायन्ते सुकौ-शलचित्रितान्येतान्युद्दामदृश्यान्यस्य महोत्सवस्य।

मन्मथः खलु वसन्तोत्सवस्याधिष्ठात्री देवता। अतो वसन्तोत्सवोऽनङ्गदेवपूजाविधानहेतोर्मदनमहोत्सव इत्याख्यया लोके प्रचारित आसीत्। पुराणेषु मधुमासस्य शुक्लत्रयोदश्यां यो मदनस्योल्लेखो दृश्यते तस्यैव खलु नाम मदनोत्सव इति। वसन्तसमागमेऽस्यानुष्ठानाद्वसन्तोत्सव इति नाम्नापि कीर्त्त्यतेऽयम्। उत्सवदिवसे सङ्गीत-सुराकर्पूरकुङ्कुमचोदगन्धताम्बूलादिविलाससामग्रीप्रभावेण सहृदय-ऋतुराजेन सह रतिपतिर्ध्रुवमेवोज्जीवित इव प्रतिभाति। तद्धि—

"रम्यप्रदोषसमयः स्फुटचन्द्रहासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः।
मत्तालियूथविरुतं निशि सीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य॥"

अपरञ्च—

"आम्रो मञ्जुलमञ्जरी वरशरः सत्किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम्।
मत्तेभो मलयानिलः परभृतो यद्वन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः॥"

कठोरतपसि स्थिते सति सतीपतौ सतीप्रयाणानन्तरं व्यत्ययः सृष्टिकार्य्यस्य स्यादेवेति ब्रह्मप्रमुखा द्युषदः प्रियसहचरेण मधुनानुप्रयातस्य मनोभवस्य साहायकं प्रतिपद्यमाना देवादिदेवस्य विधाय तपोभङ्गं सर्गरक्षायां यतमाना आसत। भस्मीभूतदेहो बभूव रतिपतिर्हरकोपाग्निना। ततो रतिशोकावलोकनजातानुकम्पायाः पार्वत्या अनुरोधेन सुप्रसन्न आशुतोषो मधुमासि लोकमध्ये मदनपूजाप्रचलन-विधानेनानुगृहीतवाननङ्गम्। तथा च भविष्यपुराणे श्रीकृष्ण-युधिष्ठिरसंवादे मदनपूजाया मदनमहोत्सवस्य चोल्लेखो दृश्यते। अस्येत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वोल्लेखस्योपक्रम एतन्नामास्माकीनं नयनपथमापतति। कृष्ण उवाच—

गौरीविवाहाज्जग्राह हरः पाशुपतं व्रतम्।
उमापतिः पशुपतिर्ध्यानासक्तो बभूव ह॥
ब्रह्मादिभिस्तु सम्मन्त्र्य विबुधैः पुत्रलब्धये।
गौर्य्या मनोभिलषितपूर्णाय च प्रहर्षितैः॥
प्रहितः क्षोभणार्थाय समर्थ इति मन्मथः।
ततो मारः स्मरः कामो व्याजगाम तदाश्रयम्॥
रतिप्रीतिमदोन्मादवसन्तस्त्रीसहायवान्।
विधानवारुणीदीर्घशृङ्गारैः परिवारितः॥
आम्रपुन्नागकमलमालतीकृतशेखरः।
वीणामृदङ्गसङ्गीतकोकिलाभृङ्गगीतिकम्॥
सुमनश्चापमासज्य मदनोन्मादकं शरम्।
चिक्षेप त्रिपुरघ्नाय समाधिभङ्गहेतवे॥
बुद्ध्वा तस्य स सङ्कल्पं रुद्रः क्रुद्धो ज्वलद्रुषा।
ललाटादग्निमसृजत्तृतीयनयनाद्धरः॥
कामोऽवलोकितस्तेन भस्मभूतस्ततः क्षणात्।
दग्धं दृष्ट्वा स्मरं शोके रतिप्रीतिर्हिते तदा॥
करुणं विललापाथ सर्वमन्यदिशो गतम्।
ततः शोकार्द्रहृदया गौरी रुद्रमुवाच ह॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ছান্দোগ্যমন্ত্রভাষ্যম্

ভট্ট-গুণবিষ্ণুপ্রণীতম্

শ্রীদুর্গামোহনভট্টাচার্য্য-কাব্য-সাংখ্য-পুরাণতীর্থ, এম্.-এ.

সম্পাদিতম্

সামবেদীয় গৃহ্যকর্ম্মে প্রযোজ্য বৈদিক মন্ত্রগুলির "গুণবিষ্ণু-টীকা" বাঙ্গালা ও মিথিলাপ্রদেশে সুপ্রসিদ্ধ। কালক্রমে এই টীকার হস্তলিখিত পুথিগুলি অত্যন্ত ভ্রমপ্রমাদ-পরিপূর্ণ হইয়া পড়িয়াছে। এইরূপ অবিশুদ্ধ আদর্শ পুথি অবলম্বনে "গুণবিষ্ণু-টীকা" বা ছান্দোগ্যমন্ত্রভাষ্যের কিয়দংশ কয়েক বার দশকর্ম্ম-পদ্ধতির পাদটীকারূপে মুদ্রিত হইয়াছিল; এইবার ইহা **বহু আদর্শ-পুস্তক অবলম্বনে এবং মুদ্রিত ও অমুদ্রিত নানাবিধ বৈদিক গ্রন্থের সহায়তায় বিশুদ্ধরূপে এবং সমগ্র-ভাবে সংস্কৃত-সাহিত্য-পরিষৎ হইতে প্রকাশিত হইল।**

ইহাতে **বিবাহ, অন্নপ্রাশন, চূড়াকরণ, উপনয়ন** প্রভৃতি **দশবিধ সংস্কারে**; স্নান, সন্ধ্যা, শ্রাদ্ধ প্রভৃতি নানাবিধ গৃহ্যকর্ম্মে আবশ্যক মন্ত্রগুলি অতি সরল ভাবে ব্যাখ্যাত হইয়াছে।

গ্রন্থের প্রারম্ভে এলাহাবাদ বিশ্ববিদ্যালয়ের ভাইস্-চ্যান্সেলর **মহামহোপাধ্যায় ডাঃ শ্রীযুক্ত গঙ্গানাথ ঝা** মহাশয় লিখিত ইংরাজী মুখবন্ধ সন্নিবেশিত হইয়াছে। তৎপর অতি বিস্তৃত ইংরাজী ভূমিকায় সম্পাদক মহাশয় গুণবিষ্ণু ও তাঁহার ভাষ্যসম্বন্ধে বহু বিষয়ের আলোচনা করিয়াছেন এবং গুণবিষ্ণুর বঙ্গীয়ত্ব ও সায়ণাচার্য্য অপেক্ষা প্রাচীনত্ব প্রমাণ করিয়াছেন।

এই গ্রন্থের সাহায্যে হিন্দুগণ বিশুদ্ধভাবে মন্ত্র উচ্চারণ করিতে পারিবেন। মন্ত্রার্থ অবগত হইতে পারিলে, গ্রন্থসন্নিবিষ্ট **সূচীপত্র ও পরিশিষ্ট**-সাহায্যে মন্ত্রগুলির আকরস্থান ও বিনিয়োগপ্রমাণ জানিয়া তদ্বিষয়ে নিঃসন্দেহ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

হইতে পারিবেন। বিভিন্ন বৈদিক গ্রন্থ হইতে সংগ্রহ করিয়া প্রতি মন্ত্রের মূল এবং গৃহসূত্র হইতে তাহার বিনিয়োগ প্রদর্শিত হইয়াছে।

এই গ্রন্থ দেশে বিদেশে সর্ব্বত্র প্রশংসিত হইয়াছে। **প্রত্যেক আনুষ্ঠানিক হিন্দুর পক্ষে ইহা পরম উপযোগী।**

প্রাপ্তিস্থান—সংস্কৃত-সাহিত্য-পরিষৎ
শ্যামবাজার, কলিকাতা।

মূল্য—৩৸০
সভ্যপক্ষে—৩৲

মঞ্জু-ভাষিণী

ইয়মেকৈব জগতি সংস্কৃতভাষাময়ী 'সামাহ্নিকী' বৃত্তান্তপত্রিকা। সংস্কৃতভাষা-গ্রন্থ-প্রকাশকানাম্ অনুত্তমং বিজ্ঞাপনসাধনম্। সর্ব্বদেশেষু প্রচলতি।

ভারত-ব্রহ্মদেশ-লঙ্কা-বাসিভির্দেয়ং বার্ষিকং মূল্যম্—২·০·০ ; অন্যদেশীয়ৈর্দেয়মূল্যং ৫ শিলিংস।

মৈনেজর—মঞ্জুভাষিণী
CONJEEVERAM (Madras.)

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishad, Shyambazar, Calcutta
Printed at
Siddheswar Press,
39/2, Shibnarayan Das's Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

Vol. XIV, No. 4.] [August, 1931.

१८५२ शकीये श्रावणे १४श-वर्षस्य ४र्थ-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री, एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—२) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishad, Shyambazar, Calcutta

Printed at
Siddheswar Press,
39/2, Shibnarayan Das's Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকা[লে] কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মা[থায়] মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা, প্রভৃতি উপসর্গ বিদূরিত হ[য়।] দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থের গৃহেও কেশরঞ্জনের সমাদর। আপনি ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়া[ছে,] অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জী[বন] রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মা[ন] (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারি[ত] হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বল[তা] নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔ[ষধ] অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজ শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভ[ক্ত।] অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষে[ও] এই কথানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগে[র] নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎ[সা,] দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণ বিবরণ, রোগীর পরিচর্য্যা এ[বং] দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

প্রাপ্তিস্থান—

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रविः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

August, 1931.	१८५३ शकीये श्रावणे १४वर्षस्य ४र्थ-संख्या	Vol. XIV. No. 4.

पदमञ्जरीकारो हरदत्तः *

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥

विदितमेवैतत् प्रायेण पारिषद्यानामशेषाणां यद् दीप्यमानेऽपि प्रमाणमूर्धन्यभूते महाभाष्यभास्करे "उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्रः" इति न्यायमवलम्ब्य मन्दात्मानुजिघृक्षया पण्डितप्रकाण्डाभ्यां जयादित्यवामनाभ्यां निरमायि काशिकाख्या सुमनोहरा व्याख्या पाणिनिसूत्राणाम्। कालक्रमेण च काशिकापि व्याख्यासापेक्षा संवृत्ता । तत्र प्रथमं जिनेन्द्रबुद्धिना भिक्षुप्रवरेण न्यासापरनामा काशिकाविवरणपञ्जिका प्राणायि, ततश्च केषुचिच्छतकेषु व्यतीतेषु, हरदत्ताभिधानेन प्रामाणिकप्रवरेण पदमञ्जरी-

* परिषदो मासिकाधिवेशने वाचितोऽयं निबन्धः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाख्या व्याख्या व्यरचि। प्रबन्धेऽस्मिन् हरदत्तमिश्राणामवस्थिति-समयादीनि विचार्य्यन्ते।

महात्मासौ स्वजनुषा द्रविडदेशं मण्डयामासेति पदमञ्जरीत एव स्फुटीभवति। तत्र भीह्रीभृहुमदजनेतिसूत्रस्थवामनवचनव्याख्या-प्रसङ्गेनोक्तम्—"लिट्शब्दस्तु वृत्तिकारदेशे जुगुप्सितः, यथात्र द्राविडदेशे निविशब्दः।" पदमञ्जर्य्याः प्रारम्भेऽपि संज्ञाविचारप्रसङ्गे विलिखितम्—"याः पुनर्देशभाषाभिः संज्ञाः कुचिमञ्चीप्रभृतयो न तेषां साधुत्वम्।" कुचिमञ्चीप्रभृतयश्च संज्ञा द्राविडदेश एवोपलभ्यन्ते। तत्रत्यस्य च तैलङ्गाभिजनस्य कविवर्य्यस्य कुचिमञ्चीति नामासीत्।

पिता चास्य पद्मकुमारः, माता च श्रीदेवी, आचार्य्यश्चापराजितः; यथोक्तं पदमञ्जरीमङ्गलाचरणश्लोके—

तातं पद्म*कुमाराख्यं† प्रणम्याम्बां श्रियं तथा।
ज्येष्ठं चाग्निकुमाराख्य†माचार्य्यमपराजितम्॥
यश्चिराय हरदत्तसंज्ञया विश्रुतो दशसु दिक्षु दक्षिणः।
उज्जहार पदमञ्जरीमसौ शब्दशास्त्रसहकारपादपात्॥

एतस्य वैदिकलौकिकाखिलशास्त्रपारदृश्वत्वं पदमञ्जर्य्येव पदे पदे प्रत्याययति। तथाहि वैदिकप्रक्रियाव्याख्याने स्वरसूत्रव्याख्याने च संहितातो ब्राह्मणतश्च समुद्धृता बहवो मन्त्राः, बह्वृचानां तैत्तिरीयाणां सम्प्रदायभेदोऽपि बहुश उपप्रदर्शितः। तत्र तत्र च भाट्टानां मतं समुपनिबद्धं, शबरस्वामिनश्च वचनं समुद्धृतम्। कालिदास-भट्टि-भारवि-माघविरचितानि पद्यानि कुत्रचिदुदाहरणरूपेण कुत्रचित् पुनर्दोषो-द्धारणप्रसङ्गेनोपन्यस्तानि। तथाहि, "उपसर्गस्यायतौ" [८।२।१९]

---

* अत्र रुद्रेति पाठान्तरम्।

† आख्यमित्येतस्य स्थाने सर्वत्र आर्य्यमिति पाठान्तरमुपलभ्यते, तेन Iyer उपनामानो द्रविडब्राह्मणा एते इति प्रतिभाति इति केचित्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यत्रोक्तं "कथं तर्हि 'उदयति विततोर्ध्वरश्मिरज्जावि'ति परस्मैपदम्। किमनेन वन्यगजशौचेन‡। यदि वा पचाद्यजन्तादुदयशब्दादाचारे क्विपि लट्, केचित्तु इट किटी गतावित्यत्र इकारमपि धातुं पठन्ति" इति। "पुनरपि पाय्यसान्नाय्य—" [३।१।१२०] इत्यत्र "ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति विहितयोर्दधिपयसोः संज्ञेयम्। माघस्तु यथाश्रुतार्थग्राही हविर्मात्रे प्रयुङ्क्ते—'हुतमयमवलीढे साधु सान्नाय्यमग्नि'रिति।"

एतदेव प्रपञ्चितं दीक्षितचरणैः शब्दकौस्तुभे—"सान्नाय्यं हविर्विशेषः। सम्यङ् नीयते होमार्थमग्निं प्रतीति सम्पूर्वान्नयतेर्ण्यदायादेशौ उपसर्गदीर्घत्वञ्च निपात्यते। ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोऽमावास्यायाम् इति विहितयोर्दधिपयसोः संज्ञेयम्। माघस्तु यथाश्रुतग्राही हविर्मात्रे प्रायुङ्क्त।—

प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामिधेनीरधीत्य।
कृतगुरुदुरितौघध्वंसमध्वर्युमुख्यै-
र्हुतमयमवलीढे साधु सान्नाय्यमग्निः॥ [११।४१] इति।

नन्विदमपि दधिपयोविषयकं किं न स्यादिति न वाच्यम्। चन्द्रोदयास्तमयवर्णनपूर्वकं सूर्योदयं प्रक्रम्य पठितस्यास्य कृष्णप्रतिपद्विषयत्वेन तत्र दधिपयोयोगस्यासम्भवात्। हविर्विशेषवाचकस्य सामान्ये विशेषान्तरे वा लक्षणेत्यपि बोध्यम्।"

न्यासकारो भागवृत्तिकारश्च कुत्रचिन्नामतो निर्दिष्टौ बहुत्र पुन'रपर आह' इत्यादिवचनपुरःसरं तन्मतमेव प्रदर्शितम्। अन्तरान्तरा चानयोरुपर्य्याक्षेपोऽप्युपलभ्यते। तथाहि "अपरिमाणविस्ताचिते"-त्यादिसूत्रे [४।१।२२] न्यासकारस्य मतं नामनिर्देशपुरःसरं समुद्धृतम्।

‡ एतेन "अपशब्दशतं माघे" इति कस्यचिदुक्तिः स्मार्य्यते। "अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम्" इति माघवचनमपि स्मृतिपथमारोहति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"इणो यण्"त्यत्र न्यासकृतोक्तम्—अथ नेण इत्येव कस्मान्नोक्तम्? इयङादेशेऽचि प्रतिषिद्धे सति इको यणचीति यण् भविष्यति। सत्यमेतत्। उत्तरार्थन्तु यण्ग्रहणम्।

एतदुपरि हरदत्तेनोक्तम् "इणो यण्" इत्यत्र अथ इणो नेत्येव कस्मान्नोक्तम्, इयङादेशे हि प्रतिषिद्धे इको यणचीत्येव भविष्यति। अहो सूक्ष्मदर्शी देवानांप्रियः, यदिदमपि न दृष्टम् ईयिव, ईयिम, कर्मणि ईयिशे। अत्रेयङि प्रतिषिद्धे सवर्णदीर्घः स्यात्, तस्माद् यणेव विधेयः।

भागवृत्तिकृतां मतं नामोल्लेखपूर्वकं स्थानचतुष्टये समुपनिबद्धम्। तद्यथा—(१) णेरणाविति सूत्रे [१।३।६७] इह तर्हि आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति हस्तीति किं पुनरत्र नेष्यते। वृत्तिकृता नेष्यते, भागवृत्तिकारेण त्विष्यते। तथा माघः प्रयुङ्क्ते—करेणुरारोहयते निषादिनमिति।

(२) "यस्य चायामः" [२।१।१६] इति सूत्रे अनुगङ्गं वाराणसीति। षष्ठ्यन्तेन गङ्गाशब्देन समासः। गङ्गाया अन्विति। आयामो लक्षणं चानुना द्योत्यते। लक्षणस्य लक्ष्यापेक्ष्यत्वाल्लक्ष्यं समासार्थ इत्यर्थादुपमानोपमेयभावे समास इति वाराणस्या सामानाधिकरण्यम्। गङ्गाया इवायामो यस्याः, गङ्गेवायता वाराणसीत्यर्थः। तद्वदत्यन्तायतेत्यर्थ इति केचित्। तथा चानुगङ्गमेतत् सूत्रमित्येकशेषसूत्रे भागवृत्तिकारः प्रयुङ्क्ते। नेति वयम्। किं प्रागायता वाराणसी, उतोदगायतेति सन्देहे इदमुच्यते—अनुगङ्गं वाराणसीति। यथोदगायता गङ्गा तथोदगायता वाराणसीत्यर्थः। गङ्गायामानुसारेण वाराणस्यायाम इत्यर्थः।

(३) "किमोऽत्" [५।३।१२] इति सूत्रे [त्रलमपि केचिदिच्छन्ति। कुत्र। तत् कथम्? उत्तरसूत्राद्वावचनं पुरस्तादपकृष्यते।—काशिका]। किमोद्धेति सूत्रं पठितव्यं ह च छन्दसीत्यत्र चकारेण त्रतलोः समुच्च-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यादिष्टसिद्धिरिति तेषां भावः। भागवृत्तिकारस्तु भाषायामितन्नेच्छति *।

(४) [अनभ्यासस्य इत्येव। जुगुप्सिषते। लोलूयिषते।—सन्यङोः ६।१।८ इत्यत्र काशिका।] भागवृत्तिकारस्त्वाह पूर्वसूत्रे ["लिटि धातोरनभ्यासस्य" इत्यत्र] "धातोः" "अनभ्यासस्य" इति द्वयमपि प्रत्याख्याय भाष्यकारेणोक्तम्—तिष्ठतु तावत् साभ्यासिकं धातुग्रहणमिति, उत्तरार्थमिति भावः। अनभ्यासग्रहणस्य तु न किमपि प्रयोजनमुक्तम्, ततश्चोभयार्थमपि तन्न भवतीति भाष्यकारस्याभिप्रायो लक्ष्यते, तेनात्र भवितव्यमेव द्विर्वचनेन। †

काशिकाप्रणेत्रोर्जयादित्यवामनयोर्मतविशेषाश्च तत्र तत्र निपुणं प्रदर्शिताः। तथाहि—

(१) "णेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने" [पा० १।३।६७] इत्यत्रोक्तम्—

प्रयोगाणान्तु निर्वाहो णिचश्चेत्यात्मनेपदात्।
जयादित्यस्य हृदयं गूढमेतत् प्रकाशितम्॥

(२) "नित्यं क्रीडाजीविकयोः" [पा० २।२।१७] इत्यत्र 'तृच् क्रीडाजीविकयोर्नास्ती'ति काशिकापङ्क्तिमुद्धृत्योक्तम्—

वामनस्तु "अके जीविकार्थे" [पा० ६।२।७३] इत्यत्र 'अके इति किम्? रमणीयकर्त्ता' इति जीविकायां तृचं प्रत्युदाहरिष्यति। स मन्यते मा भूत् क्रीडायां तृच्, लक्षणाभावात्; जीविकायां तु "ण्वुल्-

---

* तथा च संक्षिप्तसारटीकायां गोयीचन्द्रः क्तमपि केचिदिच्छन्तीति जयादित्यः। कुत्र क्व इति रूपद्वयं चन्द्रस्याभीष्टम्; कुत्रेत्यस्मार्तमिति भागवृत्तिः (सुबन्तपादः ३२१)।

† यद्यपि भागवृत्तिकृन्मतानि बहुत्र व्याकरणग्रन्थेषु समुद्धृतान्युपलभ्यन्ते तथापि चिराय प्रनष्टेयं वृत्तिरिति विषादास्पदमस्माकम्। एतद्विषये विस्तरेण विचार आश्विनसंख्यायां प्रकाशयिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृचौ" [पा० ३।१।१३३] इति ण्वुलिव तृच् कस्मान्न स्यादिति; अन्ये तु तदनुसारेणेदमप्येवं व्याचक्षते क्रीडाजीविकयोर्नास्तीति द्वयोर्नास्ति किन्त्वन्यतरत्र वेत्यर्थः। *

(३) "स्यतासी लृलुटोः" [पा० ३।१।३३] इत्यत्रोक्तम्—

"मन्ता सङ्क्तेति।" कोऽर्थः? मन्तेत्येतत् पदं सङ्गतस्यविष्यतीत्यर्थः, न तु सङ्क्तेत्येतदुदाहरणमनोपधत्वात्। अनुस्वारपरसवर्णयोः कृतयोरपि तयोरसिद्धत्वादनोपध एव। अन्ये त्वाहुः—यद्यसिद्धत्वात् सङ्क्तेत्येतदनुदाहरणम्, मन्तेत्यप्युदाहरणं न भवति, तत्रापि टिलोपस्याभीयस्यासिद्धत्वाद् मन्तास् आ इति स्थिते नकार उपधा न भवतीति। यदि मतम्भाभाच्छास्त्रीयमसिद्धत्वमनित्यम्, स्नसोरल्लोप इति तपरकरणात्, तद्ध्यास्तामासन्नित्यादौ मा भूदित्येवमर्थं तत्राटोऽसिद्धत्वादेव नलोपो न भविष्यति, किं तन्निवृत्त्यर्थेन तपरत्वेन तज्ज्ञापयत्यसिद्धत्वमनित्यमिति, तेन देभतुर्देभ्युरित्यत्र श्रन्थिग्रन्थिदम्भि-

---

* तथा च "नित्यं क्रीडाजीविकयोः" इत्यत्र शब्दकौस्तुभे भट्टोजिः—तत्र क्रीडायां विकल्पे प्राप्ते जीविकायां "कर्तरि च" [२।२।१६] इति निषेधे प्राप्ते वचनम्। जयादित्यस्तु "तृजकाभ्याम्—" [२।२।१५] इति सूत्रे 'कर्तरीत्येतद् अनुवृत्तायाः षष्ठ्या विशेषणम्; तृजुत्तरार्थः' इत्युक्त्वा "कर्तरि च" इति सूत्रे कर्तृग्रहणं तृजकयोर्विशेषणतया व्याख्याय नित्यं क्रीडे"ति सूत्रे अकप्रत्ययमेवोदाजहार। तत्रेदं वक्तव्यम्। प्रथमसूत्रे कर्तृग्रहणं तृजकयोरेव विशेषणं युक्तम्, तयोः श्रुतत्वात्; न तु षष्ठ्याः। एवं च तृजुत्तरार्थ इत्यपि न कल्प्यम्। अकस्येव चोत्तरत्रानुवृत्तिर्न तु तृचः, असम्भवात्, तथा च सूत्रद्वयस्य व्यत्ययेनार्थ उचित इति। वामनस्तु "अके जीविकार्थे" [६।२।७३] इति सूत्रे 'अक इति किम्? रमणीयकर्त्ता' इति जीविकायां तृचं प्रत्युदाजहार। तस्यायमाशयः। मा भूत् क्रीडायां तृच्, लक्षणाभावात्; जीविकायान्तु "ण्वुल्तृचौ" [३।१।१३३] इति ण्वुलिव तृजपि सुलभ एवेति। एतन्मते नित्यं क्रीडेत्यत्र तृज्ग्रहणासम्बन्धे शङ्कावारणार्थं तृजर्थं इत्यादि कुहस्यादरणमित्याहुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्रञ्जीनामिति लिटः कित्वान्नलोपे तस्यासिद्धत्वाभावादेत्वाभ्यासलोपौ भवतः, तदत्र टिलोपस्यासिद्धत्वाभावाद् मन्त् आ इति स्थिते उपधैव नकार इत्युदाहरणमिति। यद्येवं पूर्वत्रासिद्धीयमसिद्धमप्यनित्यम्, "नसु ने" इत्यत्र नेति योगविभागात्, तथा चैकादेशस्वरोऽन्तरङ्गः सिद्धो भवति, सिज्लोप एकादेशे सिद्धो भवति, निष्ठादेशः षत्वादिषु सिद्धो भवति, द्विर्वचनविषये च पूर्वत्रासिद्धीयं न भवति ततश्चानुस्वार-परसवर्णयोः सिद्धत्वात् सङ्गन्तेत्येतदप्युदाहरणमेवेति। अन्ये तु संहन्तेति पठन्ति। हन्तेर्भावकर्मणोरित्यात्मनेपदम्। तत्र संपूर्वस्य पाठे प्रयोजनं मृग्यम्। *

---

* "तासेरिकार इत्संज्ञक" इति जयादित्यः। तथाहि मन्ता हन्ता इत्यत्र मन् तस् आ हन् तास् आ इति स्थिते टिलोपे कृते डाप्रत्ययं प्रति तान्तमङ्गं तस्य उपधा नकारः, तस्य 'अनिदिताम्'इति लोपः प्राप्तः तं वारयितुं तासेरिदित्त्वमेषितव्यम्। न चाभीयत्वेन टिलोपस्यासिद्धत्वाद् नकार उपधा नेति वाच्यम्, आभात्सूत्रस्य भाष्ये प्रत्याख्यानात्, तन्मतेऽपि आभीयस्यासिद्धत्वस्यानित्यत्वाच्च। तत्र च श्नसोरल्लोप इति तपरकरणं लिङ्गम्। तद्धि आस्ताम् आसन् इत्यादौ मा भूदित्येवमर्थम्। तत्राटोऽसिद्धत्वादेव लोपाप्रसक्तौ तपरत्वं व्यर्थं सद् असिद्धत्वस्यानित्यतां ज्ञापयति। तेन देभतुर्देभुरित्यत्र श्रन्थिग्रन्थि-दन्भिस्वञ्जीनां लिटः कित्त्वान्नलोपे तस्यासिद्धत्वाभावाद् एत्वाभ्यासलोपौ स्तः। एवञ्चेहापि टिलोपस्यासिद्धताविरहे प्राप्तो नलोप इदित्त्वेन वार्यते। न चैवं नुम्विधौ धातुग्रहणस्य तासिव्यावृत्त्या कृतार्थत्वेन धातूपदेशावस्थायामेव नुम् भवतीत्ययमर्थो न साधितः स्यादिति वाच्यम्। नुम्विधावुपदेशिवद् वचनं प्रत्ययसिद्ध्यर्थमिति वचनस्यैव शरणीकरणात्, धिन्विकृण्वोरिति सनुम्कनिर्देशाज्ज्ञापकाद्वा॥ वामनस्तु तासेरिकार उच्चारणार्थ इत्याशयेन "इदितो नुम् धातु"रिति धातुग्रहणं धातूपदेशावस्थायामेव नुम् यथा स्यादित्येवमर्थं मन्यते। तन्मते मन्ता हन्तेत्यत्र टिलोपस्यासिद्धत्वान्नलोपो नेति बोध्यम्।" इति "स्यतासी लृलुटो"रित्यत्र शब्दकौस्तुभे भट्टोजिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"एवं तावज्जयादित्येनासिद्धत्वमनित्यमाश्रित्य तासेरिदित्करण-मनुनासिकलोपप्रतिषेधार्थमित्युक्तम्। वामनस्तु टिलोपस्य सिद्धत्वा-देव नलोपो न भविष्यतीति मन्यमानः "इदितो वा" [पा० ७।१।५८] इत्यत्र वक्ष्यति—तासिसिचोरिदित्कार्य्यं नास्तीत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते इति, यदि तु तासेरिकारोऽनुबन्धः स्यात् ततो नुम्विधौ धातोस्तासेर्माभूदित्येवमर्थं स्यात्, ततश्च धातू-पदेशावस्थायामेव नुम् भवतीत्ययमर्थो न साधितः स्यादिति तस्याभि-प्रायः। जयादित्यस्तु नुम्विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्थमिति वचनमेव शरणमाशिश्रियत्।" *

(४) "ऋत्विग्दधृग्—" [पा० ३।२।५९] इति सूत्रे "नलोपः कस्मान्न भवति? निपातनसाहचर्य्यात्" इति जयादित्यवचनं व्याच-क्षाणेन पक्षान्तरमप्युपन्यस्योक्तम्—"तदेतत् "चोः कुः" [८।२।३०] इत्यत्र वामनो वक्ष्यतीति। †

(५) "आभीक्ष्ण्ये णमुल् च" [पा० ३।४।२२] इत्यत्र आभीक्ष्ण्ये द्वे भवत इत्युपसङ्ख्यानाद् द्विर्वचनम् इति वृत्तिकारवचन-विषये उक्तम्—

(क्रमशः)

---

* तथाच "हनः सिच्" [१।२।१४] इति सूत्रस्थशब्दकौस्तुभे भट्टोजिः— "जयादित्यस्तु सिच्तास्योरिदित्करणमनुनासिकलोपप्रतिषेधार्थमित्याह। तन्मते धातुग्रहणस्य तद्व्यावृत्त्या कृतार्थत्वाद् "नुम्विधावुपदेशिवद्वचनं प्रत्यय-सिद्ध्यर्थम्" इति वचनमेव शरणीकरणीयम्" इति।

† "अत्र केचित्—क्रुञ्चिरेक एव धातुः। तस्य ककारात् परो रेफोऽपि क्विन्सन्नियोगेन निपात्यते इत्याहुः। "चोः कुः" इति सूत्रे वामन-काशिकायां स्पष्टमेतत्" इति शब्दकौस्तुभे [३।२।५९] भट्टोजिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याप्रस्थानम्

[निबन्धकः—कालीवट्टवास्तव्यः श्रीगुरुपदहालदारः]

सांख्यप्रवचनमपि भगवता सांख्यवृद्धेन कपिलेन किल प्रणीतम्। तत्र त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इत्यादिनिर्णयार्थं षडध्यायाः सन्ति। ननु, तत्त्वसमासाख्यैः सूत्रैः सांख्यप्रवचनस्य पौनरुक्त्यमिति चेत्? न, संक्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्यात्। अत एव योगदर्शनस्येव षडध्याय्या अपि प्रवचनसंज्ञा युक्ता। तत्त्वसमासे हि यत् संक्षिप्तं तस्यैव प्रपञ्चः सांख्यप्रवचनमित्यवधारणात्।

भोगेष्वलंप्रत्ययवत उदासीनस्य विषयव्यापारेभ्यो व्यावृत्तं मनो यदा साक्षात्कर्त्तव्ये परमे वस्तुनि तन्निष्ठं भवति, तदा स एव योगः। हठलयादिभेदेन स च बहुविधोऽस्ति। तत्र हिरण्यगर्भेण राजयोग उक्तः। तथा हि याज्ञवल्क्यस्मृतिः—

हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातन इति।

ननु, यदि भगवता हिरण्यगर्भेण योगशास्त्रमुक्तं तर्हि कथं पतञ्जलिस्तदेव प्राणैषीत्? श्रुतिस्मृतिपुराणादिषु योगस्य विप्रकीर्णतया दुर्ग्राह्यत्वं मन्यमानेन भगवता पतञ्जलिना सारं संजिघृक्षुणा तदनुशासनमारब्धं, न तु साक्षादेव शासनमारभ्यते। तदेव शास्त्रारम्भे प्रतिज्ञासूत्रम् 'अथ योगानुशासनम्' इति। अत्रेदं बोध्यं शिष्टस्य शासनमनुशासनं तेन शास्त्रस्य गुरुमूलकतया सूत्रकारेण प्रामाण्यं दर्शितमिति। तथा हि भगवान् भाष्यकारः—योगानुशासनं शास्त्रमधिकृतं वेदितव्यमिति।

प्रेक्षावन्तोऽप्रेक्षावन्तो वा सर्व्वे लोका दुःखं जिहासन्ति। तत्रैके धनजनराज्यवाणिज्यभैषज्यादिव्यापारैस्तत्प्रहाणोपायं गवेषयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एते खलु लौकिका उपाया अत्यन्तत एकान्ततश्च दुःखमुन्मूलयितुं नावकल्पन्ते। तदेव कस्य हेतोः ? ससंस्कारमनुच्छेदात्तस्य। अन्ये तु ये प्रेक्षावन्तस्ते शास्त्राधिगम्यविवेकज्ञानेन समूलं तत् प्रहातुं चेष्टन्ते। एतानेव त्रिविधदुःखज्वालाजटिलजगज्ज्वलनकवलीकृतान् भक्तिश्रद्धासमन्वितान् संसारिण उद्दिधीर्षुः परमकारुणिक ईश्वरो निश्वासप्रश्वासन्यायेन वेदादीनि सर्व्वाणि शास्त्राणि प्रवर्त्तयाम्बभूव। तेषु च सर्वेषु योगशास्त्रं दुःखाभिघातनिवर्त्तकं भगवता हिरण्यगर्भेण प्रकाशितं यत्र विवेकाभावो हेयस्य निदानं विवेकस्तु तद्धानोपायस्तत्त्व-साक्षात्काररूप इत्युपदिश्यते। स च तत्त्वसाक्षात्कारो निदिध्यासनैक-साध्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतेः। तच्च निदिध्यासनं किं वा कीदृशं वा कतिविधं वा के वा पुनस्तदुपायप्रत्युपाया इति तदीयमशेषविशेषं प्रतिपादयन् भगवान् हिरण्यगर्भो योगशास्त्रेण कल्पारम्भे परमर्षीन् शशास, अथा-नुशशास च तन्निष्ठो भगवान् पतञ्जलिः। तदेव शास्त्रं पातञ्जलं योगज्ञानादिसम्पन्नः परावरतत्त्वज्ञो महर्षिर्व्यासो व्याचख्यौ, वैयासिकं च विपश्चित्प्रवरैर्मिश्रधारेश्वरभिक्षुपादादिभिराचार्य्यैः प्रपञ्चितम्।

पतञ्जलिप्रोक्ते योगदर्शने निरोद्धव्या वृत्तयः पञ्चविधा उक्ताः— 'प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः' इति। तत्र प्रमाणं प्रागेव व्याख्या-तम्। विपर्य्ययस्तावदुपरिष्टाद् वक्ष्यते। विकल्पः शब्दज्ञानजन्यो वस्तुशून्यः प्रत्ययः। स च त्रिविधः क्रियाविकल्पोऽभावविकल्पो वस्तु-विकल्पश्चेति। तत्र क्रियाविकल्पो यथा व्याघ्रो धावति यत एव क्रिया-प्रवृत्तिस्तद्भावरूपत्वाद् व्याघ्रवृत्तित्वेन कल्पिता। अभावविकल्पो ह्यनुत्पत्तिधर्म्मा पुरुष इति। तत्र उत्पत्तिधर्म्मस्याभावमात्ररूपः पुरुषो बुध्यते न तु पुरुषान्वयी कश्चिदुत्पत्तिरूपो धर्म्मस्तस्य सर्व्वधर्म्म-शून्यत्वात्। वस्तुविकल्पस्योदाहरणानि चैतन्यं पुरुषस्य, शरीरं शिला-पुत्रस्य, शिरो राहोश्चेति। यदा चैतन्यं पुरुषस्य स्वरूपं शरीरं शिला-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रस्य शिरो राहोस्तु, तदा किं तत्र केन व्यपदिश्यते। तदुदाहरणं पुनः—

यावज्जीवमहं मौनी ब्रह्मचारी पिता मम।
माता च मम बन्ध्यासीदपुत्त्रश्च पितामहः॥ इति।

यद्वा—

एष बन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः॥ इति।

यद्वा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्ड इति।

निद्रा च जाग्रत्स्वप्नवृत्तीनामभावकारणं सत्त्वरजसोराच्छादकं तमश्चालम्बनमिति। तत्र यदा सत्त्वसचिवतमस आविर्भावस्तदा सुखमहमस्वाप्समिति प्रबुद्धस्य प्रत्यवमर्शो नितरामभिनयति प्रसन्नं मे मनः प्रज्ञां मे सूक्ष्मानुक्तदुरुक्तार्थप्रतिबिम्बग्राहिणीं करोतीति। यदा रजःसचिवतमस आविर्भावस्तदा दुःखमहमस्वाप्समिति प्रबुद्धस्य प्रत्यवमर्शः स्त्यानं मे मनो भ्रमत्यनवस्थितमिति। अभिभूतद्वये तु स्वापि तमःसमुल्लासाद् गाढं मूढोऽहमस्वाप्समिति सुप्तोत्थितस्य प्रत्यवमर्शश्चाभिनयति गुरूणि मे गात्राणि क्लान्तञ्च मे मनः केनापि मुषितमिव तिष्ठतीति। स्मृतिश्च सूचिता—'अनुभूतविषयासम्प्रमोषः' इति। एतदुक्तं भवति—प्रमाणादिवृत्तयः सामान्यतः प्रकारतो वा विषयमननुभूतं ग्राहयन्ति, स्मृतिस्तु पूर्व्वानुभूतविषयमर्य्यादामनतिक्रम्य तद्विषया तदूनविषया वा भवति न तु तदधिकविषयेति। सा च द्विविधा कल्पितानुस्मरणविषया यथा स्वप्नादिषु, पारमार्थिकस्मरणविषया च यथा जाग्रत्समय इति। अत एव विषयाकाराः खलु स्मृतयः सर्व्वा एव द्रव्यरूपाः परिणामविशेषाः सुखदुःखमोहात्मिका भार्य्या इव पुरुषस्य भोग्याः।

विपर्य्ययश्च सूत्रितो 'विपर्य्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठमि'ति। तत्र विपर्य्यय इति लक्ष्यं मिथ्याज्ञानमिति लक्षणम्। मिथ्येत्यस्य विवरणमत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रूपप्रतिष्ठं तद्रूपाप्रतिष्ठमिति यावत्। अतद्रूपप्रतिष्ठमस्याज्ञभोजोतिवत्। क्लेशमूलकः खलु विपर्य्ययस्तस्य विपरीतस्वभावत्वात्। क्लेशाश्च सूत्रकारेण दर्शिता 'अविद्याऽस्मितारागद्वेषाभिनिवेशाः' इति। अतो ह्यविद्यादयः सर्व्वे विपर्य्यया भवन्ति, मिथ्यात्वेन तेषां प्रतिष्ठितत्वात्।

असति सद्बुद्धिरविद्या यतो जीवानां धर्म्माधर्म्मोत्पत्तिद्वारा संसारः प्रवर्त्तितः। सा च वस्तुस्वरूपतिरोधानकारिणी सदसदनिर्व्वचनीया स्वयंप्रकाशस्य चिन्मात्रवपुषः स्वरूपे तयैव तिरोहिते, प्रत्यगात्मविषये ज्ञानज्ञेयादिविभागरूपा प्रतीयते। तत्र सामान्याविद्याकृते जगति जननमरणादिमिथ्याज्ञानरूपा विशिष्टाऽविद्या जायते। मिथ्याभूतार्थस्य मिथ्याभूतं कारणं भवतीति हेतुबलादवगम्यते विशिष्टाविद्याया अस्मिताख्यायाः सामान्याविद्योपादानत्वमपि मिथ्येति।

अस्मिता च निरूपिता 'दृग्दर्शनशक्त्योरेकात्मते'ति। पुरुषो हि दृक्शक्तिर्बुद्धिश्च दर्शनशक्तिस्तयोरेकस्वरूपापत्तिरस्मिताकार्य्यम्। योऽहं भोगी सोऽहमनुभवितेत्येवंजातीयकप्रत्ययतः संसारिणां बुद्धिपुरुषयोरभेदकल्पनावश्यम्भावात्। अविद्यातोऽस्मिताया अयं भेदः—दृक्शक्तिः पुरुषो दर्शनशक्तिर्बुद्धिस्तयोर्विभागप्राप्तौ भेदाभेदविषया समष्ट्यहंकारबुद्धिरविद्या, अस्मिता तु तदुत्तरकालिको दूरस्थवानस्पत्ययोरिव तयोरैकान्तिकभ्रम इति। अहङ्कारादस्मितायाश्चायं भेदो दर्शितः—'यत्रान्तःकरणमहमित्युल्लेखेन विषयान् वेदयते सोऽहङ्कारो यत्र त्वन्तर्मुखतया प्रतिलोमपरिणामे प्रकृतिलीने चेतसि सत्तामात्रमवभाति साऽस्मिते'ति।

अविद्यापादिताऽस्मिता रागादीनां निदानमित्यस्मितानन्तरं रागादीनामुपन्यासः। सुखाभिज्ञस्य सुखे स्मर्य्यमाणे दृश्यमाने वा योऽनुशेते स रागः। तदुक्तं 'सुखानुशयी रागः' इति। शब्दस्पर्शरूपरसगन्धेषु दिव्यादिव्यतया दशविधत्वात् स दशविधः। दुःखाभिज्ञस्य दुःखे स्मर्य्यमाणे दृश्यमाने वा या जिहासा स द्वेषः। तदेव सूत्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"दुःखानुशयी द्वेषः" इति। दिव्यादिव्यशब्दादिविषयैः सह दशभिरैश्वर्य्याष्टकमष्टादशधेति स ह्यष्टादशविधः। अभिनिवेशः खलु त्रासः परतः स्वानिष्टसम्भावनामूलत्वात्। ऐश्वर्य्यमासाद्य विषयसुखं भुञ्जाना देवा अपि दशान्तरं नेच्छन्तीत्यतस्तस्य नितान्तदुरन्तत्वप्रतिपादनाय सर्व्वापरिहार्य्यत्वमुखेन स च सूचितः—'स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः' इति। स हि स्वस्य रसेन वासनासंस्कारमात्रेण वहतीति स्वरसवाही न पुनरागन्तुकः। स च शब्दाद्यष्टादशविषयकत्वादष्टादशधा भवति।

पातञ्जलदर्शने तत्त्वं त्रिविधमभ्युपगतं प्रकृतिः पुरुष उत्तमपुरुष ईश्वरापरपर्य्यायः क्लेशकर्म्मविपाकाशयैरपरामृष्टश्चेति। तत्र प्रकृतिपुरुषौ प्रागेव व्याख्यातौ। उत्तमपुरुषस्तु कूटस्थनित्योऽपि तदुभयविलक्षण एव। अतो हि सजातीयविजातीयभेदावुपन्यस्तौ भवतः। तदुपन्यासाच्च परिच्छेदलक्षणमङ्गीकृतम्। परिच्छेदलक्षणस्य च त्रिविधत्वमवगम्यते प्रागभावध्वंसप्रतियोगित्वं कालपरिच्छेदः, अत्यन्ताभावप्रतियोगित्वं देशपरिच्छेदः, अन्योन्याभावप्रतियोगित्वं वस्तुपरिच्छेदश्चेति। संयमेन तु तेषां सर्वेषामपाय आत्यन्तिकः प्रतिपादितः कैवल्यफलत्वात्। तदेव त्रिविधपरिच्छेदशून्यत्वमधिकृत्य भगवानहिर्बुध्न्यः [२।४।७] स्मरति—

वर्त्तमानं न तद्ब्रह्म नातीतं नैव भाति तत्।
अग्रतः पृष्ठतो नैव नोर्द्ध्वाधः पार्श्वयोर्द्वयोः॥ इति।

अस्ति तावत् सांख्याद् योगशास्त्रस्य विशेषो यदेष शास्त्रजन्यप्रकृतिपुरुषविवेको मोक्षोपायः कापिलानाम्, तत्त्वसाक्षात्कारो मोक्षोपायो हैरण्यगर्भाणामिति। एतच्च तयोर्वैषम्यं प्रकृतिपुरुषातिरिक्तपरमेश्वरानङ्गीकाराङ्गीकाराभ्यां व्यपदिश्यते। परमात्मन उपादानत्वानभ्युपगमरूपं तु वैषम्यं वेदान्तादुभयोरपि सुस्पष्टं प्रतीयते। अत एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवता बादरायणेन 'एतेन योगः प्रत्युक्तः' इति सांख्यस्मृतिनिरसनेन योगस्मृतिरपि निरस्तेत्युक्तम्।

परमार्थतस्तु योगो न निरस्तः। द्वैतनिर्णये तस्य तात्पर्य्याभावात्। षड्दर्शनानां वैशेषिकन्यायदर्शनयोरिव पूर्व्वोत्तरमीमांसयोरिव वा सांख्ययोगयोरपि दृश्यते पूर्व्वमाश्रित्य परस्य प्रवृत्तत्वम्। यथा न्यायदर्शने वैशेषिकव्यवस्थापितान् पदार्थानाश्रित्यानुमानं व्युत्पादितम्, यथा चोत्तरमीमांसायां पूर्व्वमीमांसाव्यवस्थापितं शब्दब्रह्म समाश्रित्य परं ब्रह्म मीमांसितम्, तथा पातञ्जलदर्शनेऽपि सांख्योक्तां प्रक्रियामाश्रित्य योगो योगविद्वरिष्ठैराचार्य्यपादैरनुशिष्टः। अत एव द्वैतसत्यत्वादिषु योगशास्त्रस्य तात्पर्य्याभावान्न कोऽपि वेदान्तविरोधः कल्पितः। तथा हि शारीरकभाष्ये भगवान् शङ्कराचार्य्यः—"अथ तत्त्वदर्शनोपायो योग इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते। अतः सम्प्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद् योगस्मृतिरप्यनपवदनीया भविष्यती"ति। भामती च तत्र—"यदि प्रधानादिसत्तापरं योगशास्त्रं भवेत्, भवेत् प्रत्यक्षवेदान्तश्रुतिविरोधेनाप्रमाणम्। तथा च तद्विहितेषु यमादिष्वप्यनाश्वासः स्यात्। तस्मान्न प्रधानादिपरं तत्, किन्तु तन्निमित्तीकृत्य योगव्युत्पादनपरमित्युक्तम्। न चाविषयेऽप्रामाण्यं विषयेऽपि प्रमाणमुपहन्ति। न हि चक्षूरसादावप्रमाणं रूपेऽप्यप्रमाणं भवितुमर्हति। तस्माद् वेदान्तश्रुतिविरोधात् प्रधानादिरस्याविषयो न त्वप्रामाण्यमिति परमार्थः" इति। अत एव वेदान्तेन पातञ्जलाभ्युपगतं जगतोऽचेतनोपादानकत्वपुरुषबहुत्वादिकमेव श्रुतिविरोधान्निरस्यते, न तु साङ्गोपाङ्गस्य समाधेस्तदवान्तरफलविभूतिकैवल्यादीनां साधनत्वमपि। अयं च दर्शनान्तरेभ्यो योगदर्शनस्य विशेषो यदत्राभिहितानामलौकिकसिद्धीनामनुभवो देहेऽस्मिन्नेव भवतीति। अनुभवश्च तासां सिद्धीनामलौकिकोऽपि लौकिकोपायसाध्यत्वादिति चित्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखहानाय सर्वेषूपायेषु गरिष्ठो वरिष्ठश्च योगोपायः। सर्व्ववृत्तिनिरोधतो ब्रह्मात्मैक्यज्ञानेन मोक्षप्रदत्वात्। सर्व्ववृत्तिनिरोधेन तु ब्रह्मात्मैक्यज्ञाननिरोधोऽपि न शङ्कनीयः। प्रत्यगात्मविषयत्वात्। निरुद्धे हि चेतसि षड्भावापन्नं सर्वं वस्तुजातं नश्यति, प्रत्यगात्मा तु षड्भावातिरिक्तत्वान्न विनश्यति। स च प्रत्यगात्मा स्वव्यवहारे दीप इव समाधौ ज्ञानान्तरं नापेक्षते। स्वरूपप्रतिष्ठितत्वात्। तथा हि श्रूयते—

न तत्र सूर्य्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति॥ इति।

तात्पर्य्यत एतदुक्तं भवति—स्वरूपावस्थाने हि प्रत्यगात्मा स्वयंप्रकाशः सर्व्वप्रकाशकश्च तस्य स्वभानार्थं नान्यापेक्षा वर्त्तत इति।

ननु सर्व्ववृत्तिनिरोधेन यदि पुरुषस्य स्वरूपप्रतिष्ठितत्वं भवति, तर्हि मूर्च्छितस्यापि तदेव भवितुमर्हतीति चेत्? मैवम्। सरागवृत्तिनिरोधः स्वरूपप्रतिष्ठायै न कल्पते। ततो ब्रह्मात्मैक्यज्ञानाभावात्। अतो ब्रह्मात्मैक्यज्ञानाय सरागवृत्त्युच्छेदरूपो योगोपाय आश्रयणीयः। श्रुत्या च तन्मार्ग उपदर्शितः—

यच्छेद् वाङ्मनसी प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि।
ज्ञानं नियच्छेन् महति तद् यच्छेच्छान्त आत्मनि॥ इति।

तदेव विद्वद्योगी 'नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तदि'ति प्रमाणेन वागिन्द्रियलक्षणमिन्द्रियवर्गं प्रातिलोम्येन मनसि व्यापारवति प्रविलापयन् प्रागेव मौनी भवति, ततः पिण्डीकृतमनोमयविषयं विशिष्टे ज्ञातरि समाहरन् सर्वमहमेवेदमस्मीत्येवंकारवृत्तिमात्रशेषो भवति, ततश्चाभिमानरूपाहङ्कारं सर्व्वानुस्यूते महत्तत्त्वे सामान्याहङ्काराख्ये समुपहरन् विषयवेदनमन्तरेणास्मीत्येतावन्मात्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषस्तिष्ठति। परिशेषतस्तदपि महत्तत्त्वं कुतश्चिदभिमन्तव्याभावात् प्रधाने निहितं शुद्धे ज्ञातरि विलीयते, स चापि योगं महाफलं लभते। तदेव कृष्णार्ज्जुनसंवादे दीर्घरवप्रयुक्तो दुन्दुभिताडनापुरःसरो महाडिण्डिम'स्तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिक' इति।

पतञ्जलिप्रोक्ते योगदर्शने चत्वारः पादाः सन्ति—समाधिपादः साधनपादो विभूतिपादः कैवल्यपादश्चेति। तत्र प्रथमे पादे योगलक्षणमुद्देशनिर्द्देशादींश्चाभिधाय समाहितचित्तानामुत्तमाधिकारिणामभ्यासवैराग्याभ्यां क्रियायोगनिरपेक्षाभ्यां समाधिनिष्पत्तिः प्रतिपादिता, प्रभेदा उपायाश्च दर्शिताः। तथाहि पदार्थसंग्रहश्लोकः—

योगस्योद्देशनिर्द्देशौ तदर्थं वृत्तिलक्षणम्।
योगोपायाः प्रभेदाश्च पादेऽस्मिन्नुपवर्णिताः॥ इति।

स च समाधिलक्षणो योगो द्विविधः सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति। तत्र सम्यग् ज्ञायते साक्षात्क्रियते भाव्यमत्रेति सम्प्रज्ञातो ध्येयमात्रव्यापारेऽन्यतः प्रत्याहृतस्य चित्तस्य स्थैर्य्यविशेषः। अस्य च समाधेर्दृष्टफलं वृत्तिनिरोधेन क्लेशनिवृत्तिः, अदृष्टफलं तु ध्येयसाक्षात्कारो येन हि चित्तं स्वत एव सकलविषयावगाहि सत्यग्रहणक्षमं च भवति। समाधिरयं सम्प्रज्ञातश्चतुर्विधो वितर्कानुगतो विचारानुगत आनन्दानुगतोऽस्मितानुगतश्चेति। स च वितर्कादिक्रम औत्सर्गिक एव परमसूक्ष्मविषये चित्तस्यैकपदे प्रवेशासम्भवात्। तथा हि स्मृतिः—

योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत्।
स्थूले विनिर्जितं चित्तं ततः सूक्ष्मे शनैर्नयेत्॥ इति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयागस्नानम्

[निबन्धकः—श्रीविष्णुधरतर्कतीर्थः]

व्यतीते कार्त्तिके मासि तीर्थभ्रमणप्रसङ्गेनानाविलसुखदेन समागतोऽहमविमुक्तवाराणसीपुरीं पञ्चषाणि दिवसानि न्युष्य ततो भारतीयनदीकुलेषु वरिष्ठतामधिगच्छन्त्या भागीरथ्या यमुनया च स्थानसौकुमार्य्यदिदृक्षया विवशहृदयेवागत्यान्योऽन्यसम्मेलनेनाहित-पावित्र्यमाहात्म्यसौन्दर्य्यविरहितमपि नैसर्गिकाशेषशोभानिकेतनं पुरा वीतसकलरागेणर्षिकुञ्जरेण भरद्वाजेन महामतिना योगानुष्ठान-योग्यतां सर्वथा परीक्ष्येवाश्रमपदं निर्माय विहितगौरवसन्तानं शास्त्र-कृद्भिरपि—

"गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे।
स्नात्वैव ब्रह्मणो विष्णोः शिवस्य च पुरं व्रजेद् ॥"

इत्यादिना वचनजातेन मुक्तकण्ठमुद्घोषितयशःप्रकर्षं प्रयागं नाम सर्व-जनविदितं नासुगमं तीर्थक्षेत्रमगच्छम्।

प्रत्यक्षमनुभवतां बहूनां प्रयागतीर्थप्रत्यागतानां मुखाच्छ्रुता मयै-तत्तीर्थाधिकारिणां 'पाण्डे' इत्याख्यानां प्रकृत्या दुर्बलेषु भीधातोरपादा-नतापदवीं चिराय वैदेशिकेभ्यः समुत्सृज्य स्वयं कर्त्तृभूयं भजमानेषु वङ्गीययात्रिष्वर्थशोषणार्थममानुषी अत्याचारवार्त्ता। ततश्च वङ्गदेश-वास्तव्येन वर्षिष्ठजननीमात्रद्वितीयेन भीतभीतेन मया विज्ञापिता-शयः सदाशयो वाराणसीनिवासः कश्चित् सुहृत्तमः प्रादान्मे परिचय-पत्रमेकं स्वनामाङ्कितं, तत्प्रेष्ठं प्रयागतीर्थाधिकारिणं कञ्चिदभिप्रेत्य। यत्नतो बद्ध्वा तत्साहायकं पत्रं चेलाञ्चले, आवां कस्मिंश्चिदपराह्ण आव-श्यकं लघुभारं शय्योपकरणादिकं द्रव्यजातं संगृह्य काशीस्थवासभवना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्निष्क्रान्तौ प्रणम्य चोद्देशेन देवदेवं विश्वनाथं सकलकल्याणहेतुं, तुरगयानेन "वेनारसक्याण्टनमेण्ट" इत्यभिध-ष्टेशनस्थानाभिमुखं यात्रामकुर्वं ।

अस्मात् स्थानादाप्रयागं वङ्गोत्तरपश्चिमप्रदेशीयबाष्पयानपरिचालकसमिते-(B.N.W.R.)रेकः शाखापथो विततो वर्त्तते, योऽत्र स्थानीयव्यवहारेण 'छोटलाइन' इत्यभिधामाश्रयते। इतरस्तु स्थवीयान् मार्गो यः खलु 'हाओडा'मारभ्य 'दिल्ली'नगरीं यावत् प्रसृतः 'वडलाइन' इत्यभिधीयते, तेनाप्यस्मात् स्थानात् 'एलाहावाद' इत्यपराभिधानकं प्रयागगमनं सुशकमपि गङ्गा-यमुना-सङ्गममवगाहनाय प्रेप्सूनां तीर्थयात्रिणां प्रागुक्तसरण्या "ईजट्ब्रीज्" इति नामधेये बाष्पयानीयविश्रामस्थानेऽवतरणमेव श्रेयो भवति, यतोऽस्मात् स्थानात्तीर्थस्थानस्य यथा नेदीयस्त्वं न तथा द्वितीयमार्गेण प्राप्तव्यदेशात्।

आप्तमुखादधिपथमेवं विदितवेदितव्येन मया यथाकालं प्रतिजनं सपादैकराजतमुद्रारूपशुल्कं रन्ध्रपथेनाधिकारिणे प्रदायानायासं तृतीयश्रेणिकानुमतिपत्रद्वयी लब्धा। अनायासमित्युक्तेः कारणशुश्रूषा पाठकानां सूक्ष्ममीक्षमाणानां केषाञ्चिदुत्पद्येत, अतः प्रसङ्गसङ्गतिमनुसृत्योच्यते यत्, पाश्चात्यतीर्थेषु भ्राम्यद्भिर्वङ्गीयैस्तेषु तेषु प्रसिद्ध'ष्टेशन'गृहेषु बाष्पयानीयानुमतिपत्रसंग्रहो महति जनसम्मर्दे प्रायेण शारीरशक्तिव्ययमन्तरेण, अन्तरेण च तत्तद्विविधव्ययं न शक्यते कर्त्तुम् इति स्वदेशस्थितैरस्माभिराकर्णितम्। अत्र तु प्रत्यक्षमनुभूय कुत्रापि वाक्यस्यास्य याथार्थ्यं नोपलब्धं सुकृतिमानिना मया। अतएवानायासमित्युक्तिर्न वैयर्थ्यदोषस्य कुक्षावात्मानं निःक्षिपतीति प्रकृतमनुसरामः।

घटिकायन्त्र आपराह्णिकत्रिवादनतः परमस्मात् स्थानादभिप्रयागं वाष्पीयशकटं प्रधावति। आवां यथाकालं साटोपगर्जनैर्धूमराशिमुद्वमत्यागते शकटे सुखमुपविश्य गवाक्षरन्ध्रेणाभितः सौन्दर्यराजिं दर्शं दर्शं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शयन्ती चान्योऽन्यं दर्शनीयवस्तुजातं वङ्गीयनयने नवमिव प्रतिभातमुपदर्शानि विश्रामस्थानान्यतिक्रम्यासमृद्धानि सायं सप्तमघटिकायां परिगङ्गमुपस्थितो। दृश्येष्वन्तरान्तरा वंशवनम्, वदरीवनम्, बहुविस्तृतमाम्रवणञ्च प्राधान्येन वर्त्तन्ते। धान्यक्षेत्रं तु कुत्रापि नावातरन्नयनसरणिं, कालान्तरे भूर्धान्यं बिभर्त्ति नो वेति न जानीमः। यवादिकशस्यमुरसा बिभ्रद् भूखण्ड एव क्वचिद् दृष्टः। क्षेत्रेषु जलसेकार्थं कूपोऽपि खनितोऽवलोकितः। देशोऽयं वङ्गदेशवन्न समृद्धजनबहुलः, प्रायेण जीर्णास्तालपत्राच्छादिताः कृषीवलानां कुटीरा एव दृष्टिपथे पतिताः। सहयात्रिणश्च मदीया यानारूढा मलिनवसनं निवसानाः प्रायेण वर्णज्ञानविरहितास्तद्देशीयाः स्वदेशस्य शोचनीयां दीनावस्थामेव प्रकटयन्ति स्म। धन्यास्माकं जननी वङ्गावनिः, प्रतिग्रामं कूपवापीपुष्करिणीदीर्घिकाकुल्यालङ्कृता "सुजलां सुफलां शस्यश्यामला"मिति गीतिवाक्यस्य सर्व्वथा सार्थक्यं साधयतीति वैदेशिकविरागभिया तेभ्यः क्षमामभ्यर्थ्य विरम्यते।

गङ्गायाः प्राचि तीरे 'युसी' इत्याख्यं 'ष्टेशन'गृहं वर्त्तते, तदतिक्रम्यैवास्माकं शकटं विचित्रमुत्तरतो दक्षिणवाहिन्या गङ्गाया उपरिस्थं द्राघिष्ठं लौहमयसेतुं झनझनारवमुखरितं शनैर्निपीड्य पश्चिमतीरावस्थितमस्मदभीष्टम् "ईजट्ब्रीज्" इत्यभिधं शुल्कस्थानं प्राप्य व्यश्रमत्। यस्य हि श्रीमतः केदारनाथशुकुलनामधेयस्य तीर्थाधिकारिणः पत्रं संगृहीतं काशीस्थसुहृद्वरतो मया, तस्य कुत्र वासस्थानम्, केन च पथा कां वा दिशमस्यां रात्रौ गन्तव्यमित्यादिकं चिन्तयत्येव मयि मात्रा सह यानादवतरति, पञ्चषा यष्टिहस्ताः पुरुषा "आगम्यतां भद्र! केदारनाथस्य भवनम्, सुखेन स्थायिष्यत" इत्याद्यभिदधत आपतिताः। अथ मया सविशेषं पृष्ट्वा 'शुकुल' इत्युपाधिना स्थानसङ्केतेन च मदन्वेष्य एवायमिति निश्चिन्वता मातृपुरःसरेण तैरुपदिष्टपथमुपसृत्यानतिदूरमेव प्राप्तं तस्य तीर्थगुरो रमणीयं भवनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितलस्य रुचिरस्यास्य परिष्कृतहर्म्म्यस्य एकस्मिन् प्रकोष्ठे पुरुषा आवां प्रवेशितवन्तो यत्रापरेऽपि त्रिचतुरा गृहस्वामिनः कर्म्मकरा उपविष्टा आसन्। तेषामेको वङ्गदेशीयः प्रौढिमुपागतः 'सरकार' इत्युपाधिभूषितः प्राधान्यपदवीमारूढो मम परिचयादिकं सविशेषमवगम्य सविनयमुवाच "भद्र! भवतः पत्रं श्वः प्रभाते प्रभुसकाशमुपस्थापयिष्यामि, असावद्योपरितनप्रकोष्ठे स्वीये सुप्तिसुखमनुभवन्नास्ते, भवदभीष्टे यत्र कुत्रचित् प्रकोष्ठे सुखेनाद्य रजनी याप्यताम्; गेहाङ्गने जलनालिका नक्तन्दिवं यात्रिणां कृते जलमुद्वमति, अदूरे च हट्टो वर्त्तते, तत्रास्मदीयैर्भृतकैः सह गत्वा नैशाहारस्योद्योगः क्रियताम्" इति।

अस्मिन् प्रदोषसमये सुप्तिवृत्तान्तमाकर्ण्य विस्मयमानेन मया सुपरिष्कृते कुत्रचिज्जलनालिकासन्ने प्रकोष्ठे दीपं प्रज्वाल्य कम्बलास्तरणे मातरमुपवेश्य भक्ष्यसंग्रहाय केनचित्तत्रत्येन कर्म्मकारेण सार्कं प्रतिहट्टमयायि। शुकुलमहोदयस्य वासभवनस्यानतिदूर एव 'दारागञ्ज'नाम्ना विख्यातो हट्टः। यद्यप्यस्मिन् स्थाने सम्द्धिर्न नयनलोभनीया, वणिजां विपणयो न वंहिष्ठाः, जनसमावेशोऽपि विरलस्तथाप्यत्र राजपथस्य प्रशस्तता निर्म्मलता सौन्दर्य्यञ्चानवद्यानीति, द्रोणव्यूहवत् सर्व्वतः सङ्कीर्णमार्गकात् पथिकसङ्घर्षव्याहतस्वच्छन्दगतागतात् काशीधाम्नः सद्य आगन्तुकस्य मे मनो नितरामतुष्यत्। अथवा मनो नातुष्यदिति को वेद? तथाहि विधवा मे जनन्येकाहारा रात्रावोदनं नोपभुङ्क्ते, तीर्थयात्रित्वान्ममापि सैव गतिः। वाराणस्यां निशि भक्ष्यं फलमूलादिकं पर्य्याप्तं क्रय्यमासीत्। अत्र तु दारागञ्जे प्रदोषकाले कदलीफलान्यपि नोपलक्षितानि मया, का कथा फलान्तरस्य? 'एलाहाबाद'नगरे तु येऽवतरन्ति तेषामेवं पर्य्यनुयोगस्यावसरो न भवेदिति निःसंशयं वक्तव्यमेव।

अथागत्या सुलभमनुद्धृतसारं कवोष्णं गव्यदुग्धं यथेप्सितं शर्कराञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगृह्य भवनं प्रत्यावृत्य सन्ध्यावन्दनं समाप्तं, समाहितञ्चावाभ्यामुदर-हतकस्य कृते पयःपानं, सन्ध्याय वाराणसीकृतनैशभोजनप्रकार-विशेषम्। एतत्तु नोच्यते चेद्रसनाया अकृतवेदिता स्याद् यदत्र दुग्धरूपे पयसि तरलतया सजातीयपयोऽन्तरनिलीनीकरणपटुतां नाधिगतवन्तो मूढा जना इति।

अचिरेणाशेषदुःखहारिणी निद्रादेवी कृपावती बभूवावयोः। अथ पश्चिमरात्रे झरझरायाकृत्याकस्मात् प्रबलवारिपातो निद्राभङ्गकरोऽन्यूनं घटिकाद्वयं समजनि। छत्रविरहितयोरावयोः कृपयेव प्रातर्वर्षण-विरतोऽपि पर्जन्यदेवः प्रच्छाद्य सवितुस्तेजः सर्व्वतो नभोऽधितष्ठौ। आवाञ्च कृतशौचाचमनौ सन्ध्यामुपास्य तस्य 'सरकार'महोदयस्य सविधे उपस्थितावेव तेनाभिहितौ यद्—"अस्माकं प्रभुं विलम्बितशय्यापरी-हारमनपेक्ष्य, अयमस्माकं पुरोहितठक्कुरः, अयञ्च भृतकः, एताभ्यां सह भवन्तौ साम्प्रतमेव नदीसङ्गमं गच्छतामन्यथा सर्व्वकृत्यं निःशेषेण समाप्य गृहप्रत्यावर्त्तने वेलातिक्रमो जायेत, प्रतिजनञ्च सपादराजत-मुद्रैका दक्षिणा प्रदेया कार्य्यावसान" इति।

गयादितीर्थेषु सर्व्वत्रैव तीर्थगुरूणामेवं भोगविलासमात्रपरायणतां प्रधानकर्म्माध्यक्षनिर्भरताञ्चावलोकितवता मया तस्योक्तेरवितथतां यौक्तिकताञ्चावगम्य मातरमग्रतः कृत्वावश्यकं वस्त्रद्वयं कमण्डलु-द्वयञ्चादाय गृहान्निरयायि। तौ चावामन्वसरताम्। पुरोहितठक्कु-रेणावयोः किमपि न प्रयोजनमासीत्, भृत्यस्तु पथिप्रदर्शकतया साम-यिकोपदेशकतया च कर्त्तव्यार्थस्य भूयांसमुपयोगमयासीदिति स्वस्ति-मान् भवतात्।

पथि बहिर्गतावावां मृदुना वस्त्रेण संवीतगात्रौ रात्रिकृतवारि-वर्षणजनितशैत्यप्रकर्षस्यातिदूरदिग्देशादबाधं प्रवातः प्रभातसमीरण-स्याहतिकम्पितौ नितरामक्लिश्याव। तीर्थयात्रिणामेवमचिन्तितपूर्व्व-क्लेशभोगो न विचित्रतामावहति, विशेषतोऽधनानां मादृशाम्। भवतु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावद् अस्मात् स्थानाद्दक्षिणपूर्वस्यां क्रोशार्द्धमितां पुलिनभूमिं श्यामल-शष्पपरिवृतां सुखपादप्रचारामतिक्रम्य प्राप्तस्त्रिवेणीसङ्गमः।

सङ्गमस्थले गङ्गा रजतधवला तीव्रतरस्रोतोवेगभीषणा पश्चिमतीर-विभङ्गविधायिनी उत्तरतो दक्षिणस्यां प्रवहति। भङ्गुरतटप्रान्ते स्थिता त्रिचतुरधनुःप्रमितेऽधस्तात् प्रवहन्त्यास्तस्या रौद्रीं मूर्त्ति-मनिमेषाभ्यां नयनाभ्यां पश्यतो मे मनसि पौराणिकः स ऐरावताभि-भवव्यापारो मूर्त्तिमानिव प्रत्यभात्। कालिन्दी तु मृदुमन्दवेगा नीलिम्ना गाम्भीर्य्येण च नभस्यमाना पश्चिमतः पूर्वस्यामभिगङ्गमचापलं नृत्यन्तीव प्रवाहिता वर्त्तते। सरस्वत्याः सन्धानं सरस्वतीप्रियैरेव ज्ञातं ज्ञातव्यञ्च।

मध्येयमुनं परःशता बृहत्तमाः कूर्म्मा निमज्ज्य निमज्ज्य उत्प्लव-माना दृष्टाः। मकरवाहनायां गङ्गायामेव मकरसत्ता तत्रत्येभ्यः श्रुता दर्शनविषयतान्तु न मे याता। जलचराणां मकराणामदर्शने-ऽपि तत्र समुपस्थितैरेवास्माभिरालोकिता यात्रिदर्शमहंपूर्विकया आक्रमणकारिणः स्थलचराः क्षुरपाणयोऽनेके व्यथकतया मकरकल्पा नापिता येषां वशंवदता प्रयागक्षेत्रे यात्रिणामपरिहार्य्यैव। तथाच स्मृतिः—

"गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत्।
स कोटिकुलसंयुक्तमाकल्पं रौरवं वसेत्॥"

ये तु यात्रिणस्तीर्थगुरुभिः सह सर्वविधव्ययस्य व्यवस्थां प्राक् साधयन्ति तेभ्यो नापिताः किमपि न प्राप्तुमर्हन्ति, केवलं प्रतिजन-माणकमेकं तीर्थगुरुभिः प्रदत्तं प्राप्नुवन्तीति तत्रत्या स्थितिः। तथापि पारितोषिकाय परिहितवस्त्राय च पुनः पुनः प्रत्याख्याता अपि ते भृशमुद्वेजयन्ति जनान्। अथ नापितावावां मद्राक्रान्तवन्तौ। अत्र नापितानां मुखात्—'वापयेत् सर्वगात्राणि कक्षवक्षःशिखां विने'ति श्लोकांशः प्रायेणैव श्रूयते। अतःपरं स्नानप्रकार उपवर्ण्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्ये नदिसङ्गमस्थले जलं जानुदघ्नम्। सङ्गमानुरोधात्तटसमीपे गभीरजलेऽवतरणासौकर्य्याच्च नावमारुह्य तत्रैव गत्वा स्नानमाचरन्ति जनाः। पञ्चषजनवहनयोग्याः प्रायेण पञ्चाशत्संख्यापरिमितास्तरण्यो निराच्छादना यमुनातटोपान्ते मया दृष्टाः। आणकचतुष्टयेन मया नौरिका संगृहीता। नाविके यत्नत आवामारोह्य तरणीं मुक्तबन्धनां कृतवत्येवानुकूलेन स्रोतसोत्प्लुत्य सविलासं नृत्यन्तीव साचलत्। अत्रेदं वक्तव्यतयावतिष्ठते यद् जलधिजलोच्छ्रासः प्रबलोऽपि प्रयागं किमुत आवाराणस्यपि उपस्थातुं न सौभाग्यमर्जितवान्। अहो! उच्चैःप्रभवतया प्रतिग्रहादपावृत्तिधर्म्मा अपि तरङ्गिणी रत्नाकर-सान्निध्याल्लावण्यमपि निपीय सलिलं च्युतव्रता दत्तापहारित्वकलङ्क-कालिमलिप्तमुखी न जिह्रेति। धन्यो जगति रत्नाकरमहिम्नः प्रभावः।

अथ नाविको यथास्थानं नीत्वा नावं भुपकृत्य जलमध्येऽवततार, दृढमुष्ट्या दधार च ताम्। गभीरतमेऽत्र नदीवक्षसि शालवृक्षोऽपि निपतितः स्रोतोवेगेन तृणवद्विचाल्यते; कथं नाम क्षोदिष्ठा वालुका-कणा निरालम्बना एवमेकत्र सम्भूय वारिमग्नद्वीपं सृजन्तीति अचिन्त्यः खलु प्रकृतिदेव्या लीलाविलासः। अत्र जलं जानुदघ्नमिति प्रागेवोक्तम्। आवां सावधानं नौकातो जलमवतीर्य्य धृत्वा चैकेन हस्तेन दृढं नौप्रान्तदेशमभिलापवाक्यमुच्चार्य्याष्टाङ्गप्रणामवत् कथमपि प्रह्वीभूय स्नातवन्तौ। स्रोतसो रयेण पदतलस्था मृत्स्ना दूरमप-सरति, ततश्च पादसंयोगशैथिल्यवशात् प्रतिपदमेव स्थानच्युतिभय-मभवदावयोः। शिक्षानैपुण्यात्तु तद्देशीयाः कतिचित्ताम्रखण्डलिप्सवो भिक्षुका निर्भयमत्र पादचारेण यात्रिण इतस्ततः उपतिष्ठमाना "आकुलीकुरुते न कमि"ति कविवचनांशस्य प्रामाण्यमुट्टङ्कयन्तस्तत्रा-वलोक्यन्ते स्म।

स्नानावसाने तरणीमारुह्य परिहितशुष्कवसनावावां तर्पणादिकं यथाविधि समपादयाव। नाविकस्य निःस्वार्थं पुनः पुनर्गतागतक्लेश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत्सृज्य निःश्रेयससाधनतया तत्रैवोन्मुक्तो नदीवक्षसि चिराय निनर्त्ति पु-मिव तरणीं स्रोतःप्रातिकूल्याद् बलेन वहित्रमुत्क्षिपंस्तटभूमिं निनाय।

अथास्मिन् समये दिष्ट्या दिशां मुखानि प्रसन्नीकृत्य देवो दिवाकरः कथमप्यभ्रजालान्निर्मुक्तप्राय इवाभवत्। आवामपि नदीसङ्गमस्नानस्यातीव स्वास्थ्यकरत्वाद्वा, केशानां परिवापनाद्वा, दिवाकरकरस्याभ्युदयवशाद्वा समीरणशैत्यजनितशारीरजाड्यान्निर्मुक्तौ प्रकृतौ समस्थिष्वहि। अतः परमक्षयवटदर्शनस्य समयः। पश्चिमेनैतं प्रदेशं यमुनाया उदीचि तीरे वर्षासु तया चुम्बितयाम्यप्राचीरं विशालं तद् 'एलाहाबाद'दुर्गम्। तदभ्यन्तरवर्त्ती खलु अयमक्षयवटः। सरितोरत्र कूलङ्कषतया स्वीयाक्षयसंज्ञासार्थक्यसंविधानायैव किं वटोऽयं वज्रकठोरस्यास्य दुर्भेद्यदुर्गस्य शरणमापन्नश्चिराय निःसपत्नो निद्राति? क इमं प्रश्नं समाधास्यति? को वाऽनुभवति तस्य असूर्य्यम्पश्यस्य निदारुणां मर्म्मव्यथाम्?

तरणीमुत्सृज्य, उत्सृज्य च सङ्गिनं पुरोहितठक्कुरं तं पथिप्रज्ञं कर्म्मकरमग्रतः कृत्वा तेन वङ्गभाषाकुशलेन सह चित्रालापसुखेन पन्थानं कृसिष्ठं नदीसैकतगतमतिक्रम्यावां दुर्गमूले समुपस्थितौ। अस्मिन् दुर्गाभ्यन्तरे तीर्थयात्रिणामेव प्रवेशाधिकारो नान्येषामिति स कर्म्मकरो दुर्गतोरणोपकण्ठे क्वचित्प्रच्छायशीतले मनोरमे वटमूले उपलखण्डमेकमध्यासीनो गन्तव्यमार्गसंस्थानादिकमुपदिश्य व्यसर्जयदावाम्। प्रविश्य च द्वारदेशं कश्चिद् युरोपीयः शस्त्रधरो दौवारिकोऽवलोकितः। तत्समीप आर्द्राणां वाससां स्थापनाय कृतेङ्गितावावां तथैव कृत्वा कञ्चित् पन्थानं क्रमोन्नतं मनोरममतीत्य सुरङ्गमेकमपश्याव। तेन च सुरङ्गपथेन सोपानावलीसहितेन पुरुषप्रमितिऽधस्तादवतीर्य्य सुप्रशस्त एकः प्रकोष्ठः प्राप्यते यत्र प्रायेण विंशतिर्देवमूर्त्तयो द्वित्रहस्तोन्नता अभग्नावयवाः समोच्छ्राया एकामेव च रुचिमवलम्ब्य कृष्ण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तरनिर्म्मिता विराजन्ते। तेषु प्रथमा नयनपथेन लोहितमिवोद्गिरन्ती दुर्व्वाससो मूर्त्तिः कर्म्मफलस्याखण्डनीयतावुद्धिं दर्शकमनसि झटित्येव जनयति। यो हि द्वापरे द्वितीयस्य रिपोरासनमप्रतिहतप्रभावमध्यास्य पुण्यात्मनां भीमद्वितीयानां पाण्डुपुत्राणामपि भीमताममजत्, तस्यैवं घोरे कलौ काले पातालतलनिर्व्वासनं सृष्टिरक्षाया हेतुरिति तस्मै नमस्कृत्य अपरा अपि तत्रत्याः सूर्य्य-कार्त्तिकेय-गणेश-दुर्गादीनां प्रतिमा आवाभ्यामवलोकिताः पूजिताश्च। आसां मूर्त्तीनां प्रत्येकमुपरिष्टाद् हस्तमितं गवाक्षजालमस्ति तेनैव च सौरालोकप्रवेशादस्मिन् भूगर्भस्थे प्रकोष्ठे कथञ्चित्तमसा तिरोभूयते।

अत्रैव च देवगणमध्यवर्त्ती अक्षयवटश्छिन्नशाखो जीर्णकायः पञ्चषहस्तोत्सेधः। अत्र केचिद् ब्राह्मणा मूलदेशसमासीना द्रुमं हस्तप्रमितादूर्द्ध्वदेशतः शाखाद्वयविभक्तं वाससा सिन्दूरपुष्पमाल्याभरणैश्चाच्छाद्य संस्कृतभाषामयान् कांश्चिन्नमस्कारश्लोकानध्यापयन्तो यात्रिभ्यो दक्षिणामाददते संस्कृतवाख्याश्चान्योऽपि विदधति। तरुरयं चरमं श्वासवायुममुचन्न वेति संशयो मम चेतसि नितरामेव पदं न्यधात्। सत्त्वमप्यस्य प्राणेषु ते सततमेव बहिर्निर्जिगमिषव एवेत्यसंशयं वक्तुं शक्यते।

अथ दुर्गाद् बहिर्निर्गत्योत्तरस्यां दिशि कञ्चित्पन्थानमतीत्य दृष्टो देवो वेणीमाधवो नाम नारायणः। असौ धातुमयो हस्तमात्रश्च सुरम्यं मन्दिरमधिवसति। अत्र प्रवेशशुल्कव्यवस्था नास्ति। दृष्ट्वा स्पृष्ट्वा प्रदक्षिणीकृत्य च तं ततः प्रतीच्यां कियद्दूरं गत्वा ललितां नाम तत्रत्यामनादिदेवतामपश्याव। ततश्च मध्याह्ने शुक्लमहोदयस्य वासभवनं प्रत्यावृत्त्यैव भोजनव्यापारं समासतः सम्पाद्यापराह्णे तेन तीर्थगुरुणा सह लब्धसाक्षात्कारो प्रतिजनं सपादैकराजतमुद्रामिव दत्त्वा परिचयपत्रबलेन विना वाग्व्ययं तस्य प्रभूतं सन्तोषमुदपादयाव।

अतश्च पुनरोजट्ब्रीज् ष्टेशनगृहं प्राप्य सायं वाष्पशकटमारुह्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रात्रेर्दशमहोरायां पुण्यभूमिं वाराणसीमागतावावां सुप्तिसुखमनुभूव। परेद्युः प्रातश्च तत्परिचयपत्रदात्रे बन्धुवराय स्वयमेव कुशलवार्त्तां ज्ञातुमागतायान्तरिकी कृतज्ञता मया निवेदितेति शम्।

चैत्रमासीयसमस्यापूरणम्

निजालये दृप्तदशास्यचालिते
भयार्त्तगौरीभुजमध्यसीयुषः।
हरस्य रोषो न विकाशमित्यहो
उदेति दोषादपि दोषलाघवम्॥ १॥

अन्यस्याः सदनमुपागते मुकुन्दे
श्रीराधा तदुपहृतां विनिन्द्य मालाम्।
चिक्षेप क्षितितल इत्युवाच वृन्दा
विक्रीते करिणि किमङ्कुशे विवादः॥ २॥

अथवा

साम्राज्यं सकलमुपेयुषो महर्षेः
सक्रोधां पुनरपि दक्षिणार्थभिक्षाम्।
श्रुत्वा तं पुरजन एवमाह नम्रो
विक्रीते करिणि किमङ्कुशे विवादः॥ २॥

भट्टपल्लीसंस्कृतविद्यालयस्य
कश्चिच्छात्रः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोविदानन्दः

द्वितीयोऽध्यायः

शक्यार्थबाधे सङ्कोचः प्रसारः * प्लुतिरेव वा ।
सङ्केतस्य स्मृता वृत्तिर्लक्षणा योगसम्भवे ॥१॥

अभिधां निरूप्य लक्षणां निरूपयति—शक्येति। शक्यार्थस्य सङ्केतितार्थस्य बाधे प्रकृतानुपयोगे सति सङ्कोचो न्यूनत्वं प्रसारस्त्वाधिकत्वं प्लुतिरुल्लङ्घनं तत्त्यागेन अन्यार्थाश्रयणमित्यर्थः। योगसम्भवे सम्बन्धसत्त्वे, न तु सम्बन्ध एव लक्षणेति भावः ॥१॥

त्रैविध्यमेतच्छक्तेर्वा लक्षणा वृत्तिरिष्यते ।
वृत्तिः सङ्केतयोः केचिन्मन्यन्त उभयोरपि ॥२॥

पक्षान्तरमाह—शक्तेरिति। शक्तेरभिधाया एव एतत् सङ्कोचादित्रैविध्यं वृत्तित्वेनैतस्या एव औचित्यादिति भावः। उभयोरपीति। वस्तुतस्तु विनिगमनाविरहादिति भावः ॥२॥

प्लुतिस्तु जहती नाम *प्रसारोऽजहती च सा ।
सङ्कोच उभयी ज्ञेया सम्बन्धादप्यनेकधा ॥३॥

उक्तक्रमप्रातिलोम्येन प्रसिद्धनामाह—प्लुतिरिति। अनेकधेति शक्यलक्ष्ययोः सम्बन्धस्य नानाविधत्वाल्लक्षणापि तथेत्यर्थः ॥३॥

शङ्करलिङ्गं रेवायां शोणेरर्च्यं दिनोदये ।
यतः प्रफुल्लाः पद्मिन्यस्तत्रेत्यादौ यथाक्रमम् ॥४॥

उदाहरणान्याह—रेवायामिति। अत्र रेवाशब्देन तत्तीरे लक्षणा।

---

* प्रस्तार इति पाठान्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थापितस्य ज्योतिर्लिङ्गस्य प्रवाहेऽवस्थानासम्भवादत्र मुख्यार्थबाधः। प्रवाहतीरयोः संयोगसम्बन्धः। रेवाशब्दे जहती नाम लक्षणा। जहत्त्वं शब्दधर्मो लक्षणायामारोप्यते, अन्तर्भावितण्यर्थो वात्र जहातिः, धातूनामनेकार्थत्वात्। अत्र गङ्गायां घोष इति प्रसिद्धोदाहरणं तून्नेयप्रश्नत्वाद् घोषशब्दस्यानेकार्थत्वाच्च सन्दिग्धम्। इदं तु स्पष्टमिति बोध्यम्। शोणैरिति। शोणगुणस्य पूजोपयोगासम्भवात् तद्वति द्रव्ये लक्षणा, सा चाजहती गुणरूपस्य त्यागाभावात्। समवायश्चात्र सम्बन्धः। शोणो धावतीति प्रसिद्धोदाहरणं तून्नेयप्रकरणत्वेनास्पष्टम्, इह तु पूजाप्रकरणात् पद्मिनीसद्भावोक्तेश्च कमलपरत्वेन स्पष्टतरमिति बोध्यम्। पद्मिन्य इति। पद्मिनीशब्देन तदेकदेशेषु जहदजहल्लक्षणा सर्वावयवाप्रफुल्लत्वासम्भवाद् अप्रफुल्लानां त्यागः, प्रफुल्लानां चावयवानां पद्मिनीशब्देन लक्षणया उपस्थितिः, अप्रफुल्लावयवानां प्रत्यक्षेणोपलम्भाद् मुख्यार्थबाधः, समवायश्चात्र सम्बन्धः। प्रफुल्ला इति फुल्ल विकसने इति धातोः पचाद्यचि ज्ञेयम्, "अनुपसर्गात् फुल्ल—" [पा० ८।२।५०] इत्यादिसूत्रं तु धात्वन्तरविषयम्। लक्षणा वेदान्तेषु "तत्त्वमसी"ति महावाक्ये ब्रह्माद्वैतप्रतिपादनाय स्वीकृता। तत्प्रपञ्चस्तु विस्तरभयान्न क्रियते ॥४॥

शक्यलक्ष्यार्थसम्बन्धं लक्षणां तार्किका विदुः।
अन्यैः शक्यान्यसम्बन्धे प्रोक्ता भक्तिः सहायता ॥५॥

शक्येति। लक्षणायाः क्रियारूपत्वात् सम्बन्धस्य तद्भिन्नत्वाच्च तन्मतं विरुद्धमिव भाति इति तदपमर्दकमालङ्कारिकमतमाह। अन्यैरालङ्कारिकैः। शक्यान्यस्य सम्बन्धे। भज्यतेऽनयेति भक्तिः। बाहुलकात् करणे क्तिन् बुद्धयादिशब्दवत्। तस्या लक्षणायाः अभिधायाः सङ्केतस्य एव सहकारित्वमुक्तं न तु तस्मिन्नेव लक्षणात्वमङ्गीकृतमिति भावः ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्ध एव भक्तिश्चेच्छब्दवृत्तिर्न सा भवेत्।
अर्थाश्रयत्वाद्भक्तेस्तु शब्दद्वारार्थगामिता ॥६॥

अत्र युक्तिमाह—सम्बन्ध इति। सम्बन्धस्य क्रियाभिन्नत्वादर्थमात्रनिष्ठत्वाच्च स भक्तेर्भिन्न एवेति भावः। यद्यपि भक्तेरर्थगतत्वमपि स्वीकृतं तथापि प्रदीपप्रभाया घटादिष्विव विषयतामात्रम्, तदवस्थानन्तु शब्द एवेत्याह—शब्दद्वारेति ॥६॥

त्रिविधापि पुनर्द्वेधा निरूढा च फलान्विता।
स्तुवन्ति वाग्भिरर्चन्ति पाणिभिर्नीललोहितम् ॥७॥

भक्तेर्भेदान्तरमाह—त्रिविधेति। निरूढा अनादिसिद्धा। ननु तस्याः शक्तितः किं वैलक्षण्यं मतं कोशादिष्वपि निरूढशक्तिनिवेशो दृश्यते इति चेदुच्यते "स्वान्तं हृन्मानसं मनः" [अमरकोषे] इत्यादौ शरीरावयवरूपमुख्यार्थबाधात् "हृत्प्रतिष्ठम्" इति श्रुत्युक्ताधाराधेयभावादिसम्बन्धाच्च वैलक्षण्यं द्रष्टव्यम्। यस्य तु स्वान्तादिशब्दस्य मुख्योऽर्थो न प्रसिद्धस्तत्र तु शक्तिरेवेति दिक्। फलान्विता—आधुनिकी प्रयोजनप्रतिपत्तये स्वीकृतेत्यर्थः। उदाहरणमाह—वाग्भिरिति। वाक्शब्दोऽत्र शब्दोच्चारणहेतुभूतेन्द्रियस्य वाचकः तज्जन्यत्वाच्छब्दे लाक्षणिकः। पाणिभिरिति। पाणिशब्दः पूजादिसाधनभूतेन्द्रियस्य मुख्यतया वाचकः तदधिष्ठिते हस्तरूपे शरीरावयवे लाक्षणिकः। पूर्वत्र जहल्लक्षणा शब्दानामेव स्तुत्यन्वयात्, उत्तरत्र च निरूढाऽजहल्लक्षणा इन्द्रियतदधिष्ठात्रोरन्वयात् मुख्यार्थपरित्यागेनाधिकारार्थस्वीकारात्। नीललोहितमिति शिवविशेषणं * वामनोक्तन्यायात्। तत्र नीललोहितशब्दे निरूढा जह-

---

* "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति काव्यालङ्कारसूत्रवृत्तौ वामनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दजहल्लक्षणा भागत्यागसद्भावात्। जटिलं शिवमिति पाठ उभयत्रापि निरूढा जहदजहल्लक्षणा द्रष्टव्या। वाग्भिः पठित्वा स्तुवन्ति, पाणिभिरङ्गुल्यग्रैर्गृहीत्वार्चन्तीति प्रयोगे तु शक्तिरेव मुख्यार्थबाधाभावात्। एवं चक्षुरादिशब्दानामधिष्ठाने गुणादिशब्दानां तत्कार्येष्विन्द्रियादिष्वात्मादिशब्दानां तदुपलब्धियोग्येष्वन्तःकरणादिष्वियमेव लक्षणा द्रष्टव्या ॥७॥

प्रासादाः सन्ति रेवायां यष्टयः प्रविशन्ति यत्।
प्रदोषे जनसम्बाधे शम्भावम्भः क्षिपन्ति च ॥८॥

फललक्षणामुदाहरति—प्रासादा इति। रेवायामिति पूर्ववज्जहल्लक्षणा तत्फलन्तु पूजासौकर्यप्रतीतिः। यष्टय इति यष्टिशब्देन यष्टिधरेषु अजहल्लक्षणा तत्फलन्तु गाढसंमर्दप्रतीतिः तेन च स्थलमहिमातिशयप्रतीतिस्ततश्च सेव्यत्वप्रतीतिरिति च। शम्भाविति। शम्भुशब्देन जलक्षेपाधिष्ठानभूते लिङ्गैकदेशमात्रे जहदजहल्लक्षणा, तत्फलं चोक्तमेव ॥८॥

यः श्रुत्योः कुण्डले धत्ते यच्छ्रुती चक्षुषोः स्थिते।
तन्नागभूषणं वन्दे देवदेवं हृदि स्थितम् ॥९॥

गूढव्यङ्ग्यामुदाहृत्यागूढव्यङ्ग्यामुदाहरति—य इति श्रुत्योरिति। श्रुतिशब्देन कर्णाधोभागे जहल्लक्षणा, तत्फलन्तु सच्छिद्रतया धारणक्षमत्वप्रतीतिः तच्चागूढं झटिति प्रतीतेः। ययोः कुण्डलयोः श्रुती यच्छ्रुती श्रोत्रेन्द्रियमित्यर्थः। चक्षुषोश्चक्षुरिन्द्रियाधिष्ठितगोलकयोः स्थिते चक्षुःशब्देन तदधिष्ठाने जहल्लक्षणा, तत्फलन्तु चक्षुःश्रोत्रयोः सामानाधिकरण्यप्रतीतिः, तच्च पूर्ववत् सर्पाणां चक्षुःश्रवस्त्वादिति भावः। नागभूषणशब्देन नागाधिष्ठितावयवमात्रे जहदजहल्लक्षणा, एतत्फलं त्वलौकिकस्वभावत्वावगतिः तच्च प्राग्वत्। देवदेवमित्यत्र द्वितीयदेवशब्देन तत्सदृशे लक्षणा, सा चार्थान्तरसंक्रमितवाच्यस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्वनेर्मूलम्। हृदिस्थितमिति। हृच्छब्देन मनसि लक्षणा। सा चात्यन्ततिरस्कृतवाच्यस्य ध्वनेर्मूलम् इति प्रसङ्गादुदाहरणे दर्शिते। निरूढापि फलवती स्याद्विवक्षावशादिति चोक्तं भवति। हृदिस्थितमित्यत्र सान्निध्यप्रतीतिरूपफलस्य विवक्षितत्वादिति ॥९॥

निरूढा भक्तिरचला गूढागूढा च नापरा।
क्रमेण दर्शितान्येऽपि भेदाः सन्ति ब्रवीमि तान् ॥१०॥

निरूढेति। अचला व्यङ्ग्यार्थरहिता परा फलवती गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति। एवं व्यधिकरणपदविषया लक्षणा नवविधा, अन्यापि समानाधिकरणविषया इत्यर्थाल्लभ्यते ॥१०॥

सारोपा सा मता यत्र विषयी विषयान्वितः।
ज्ञेया साध्यवसाना सा विषयो यत्र केवलः ॥११॥

सारोपेति। विषयी आरोप्यमाणः, विषयस्त्वारोपगोचरः, तावुभावपि यत्र सामानाधिकरण्येन निर्दिष्टौ भवतः सा सारोपा। आरोप्यमाणेन सह वर्त्तमाना सारोपा। भेदे सत्यभेदकल्पनमारोपः। यत्र च विषयो न निर्दिश्यते तत्र साध्यवसाना। अध्यवसानेन सह वर्त्तमाना साध्यवसाना। अध्यवसानमाहार्यनिश्चयः। स तु भेदमनिर्दिश्याभेदकल्पनारूपः। ननु तत्त्वमसीतिवाक्ये सारोपा साध्यवसाना वा? नाद्यः, आरोपस्य मुखपङ्कजादिभिन्नपदार्थविषयत्वाज्जीवपरमात्मनोस्तात्त्विकाभेदस्यारोपशब्दवाच्यत्वाभावाच्च। नापि द्वितीयः विषयविषयिणोरुभयोरपि निर्देशाद् विषयिमात्रनिर्देशस्य तत्राकाङ्क्षितत्वाच्च। अत्रोच्यते, यत्र समानाधिकरणस्थले आरोपोऽध्यवसानं वा तत्रैव लक्षणेति न नियमः किन्तु प्रयोगप्रायादभेदकल्पनामात्रं तेनारोपाध्यवसानयोरसम्भवेऽपि भागत्यागलक्षणामात्रं न निषिध्यते। ननु तर्हि सारोपासाध्यवसानयोर्यथार्थभेदाभावेऽपि अधिकभेदप्रसक्तिः स्यादिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेन्न, छत्त्रिन्यायेन गौण्या वा यथार्थभेदस्यारोपत्वसम्भवादिति दिक्।
अत्र सम्बन्धत्रयविचारविशेषस्तु वेदान्तशास्त्रादवगन्तव्यः ॥११॥

कार्य्यकारणभावादौ भेदौ शुद्धाविमौ स्मृतौ ।
सादृश्ये सति गौणौ च शक्यलक्ष्यगुणाश्रयात् ॥१२॥

कार्य्येति। शुद्धाविति। साक्षात्सम्बन्धहेतुकावित्यर्थः। गौणौ गुणकृतौ अमुख्यौ परम्परासम्बन्धाश्रयत्वात् ॥१२॥

निरूढा शुद्धसारोपा शिवं शम्भुं भजेदिति ।
शिवं भजेदिति परा कार्य्यकारणभावतः ॥१३॥

निरूढेति। शिवं कल्याणकरं शम्भु विशेषणमेतत्, न तु तन्नामधेयं पुनरुक्त्यापत्तेः, कल्याणकरत्वात् रुद्रः शिव इति प्रसिद्धमेव। शिवमिति अतिप्रसिद्धतया शम्भोरप्रयोगाद्विषयिमात्रनिर्देशः। यदि तु व्युत्पत्तिराश्रीयते तदा शिवशब्दः शुक्लादिशब्दवत् शक्तेरेवोदाहरणम्, अव्युत्पत्तिपक्षे तु लक्षणाया एवेति सिद्धान्तः ॥१३॥

स्त्रीरत्नं गिरिजा सैषा रत्नं संसारवारिधेः ।
निरूढा गौणसारोपान्या च सादृश्ययोगतः ॥१४॥

स्त्रीरत्नमिति। स्त्री रत्नमिव मणिरिवेत्युपमितसमासः। "रत्नं श्रेष्ठे मणावपि" इति वैजयन्ती। इत्युपमितसमासे रत्नसदृशी स्त्रीति शाब्दबोधाच्छक्तिरेव न लक्षणा। स्त्री एव रत्नं स्त्रीरत्नमिति मयूरव्यंसकादिसमासे तु लक्षणैव। यद्यपि "रत्नं श्रेष्ठे मणावपी"ति कोषात् सप्तमीतत्पुरुषोऽपि प्रतिभाति तथापि समासात् पूर्वं श्रेष्ठवाचकत्वाभावेन स न भवति। तथोक्तमभिधानचिन्तामणौ—

स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिका ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मचर्चिका प्रकाण्डोद्गौ प्रशस्यार्थप्रकाशकाः ॥

इति प्रशंसावचनैश्च [पा० २।१।६६] इति सूत्रस्य मतल्लिकादिपञ्चकपरत्वाच्च उक्त एव समासो न्याय्य इति दिक्। वस्तुतस्तु स्त्रीरत्नमिति व्यस्तमिवोदाहरणं वैयाकरणमते वृत्तौ समुदायशक्तिमाश्रित्य लक्षणानङ्गीकारात्। सैषेति सामान्यनिर्देशः सादृश्यसम्बन्धाद् गौणी ॥१४॥

मुक्तिः शिवस्य पूजेव हे मुक्ते मा जहीहि माम्।
फलिनी शुद्धसारोपान्या च बीजफलत्वतः ॥१५॥

मुक्तिरिति। मुक्तिकारणमित्यर्थः। लक्षणाफलं तु मुख्यसाधनताप्रतीतिरादरातिशयप्रतीतिश्च। बीजं कारणं फलञ्च कार्य्यं तत्सम्बन्धत्वात् ॥१५॥

शिवपूजा मम प्राणा हे प्राणा विरताः स्थ मा।
फलिनी गौणसारोपा परा च सदृशत्वतः ॥१६॥

शिवपूजेति। अत्र लक्षणाफलन्तु महिमातिशयप्रतीतिरादरातिशयप्रतीतिश्च। विरता विरामं प्राप्ताः। मा स्थ मा भवत। चेतनं मे जीवितं स्यात्। अन्यथा तु श्वसनं न जीवितमिति भावः॥१६॥

सम्बन्धान्तरतो भेदाः स्वयमूह्याः परेऽपि च।
अक्षो रुद्राय रुद्रो हि गृहाः शम्भोश्च पार्वती ॥१७॥
तादर्थ्यादिह ताच्छब्द्यात् तात्स्थ्यात्ताच्छब्द्यमित्यपि।
रुद्रस्य सेवका रुद्राः सेव्यसेवकभावतः ॥१८॥

सम्बन्धान्तरत इति। कार्य्यकारणभावादावित्यत्रादिशब्दात् सामान्यविशेषभावादिसम्बन्धविशेषनिमित्तका भेदाः स्वबुद्ध्या विविच्य विज्ञेया इत्यर्थः। दिङ्मात्रं चोदाह्रियते। अक्ष इति। रुद्राय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुद्रसेवनाय। हेतुहेतुमद्भावोऽत्र सम्बन्धः। रुद्रसेवनस्य तद्वारक-पुरुषजन्यत्वात्। कार्यकारणभावादस्य भेदः। इन्द्रार्था स्थूणा इन्द्र इति प्रसिद्धोदाहरणेऽप्येवमेव। गृहा इति। अत्राधाराधेय-भावः सम्बन्धः। पूर्वत्र तादर्थ्यात्ताच्छब्द्यम् इह तु तात्स्थ्यात् तत्र स्थितत्वात्। रुद्रस्येति सेवका याजका इत्यर्थः। नारुद्रो रुद्रमर्चयेदिति स्मृतः ॥१७॥१८॥

आधेयाधारभावेन प्रासादो रुद्र इष्यते।
तद्वाच्यवाचकत्वे च भवेल्लक्षितलक्षणा ॥१९॥

आधारेति। तस्य पूज्यत्वोपदेशादिति भावः। पूर्वत्र आधार-वाचिलक्षक इह तु आधेयवाचिलक्षक इति भेदः। तद्वाच्यवाचकत्व इति। तस्य द्व्यक्षरादेर्वाच्यो मांसादिशब्दः स वाचको यस्य स तद्वा-चकः आमिषादिस्तस्य भावस्तत्त्वं तेन तथोक्तेन। लक्षितेति। लक्षिते दूरान्नचीकृते लक्षणा लक्षितलक्षणेत्यन्वर्थाभिधानेयम् ॥१९॥

गुञ्जद्विरेफैः पुष्पौघैः पूज्यो भक्तैः शिवो यथा।
द्व्यक्षरं मांसमित्यादौ निरूढेष्वेव नान्यतः ॥२०॥

एषा निरूढेष्वेव सम्भवतीति स्फुटयितुं पुनरुदाहरति—गुञ्ज-द्विरेफैरिति। द्विरेफशब्दो हि योगरूढ्या भ्रमरशब्दवाची। तस्य द्विरेफशब्दस्य षट्पदे लक्षितलक्षणा ॥२०॥

विरुद्धाव्यतिरेकि च लक्षणोक्ता मनीषिभिः।
इह साधु कृतं तेन शम्भुर्येन न पूजितः ॥२१॥

विरुद्धेति। व्यतिरेके वैपरीत्ये। साधुकृतं साधुशब्देन तद्विप-रीते लक्षणा। व्यतिरेकलक्षणामपीमां वदन्ति। फलवती चेयं न निरूढा ॥२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धबुद्धिजनकः सम्बन्धो विविधो मतः ।
शब्दप्रमाणगा वृत्तिर्लक्षणा तन्निबन्धना ॥२२॥

सम्बन्धं लक्षयति—सम्बन्धेति । इमौ सम्बन्धाविति बुद्धेर्हेतुः सम्बन्ध इति लक्षणं शब्दरूपं यत्प्रमाणं प्रमाकरणम् । करणे च व्यापारावश्यम्भावात् तद्गता वृत्तिर्लक्षणा सम्बन्धमूलैव न तु सम्बन्ध एव लक्षणेति भावः ॥२२॥

स नित्यः समवायाख्यः सहजोऽवयवादिषु ।
गुणः क्रिया च सामान्यं विशेषोऽवयवादयः ॥२३॥

स इति । अवयवादिष्वयुतसिद्धेषु । तल्लक्षणं चोक्तं तर्कशास्त्रे—तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोरनश्यदेकमपराश्रितमेवावतिष्ठते इति । अन्यच्च अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्यः सम्बन्धः स समवाय इति । गुण इति । अवयवादयः पञ्च तद्वत्सु समवायसम्बन्धेन लाक्षणिका इत्यर्थः ॥२३॥

संयोगो युक्तधीहेतुर्द्रव्ययोः क्रियया कृतः ।
विशिष्टबुद्धिजनकः स्वस्वामित्वादिकोऽपरः ॥२४॥

संयोग इति । इमौ संयुक्ताविति बुद्धेर्हेतुर्गुणः स द्रव्ययोरेव नान्येषाम् । क्रियया कृतो न तु स्वाभाविकः । विशिष्ट इति । अयमनेन विशिष्ट इति बुद्धिजनकः । अपरोऽन्यः ॥२४॥

व्यतिरेकोऽपि सम्बन्धो विपरीतमतिप्रदः ।
सादृश्यमपि सम्बन्धस्तथा तद्वाच्यवाच्यता ॥२५॥

व्यतिरेकेति । असौ विरुद्धयोरिव सादृश्यमिति अयं तुल्ययोरेव । तद्वाच्येति तस्य प्रकृतस्य वाच्यः शब्दविशेषस्तस्य वाच्यताभिधेयता । अयं पूर्वोक्तप्रकारान्नातिरिच्यते । समासमात्रभेदेऽप्यर्थभेदाभावात् ॥२५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेषां लक्षणीयोऽर्थे सम्भवस्तर्क्यतां स्वयम् ।
मुख्यस्यार्थस्य यद्धेतोर्लक्षणां शब्द आश्रयेत् ॥२६॥

एतेषामिति। उक्तासम्बन्धानां सम्भवः स्वयं तर्क्यताम् औचित्येन विभाव्यतामित्यर्थः। यद्धेतोर्यस्मात् सम्बन्धाद्धेतोः ॥२६॥

सारोपायां गुणो लक्ष्यो विषयिणो न तच्छ्रुतेः ।
एवं साध्यवसानायां गुणो लक्ष्यो गुणान्वितः ॥२७॥
सारोपायामभेदेन गुणा लक्ष्या द्वयोरपि ।
अन्यस्यां गुणो भेदेन गुणा एवाभिदाजुषः ॥२८॥

सारोपायां साध्यवसानायाञ्च विशेषमाह—सारोपायामिति। मुखं चन्द्र इत्यादौ गुणा आह्लादकत्वादयो न तु विषयिणः (शीतलकिरण-मृगाङ्कत्वादयः) तद्वाचकपदश्रवणात्। साध्यवसानायाञ्च चन्द्रोऽय-मित्यादौ तु गुणैः सहितो विषयी लक्ष्यः तद्वाचकपदस्याश्रवणात्। मुखं चन्द्र इत्यादौ आह्लादकत्वादयो अभेदेन लक्ष्याः अभेदस्य विवक्षा-धीनत्वात् चन्द्रोऽयमित्यादौ तु विषयस्यापि गुणैः सहितस्याभेदेन लक्षणीयत्वं बोध्यम्, अन्यथा विरम्य लक्षणाया अप्रवृत्तेरिति भावः ॥२७॥२८॥

रूपकादिषु सारोपा यत्र शब्दावुभावपि ।
रूपकातिशयोक्त्यादौ परारोप्यपदश्रुतेः ॥२९॥

अनयोर्विषयविभागमाह—रूपकेति। आदिशब्दान्निदर्शनादयो गृह्यन्ते। रूपकेति। आदिशब्दादप्रस्तुतप्रशंसादयो गृह्यन्ते। आरोप्य-पदस्य विषयिवाचकमात्रस्य श्रवणमित्यपरा साध्यवसाना ॥२९॥

सादृश्यश्लथताभावः सारोपायाः फलं मतम् ।
सादृश्यातिशयोऽन्यस्या विषयस्तुतिहेतवे ॥३०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सादृश्येति। फलवत्याः सारोपायाः सादृश्यसम्बन्धतायाः अभावः फलं व्यङ्ग्यार्थरूपं प्रयोजनम्। अन्यस्याः स्तुतिविषयस्तुतिहेतवे विषयगुणप्रशंसार्थमित्यर्थः। विषयगुणानामपकृष्टत्वं विषयिगुणानां चोत्कृष्टत्वमित्यालङ्कारिकसिद्धान्तः; अभेदारोपे चापकृष्टानामप्युत्कृष्टत्वमर्थसिद्धमिति। तत्र बीजं तु लक्षणाव्यङ्ग्यः सादृश्यातिशय इति भावः। सादृश्यं हि अदृढमुपमादिषु दृढञ्च रूपकादिषु दृढतरमतिशयोक्त्यादिषु। यत्र च विषयस्य अल्पा प्रशंसा तत्र दृढम्। यत्राधिका सा तत्र दृढतरमिति विवेकः ॥३०॥

ताद्रूप्याभेदयोराहुः फलत्वमुभयोः क्रमात्।
तत्तु शब्दान्तरालाभाद्विरोधाच्च न मन्यताम् ॥३१॥

ताद्रूप्येति। अत्र केचित् ताद्रूप्यप्रतीतिः सारोपाया अभेदप्रतीतिश्च साध्यवसानायाः फलमिति विभिन्नमाहुस्तत्तु न मन्तव्यम्। "साध्वीयमपरा लक्ष्मीः" [कुवलयानन्दे २०] इत्यादावपरादिशब्दस्य ताद्रूप्यप्रत्यायकत्वात्। "अयं हि धूर्जटिः साक्षात्" [कुव ८] इत्यादौ साक्षाच्छब्दादेरभेदप्रत्यायकत्वाच्चेति भावः। किञ्चाभेदरूपके ताद्रूप्यरूपके च सारोपायां फलद्वयस्यापि सम्भवात् द्विविधातिशयोक्तौ च साध्यवसानायां तथैव सम्भवाच्च प्रत्येकं फलत्वकल्पनायोगादिति भावः ॥३१॥

सर्वनामविशिष्टस्य निर्देशे प्रथमा मता।
अविशिष्टस्य निर्देशे परेति कवयो विदुः ॥३२॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणधुरीणरामजिभट्टात्मजागाधरभट्टविरचितकोविदानन्दे भक्तिनिर्णये द्वितीयपरिच्छेदः समाप्तः॥

सर्वनामेति। इदं चन्द्र इत्यादौ मुखत्वादिविशेषविशिष्टवस्तु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परेण इदंशब्दादिना निर्देशे सारोपा, अयं चन्द्र इत्यादौ मुखत्वादिविशेषपरिहारेण सामान्यरूपेणारोप्यमाणचन्द्राद्यभेदेन निर्देशे साध्यवसाना इति भेदः। अत्र जहत्यादिविचारस्तु विस्तरभयान्न कृतः ॥३२॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणधुरीणरामजिभट्टात्मजाशाधरभट्टविरचितायां कादम्बिनीसमाख्यायां स्वकृतकोविदानन्दव्याख्यायां लक्षणापरिच्छेदो द्वितीयः ॥

सप्तपातालोपवर्णनम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—श्रीवसन्तकुमार-रायविद्यारत्नः]

अमराणाञ्च परमां श्रियञ्चातिशयन्ति च ।
यत्र नैव भयं क्वापि कालाङ्गैर्दिनरात्रिभिः ॥
यत्राहिप्रवराणाञ्च शिरस्थैर्मणिरश्मिभिः ।
नित्यं तमः प्रबाध्येत सदा प्रस्फुटकान्तिभिः ॥
न वा एतेषु वसतां दिव्यौषधिरसायनैः ।
रसान्नपानस्नानाद्यैर्नाधयो व्याधयो न च ॥
वलीपलितजीर्णत्वं वैवर्ण्यं स्वेदगन्धता: ।
अनुत्साहवयोऽवस्था न बाधन्ते कदाचन ॥
कल्याणानां सदा तेषां न च मृत्युभयं कुतः ।
भगवत्तेजसोऽन्यत्र चक्राच्चैव सुदर्शनात् ॥
यस्मिन् प्रविष्टे दैतेयवधूनां गर्भराशयः ।
प्रायो भयात् पतन्त्येव स्रवन्ति ब्रह्मपुत्रक ॥

इति श्रीदेवीभागवते अष्टमस्कन्धे अष्टादशोऽध्यायः ।

प्रथमे विवरे विप्र अतलाख्ये मनोरमे ।
मयपुत्रो बलो नाम वर्त्ततेऽखर्व्वगर्व्वकृत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षण्णवत्यो येन सृष्टा मायाः सर्व्वार्थसाधिकाः ।
मायाविनो याश्च सद्यो धारयन्ति च काश्चन ॥
जृम्भमाणस्य यस्यैव बलस्य बलशालिनः
स्त्रीगणा उपपद्यन्ते त्रयो लोकविमोहनाः ॥
पुंश्चल्यश्चैव स्वैरिण्यः कामिन्यश्चेति विश्रुताः ।
सा वै विलायनं प्रेष्ठं प्रविष्टं पुरुषं रहः ॥
रसेन हाटकाख्येन साधयित्वा प्रयत्नतः ।
स्वविलासावलोकानुरागस्मितविगूहनैः ॥
संलापविभ्रमाद्यैश्च रमयन्त्यपि ताः स्त्रियः ।
यस्मिन्नुपयुक्ते जनो मनुते बहुधा स्वयम् ॥
ईश्वरोऽहमहं सिद्धो नागायुतबलो महान् ।
आत्मानं मन्यमानः सन् मदान्ध इव कत्थते ॥
द्वितीयविवरस्यात वितलस्य निबोधत ।
भूतलाधस्तले चैव वितले भगवान् भवः ॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः ॥
भवयोर्वीर्य्यसम्भूता हाटकी सरिदुत्तमा ।
समिद्धो मरुता वह्निरोजसा पिबतीव हि ॥
तन्निर्धूतं हाटकाख्यं सुवर्णं दैत्यवल्लभम् ।
दैत्याङ्गना भूषणार्हं सदा सन्धारयन्ति हि ॥
तद्विलाधस्तलात् प्रोक्तं सुतलाख्यं विलेश्वरम् ।
पुण्यश्लोको वलिर्नाम आस्ते वैरोचनिर्मुने ॥
एवं दैत्यपतिः सोऽयं बलिः परमपूजितः ।
सुतले वर्त्तते यस्य द्वारपालो हरिः स्वयम् ॥
इति श्रीदेवीभागवते अष्टमस्कन्धे एकोनविंशोऽध्यायः ।
ततोऽधस्ताद्विवरकं तलातलमुदीरितम् ।
दानवेन्द्रो मयो नाम त्रिपुराधिपतिर्म्महान् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यो मायिनां सोऽयं नानामायाविशारदः ।
पूज्यते राक्षसैर्घोरैः सर्व्वकार्य्यसमृद्धये ॥
ततोऽधस्तात् सुविख्यातं महातलमिति स्फुटम् ।
सर्पाणां काद्रवेयाणां गणः क्रोधवशो महान् ॥
अनेकशिरसां विप्र प्रधानान् कीर्त्तयामि ते ।
कुहकस्तक्षकश्चैव सुषेणः कालियस्तथा ॥
महाभोगा महासत्त्वाः क्रूराः क्रूरखजातयः ।
पतत्रिराजाधिपतेरुद्विग्नाः सर्व्व एव ते ॥
सकलत्रापत्यसुहृत् कुटुम्बस्य च सङ्गताः ।
प्रमत्ता विहरन्त्येव नानाक्रीडाविशारदाः ॥
ततोऽधस्ताच्च विवरे रसातलसमाह्वये ।
दैतेया निवसन्त्येव पणयो दानवाश्च ये ॥

* * * *

ततोऽप्यधस्तात् पाताले नागलोकाधिपालकाः ॥

* * * *

महामर्षा महाभोगा निवसन्ति विषोल्वणाः ॥
पञ्चमस्तकवन्तश्च फणासप्तकभूषिताः ।
केचिद्दशफणाः केचित् सप्तशीर्षास्तथापरे ॥
सहस्रशिरसः केऽपि केचित्तु मणिधारकाः ।
पातालरन्ध्रतिमिरनिकरं स्वमरीचिभिः ॥
विधमन्ति च देवर्षे सदा सञ्जातमन्यवः ।
अस्य मूलप्रदेशे हि त्रिंशत्साहस्रकेऽन्तरे ॥
योजनैः परिसंख्याते तामसी भगवत्कला ।
अनन्ताख्या समास्ते हि सर्व्वदेवप्रपूजिता ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता—ओरियेण्टाल सिरिज

१ । **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग नगरादिनिर्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगीऽयं ग्रन्थः—२॥०)

२ । **चाणक्यराजनीतिशास्त्रम्**—विद्वर-जोहान् फ्यान्ष्यानेन-कृताङ्गलभूमिका-समेतम्—॥৵০

३ । **मुक्ताफलम्**—वोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेय-तया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ-लाहा पि-एच, डि, लिखित-बृहदाङ्गलभूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४ । **चाणक्यकथा**—रविनर्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनावृत्तिः)—१)

५ । **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तकविरचितं स्वोपज्ञवृत्तिसमन्वितमतिप्रमाणभूत-मलङ्कारशास्त्रम् डाः श्रीसुशीलकुमार दे डि लिट् महोदयेन संशोधितम्—३॥०)

६ । **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मक-शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चाथ वङ्गदेशोपलब्धं हस्तलिखितमादर्शमाश्रित्य संशोधितमध्या-पक—श्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य। मूल्य—१)

७ । **जयमङ्गला**—श्रीशङ्कराचार्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२)

८ । **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रविदिति प्रकाते वस्तुम्—३)

৯। **ব্রহ্মসূত্রম্**—শ্রীমদ্ভাগবতভাষ্যসমেতম্। "অর্থোঽয়ং ব্রহ্মসূত্রাণাং শ্রীমদ্ভাগ-বতাভিধঃ" ইতি গারুড়বচনস্য যাথার্থ্যং প্রদিদর্শয়িষতা পণ্ডিত—শ্রীহরিদাসবিদ্যা-বাগীশেনাত্র শ্রীমদ্ভাগবতগ্রন্থাদুদ্ধৃতা গ্রন্থাংশব্রহ্মসূত্রভাষ্যতয়া নিরূপিতাঃ, ব্রহ্ম-সূত্রাণি চ বঙ্গভাষয়া বিশেষেণ ব্যাখ্যাতানি—২॥০

प्राप्तिस्थानम्—ओरियेण्टाल प्रेस

१०७ नं मेछुयाबाजार ष्ट्रीट, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ভট্ট-গুণবিষ্ণু প্রণীত

ছান্দোগ্যমন্ত্রভাষ্য

শ্রীদুর্গামোহন ভট্টাচার্য্য কাব্য-সাংখ্য-পুরাণতীর্থ,
এম.এ সম্পাদিত

(মঃ মঃ ডাঃ শ্রীগঙ্গানাথ ঝা, এম-এ, ডি-লিট্ মহোদয় লিখিত মুখবন্ধ সংবলিত)

অভিমত—

বঙ্গবাসী—"...এই অত্যাবশ্যক গ্রন্থ-প্রকাশে সংস্কৃত-সাহিত্য-পরিষৎ নিষ্ঠাবান্ হিন্দুমাত্রের কৃতজ্ঞতাভাজন হইলেন। গ্রন্থের সম্পাদক মহাশয় অনেকগুলি আদর্শ পুথির সহায়তায় পরিশ্রম-সহকারে সংহিতা, ব্রাহ্মণ প্রভৃতি আকর-গ্রন্থের সহিত মিলাইয়া মন্ত্রের পাঠ নির্ণয় করিয়াছেন . বিভিন্ন পুথির পাঠান্তর নির্দ্দেশ করিয়াছেন এবং গুণবিষ্ণুর সহিত সায়ণীয় পাঠের ভেদ থাকিলে তাহাও দেখাইয়াছেন। ..গ্রন্থশেষে "আকর সঙ্কেতিকা" নামক পরিশিষ্টে প্রত্যেক মন্ত্রের মূলস্থান এবং বিনিয়োগ-প্রমাণ প্রদর্শিত হইয়াছে ; যে সকল মন্ত্র বিভিন্ন বেদীয় গ্রন্থে বিভিন্নরূপে পঠিত হয়, তাহাও এই আকর-সঙ্কেতিকায় সঙ্কেতিত হইয়াছে।...অতি প্রয়োজনীয় টিপ্পনী, ভূমিকা ও পরিশিষ্টের দ্বারা ইহার উপযোগিতা সবিশেষ বৰ্দ্ধিত হইয়াছে।"

বসুমতী—"...এই সর্ব্বাঙ্গসুন্দর পুস্তকখানি যেমন আনুষ্ঠানিক হিন্দুর পক্ষে পরমোপযোগী হইবে, তেমনই বেদবিদ্যানুশীলন-তৎপর ইতিহাস-জিজ্ঞাসুর পক্ষে আদরণীয় হইবে। ভাষ্যকারের বঙ্গীয়ত্ব-হেতু এই গ্রন্থ বাঙ্গালীর গৌরবের বস্তু। . তথ্যপূর্ণ ভূমিকা-রচনা, অত্যাবশ্যক অনুক্রমণিকা-সন্নিবেশ এবং সুনিপুণ গ্রন্থ-সম্পাদনের দ্বারা সম্পাদক মহাশয় তাঁহার বিদ্যাবত্তা, শ্রমশীলতা ও সাবধানতার পরিচয় দিয়াছেন।"

मञ्जु-भाषिणी

इयमेकैव जगति संस्कृतभाषामयी 'साप्ताहिकी' वृत्तान्तपत्रिका। संस्कृतभाषा-ग्रन्थ-प्रकाशकानाम् अनुत्तमं विज्ञापनसाधनम्। सर्वदेशेषु प्रचलति।

भारत-ब्रह्मदेश-लङ्का-वासिभिर्देयं वार्षिकं मूल्यम्—३-०-० ; अन्यदेशीयैर्देयमूल्यं ६ शिलिंग।

मैनेजर—मञ्जुभाषिणी
CONJEEVERAM (Madras.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Reg. No C 1073.
Vol. XIV, No. 5.] [September, 1931.

१८५३ शकीये भाद्रे १४श-वर्षस्य ५म-सं[illegible]

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री, एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्, श्यामबाजार, कलिकाता। वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishad, Shyambazar, Calcutta

Printed at
Siddheswar Press,
39/2, Shibnarayan Das's Lane, Calcutta.

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকা[লে] কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মা[থায়] মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা, প্রভৃতি উপসর্গ বিদূরিত হ[য়]। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থের গৃহেও কেশরঞ্জনের সমাদর। আপ[নি] ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়া[ছে], অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জী[বন] রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ[্মান] (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারি[ত] হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বল[তা] নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔ[ষধ] অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষে এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগে[র] নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎ[সা] দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

প্রাপ্তিস্থান—

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

September, 1931.	१८५३ शकीये भाद्रे १४वर्षस्य ५म-संख्या	Vol. XIV, No. 5.

कविप्रवरः पाणिनिः

प्रियपाठकमहाभागाः, अद्य समुपक्रियन्ते भवद्भ्यः कतिचन श्लोकरत्नानि येषां निर्माता शाब्दिकप्रवरः पाणिनिरिति जोघुष्यते शाब्दिकैरालङ्कारिकैश्च। श्लोका इमे प्रायेण सुभाषितग्रन्थेषु समुपलभ्यन्ते, केचन व्याकरणाभिधानानां टीकास्वपि सन्दृश्यन्ते। तत्र पाणिनिना महर्षिणा जाम्बवतीविजयः पातालविजयश्च महाकाव्यद्वितयं व्यरचीति सुप्रचारैवेयं किंवदन्ती भारते वर्षे। तथाहि राजशेखरसूक्तिः—

स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः।
आदौ व्याकरणं काव्यमनु जाम्बवतीजयम् ॥

क्षेमेन्द्रेणापि सुवृत्ततिलके पाणिनेरुपजातिच्छन्दोग्रथने सविशेषं नैपुण्यं प्रतिपादितम्। तथा च सुवृत्ततिलकस्य तृतीये विन्यासे त्रिंशत्तमः श्लोकः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्पृहणीयत्वचरितं (?) पाणिनेरुपजातिभिः ।
चमत्कारैकसाराभिरुद्यानस्येव जातिभिः ॥

तथा च सदुक्तिकर्णामृते—

सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते
धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोऽपि हृदयम् ।
विशुद्धोक्तिः शूरः प्रकृतिमधुरा भारविगिर-
स्तथाप्यन्तर्मोदं कमपि भवभूतिर्वितनुते ॥

रुद्रटविरचितकाव्यालङ्कारटीकायां नमिसाधुरपि "अपशब्दनिरासश्च यद्यपि व्युत्पत्तिद्वारेणैव कृतस्तथापि महाकवीनामप्यपशब्दपातदर्शनात् तन्निरासादरख्यापनाय पुनरभियोगः । तथाहि पाणिनेः पातालविजये महाकाव्ये—'सन्ध्यावधूं गृह्य करेण' त्यत्र गृह्येति क्त्वो ल्यवादेशः । तथा तस्यैव कवेः—

गतेऽर्धरात्रे परिमन्दमन्दं गर्जन्ति यत् प्रावृषि कालमेघाः ।
अपश्यती वत्समिवेन्दुबिम्बं तच्छर्वरी गौरिव हुङ्करोति ॥

इत्यत्र पश्यतीति नुमन्तोनकारं पदम्" इति ।

आनन्दवर्धनाचार्येणापि ध्वन्यालोकस्य प्रथमोद्योते नामानिर्देशपूर्वकं पाणिनीयः कश्चन श्लोकः समुद्धृतः । तद् यथा—"समासोक्तौ तावत्—

उपोढरागेण विलोलतारकं
तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया
पुरोऽपि रागाद् गलितं न लक्षितम् ॥

इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन प्रतीयते समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात् इति ।" सुभाषितावल्यां शार्ङ्गधरपद्धतौ सदुक्तिकर्णामृते च श्लोकोऽयं पाणिनीयत्वेन निर्दिष्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीपतिदत्तविरचिते कातन्त्रपरिशिष्टेऽपि दृश्यते—जाघटीतीति जाम्बवतीविजयकाव्ये, जाज्वलीतीति नीतिसंग्रहे, शंशमाञ्चक्रुरिति भट्टिकाव्ये च पठ्यते। भागवृत्तिकारस्तु बोभवीत्येव न छान्दसमिति मन्यते इति।

इदानीं पाणिनीयत्वेन प्रसिद्धाः श्लोकाः सुभाषितादिग्रन्थेभ्यो निष्कृष्य विलिख्यन्ते।

(१) असौ गिरेः शीतलकन्दरस्थः
पारावतो मन्मथचाटुदक्षः।
घर्मालसाङ्गीं मधुराणि कूजन्
संवीजते पक्षपुटेन कान्ताम्॥

(२) उद्बुद्धेभ्यः सुदूरं घनजनिततमःपूरितेषु द्रुमेषु
प्रोद्ग्रीवं पश्य पादद्वयनमितभुवः श्रेणयः फेरवाणाम्।
उल्कालोकैः स्फुरद्भिर्निजवदनदरीसर्पिभिर्वीक्षितेभ्य-
श्छ्रोतत्सान्द्रं वसाम्भः क्वथितशववपुर्मण्डलेभ्यः पिबन्ति॥

(३) चञ्चत्पक्षाभिघातं ज्वलितहुतवहप्रौढधाम्नश्चितायाः
क्रोडादाकृष्टमूर्त्तेरहमहमिकया चण्डचञ्चुग्रहेण।
सद्यस्तप्तं शवस्य ज्वलदिव पिशितं भूरि जग्ध्वार्धदग्धं
पश्यान्तः प्लुष्यमाणः प्रविशति सलिलं सत्वरं गृध्रवृन्दः॥

(४) कह्लारस्पर्शगर्भैः शिशिरपरिचयात् कान्तिमद्भिः कराग्रै-
श्चन्द्रेणालिङ्गितायास्तिमिरनिवसने स्रंसमाने रजन्याः।
अन्योन्यालोकिनीभिः परिचयजनितप्रेमनिस्यन्दिनीभि-
र्दूरारूढे प्रमोदे हसितमिव परिस्पष्टमाशासखीभिः॥

(५) पाणौ पद्मधिया मधूककुसुमभ्रान्त्या तथा गण्डयो-
र्नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे।
लीयन्ते कबरीभरे निजकुलव्यामोहजातस्पृहा
दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि रक्षिष्यसि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६) पाणौ शोणतले तनूदरि दरक्षामा कपोलस्थली
विन्यस्ताञ्जनदिग्धलोचनजलैः किं म्लानिमानीयते।
मुग्धे चुम्बतु नाम चञ्चलतया भृङ्गः क्वचित् कन्दली-
मुन्मीलन्नवमालतीपरिमलः किं तेन विस्मर्य्यते॥

(७) मुखानि चारूणि घनाः पयोधरा
नितम्बपृथ्व्यो जघनोत्तमश्रियः।
तनूनि मध्यानि च यस्य सोऽभ्यगात्
कथं नृपाणां द्रविडीजनो हृदः॥

(८) गतेऽर्धरात्रे परिमन्दमन्दं
गर्जन्ति यत् प्रावृषि कालमेघाः।
अपश्यती वत्समिवेन्दुबिम्बं
तच्छर्वरी गौरिव हुङ्करोति॥

(९) प्रकाश्य लोकान् भगवान् स्वतेजसा
प्रभादरिद्रः सवितापि जायते।
अहो चला श्रीर्वलमानदामहो
स्पृशन्ति सर्वं हि दशाविपर्य्यये॥

(१०) शुद्धस्वभावान्यपि संहतानि
निनाय भेदं कुमुदानि चन्द्रः।
अवाप्य वृद्धिं मलिनान्तरात्मा
जडो भवेत् कस्य गुणाय वक्रः॥

(११) त्वपाः चामीकृत्य प्रसभमपहृत्याम्बु सरितां
प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलम्।
क्व संप्रत्युष्णांशुर्गत इति समालोकनपरा-
स्तडिद्दीपालोका दिशि दिशि चरन्तीह जलदाः॥

(१२) ऐन्द्रं धनुः पाण्डुपयोधरेण
शरद्दधानार्द्रनखक्षताभम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसादयन्ती सकलङ्कमिन्दुं
तापं रवेरभ्यधिकं चकार ॥

(१३) विलोक्य सङ्गमे रागं पश्चिमाया विवस्वतः ।
कृतं कृष्णं मुखं प्राच्या न हि नार्यो विनेर्ष्यया ॥

(१४) अथास्तसादास्तमनिन्द्यतेजा
जनस्य दूरोज्झितमृत्युभीतेः ।
उत्पत्तिमद्वस्तु विनाश्यवश्यं
यथाहमित्येवमिवोपदेष्टुम् ॥

(१५) सरोरुहाक्षीणि निमीलयन्त्या
रवौ गते साधु कृतं नलिन्या ।
अक्ष्णां हि दृष्टापि जगत् समग्रं
फलं प्रियालोकनमात्रमेव ॥

(१६) निरीक्ष्य विद्युन्नयनैः पयोदो
मुखं निशायामभिसारिकायाः ।
धारानिपातैः सह किं नु वान्त-
श्चन्द्रोऽयमित्यार्त्ततरं ररास ॥

(१७) उपोढरागेण विलोलतारकं
तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया
पुरोऽपि रागाद् गलितं न लक्षितम् ॥

(१८) तन्वङ्गीनां स्तनौ दृष्ट्वा शिरः कम्पयते युवा ।
तयोरन्तरसंलग्नां दृष्टिमुत्पाटयन्निव ॥

"तथाच जाम्बवतीविजयकाव्ये पाणिनिनोक्तम्—

(१९) अस्ति प्रतीच्यां दिशि सागरस्य
वेलोर्मिगूढे हिमशैलकुक्षौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरातनी विश्रुतपुण्यशब्दा
महापुरी द्वारवती च नाम्ना ॥

इति द्वितीयसर्गे।

(२०) अनेन यत्रानुचितं धराधरैः
पुरातनं साजलतं महीक्षिताम्।
ददर्श सेतुं महती जरन्तया
विशीर्णसीमन्त इवोदयश्रिया ॥

इति चतुर्थे सर्गे।

(२१) त्वया सहार्जितं यच्च यच्च सख्यं पुरातनम्।
चिराय चेतसि पुरस्तरुणीकृतमद्य मे ॥

इत्यष्टादशे। (दुर्घटवृत्तिः ४।३।२३)

(२२) अहो अहं नमो मह्यं यदुहत्य सुमध्यया।
उन्नास्य नयने दीर्घे साकाङ्क्षमहमीक्षितः ॥

इति जाम्बवतीविजयकाव्ये जाम्बवतीदर्शनोत्तरं कृष्णस्योक्तिः।" (भाषावृत्तिः १।१।१५) *

(२३) "हरिणा सह सख्यं ते बोभूत्विति यदब्रवीः।
न जावटीति युक्तो तत् सिंहद्विरदयोरिव ॥

इति पाणिनेर्जाम्बवतीविजयकाव्यम्।" (भाषावृत्तिः २।४।७४)

(२४) "करीन्द्रदर्पच्छिदुरं मृगेन्द्रम्" इति जाम्बवतीविजयकाव्ये पाणिनिः। (भाषावृत्तिः ३।२।१६२)

(२५) स पार्षदैरम्बरमापुपूरे।

(२६) पयः पृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः।

---

* सूक्तिमुक्तावल्यां ६५ तमे पद्ये पद्यमिदं राजशेखरस्येत्युक्तम्, तस्मिन्नेव ग्रन्थे पत्रान्तरे चोयाकस्येति निर्दिष्टम्। सुभाषितावल्यां पुनः "कस्यापि" इति विलिखितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२७) स सृक्कणीप्रान्तमसृक्प्रदिग्धं
प्रलेलिहानो हरिणारिरुच्चैः ॥
(२८) सन्ध्यावधूं गृह्य करेण गाढम् ॥

अत्र केचिदाचक्षीरन्, विदितमेवैतत् प्रायेण सर्वेषां यत् तेजस्तिमिरयोरिव कवित्वशाब्दिकत्वयोः सामानाधिकरण्यं सर्वथा शशविषाणायमानमेव वर्त्तते। एकतस्तावच्छब्दशास्त्रानुशीलनकर्कशशेमुषीकाः काष्ठकुड्याश्मसन्निभा रसास्वादनशक्तिविरहिता वैयाकरणा दुःश्रवतमानि रसानुभवप्रतिबन्धकानि पदजातानि बाहुल्येन प्रयुञ्जते, अपरतश्च भावगहने स्वच्छन्दं विचरन्तोऽभिनवमदलेखाश्यामगण्डस्थलाः कविमत्तमतङ्गजा व्याकरणबिसतन्तुं लीलयैव चरणतलेनावमर्दयन्ति। शाब्दिकशिरोमणिर्भट्टोजिदीक्षितमहोदयस्य मङ्गलाचरणश्लोकः—

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत्।
चरीकर्त्ति बरीभर्त्ति सञ्जरीहर्त्ति लीलया ॥

कविकुलचूडामणेः कालिदासस्य च अभ्रश्यत-निविशतो-गुरुलाघवादयः प्रयोगा अत्र साक्षिभूयमावहन्ति। अत एव सहृदयशिरोमणिना मम्मटेन वैयाकरणे वक्तरि दुःश्रवत्वस्य न केवलं दोषाभावत्वं प्रत्युत रसानुगुणतया गुणत्वमेव प्रतिपादितम्। अत एव च वैयाकरणधौरेयैरपि "निरङ्कुशाः कवयः" "न शास्त्रमनुवर्त्तन्ते स्वच्छन्दा ऋषयः किल" "स्थितिर्गतिश्चिन्तनीया" "महाकविप्रयोगबाहुल्यात् सोढव्यम्" इत्यादीनि वचनानि पुनः पुनरुपनिबध्यन्ते। अत एवोक्तमभियुक्तैः—

नैव व्याकरणज्ञमेति पितरं न भ्रातरं तार्किकं
दूरात् सङ्कुचितेव गच्छति पुनश्चाण्डालवच्छान्दसात्।
मीमांसानिपुणं नपुंसकमिति ज्ञात्वा निरस्तादरा
काव्यालङ्करणज्ञमेत्य कविता कान्ता वृणीते स्वयम् ॥

कविकण्ठाभरणे क्षेमेन्द्रेणाप्युक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्तु प्रकृत्याश्मसमान एव
कष्टेन वा व्याकरणेन नष्टः ।
तर्केण दग्धोऽनलधूमिना वा-
प्यविद्धकर्णः सुकविप्रबन्धैः ॥२२॥
न तस्य वक्तृत्वसमुद्भवः स्या-
च्छिक्षाविशेषैरपि सुप्रयुक्तैः ।
न गर्दभो गायति शिक्षितोऽपि
सन्दर्शितः पश्यति नार्कमन्धः ॥२३॥
कुर्वीत साहित्यविदः सकाशे
श्रुतार्जनं काव्यसमुद्भवाय ।
न तार्किकं केवलशाब्दिकं वा
कुर्य्याद्गुरुं सूक्तिविकासविघ्नम् ॥२४॥

अत एव कविप्रवरः पाणिनिरिति विप्रतिषिद्धमेतत् । येन तावत् श्वा युवा मघवा चैकसूत्रे संग्रथिताः, येन तावदात्मत्वमधिगतेन मनः-शब्दस्य नपुंसकत्वं विदधानेन निखिलकामिजनोऽतिसंहितः, अत एव च यमधिकृत्य कवयः प्राहुः—

काचं मणिं काञ्चनमेकसूत्रे
ग्रथ्नाति बाला न हि तद् विचित्रम् ।
विशेषवित् पाणिनिरेकसूत्रे
श्वानं युवानं मघवानमाह ॥

नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥ इति च ।

येन तावदरसिकजनमूर्धन्येन सहृदयश्लाघनीयम् "अथ शब्दानुशासनम्" इति वाक्यं प्रयुज्यापि तद्गतमर्थगौरवमनालोच्यैव तत ऊर्ध्वम् अ इ उण् इत्यादीन्यर्थलेशविधुराण्यक्षरजालान्युत्कीर्णानि, येन घुणाक्षरन्यायेनापवर्गे तृतीयेति समुच्छलितरसं काव्यसारं समुपनिब-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यापि तदर्थमनवबुध्यमानेन स्वाशयानुरूपो गद्यमय एवार्थः कल्पितः*, येन गङ्गाया यमुनायाश्च नदीत्वं निराकृत्य स्थल्या एव तथात्वं सम्पादितं ‡‡ तस्य चेच्छास्त्रानुशीलनजडस्य रसलेशविधुरस्य शब्दाडम्बरमात्रनिष्ठस्य लक्ष्यैकचक्षुषोऽर्धमात्रालाघवेन पुत्रोत्सवं समाकलयतो मुनेः कविप्रवरत्वं तर्हि "पारिभद्रतरोर्मूले किं न स्यात् फाणितोदयः," गगनमध्यमलङ्कुर्वति चण्डरश्मौ किं न प्रादुर्भवेच्छैत्यातिशयः, रसिकजनमानससन्तर्पणे शारदसुधाकरे किं न पदं निदध्यादन्धतमसम्? उक्तञ्च—

य: स्यात् केवललक्ष्यलक्षणरतो नो तर्कसम्पर्कभृ-
न्नालङ्कारविचारचारुधिषणः काव्यज्ञशिक्षोज्झितः।
तस्माच्चेद्रसशालि काव्यमुदयेदेकान्ततः सुन्दरं
प्रासादो धवलस्तदा क्षितिपतेः काकस्य काष्ठार्गाद् भवेत्॥

अवितथं किलोक्तं कृशानुना विश्वगुणादर्शे—

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ङसिङसोस्तिप्तस्झिसिप्थस्थमिब्-
वस्मस्तानचि च ष्टुना ष्टुरत इञ् शश्छोऽट्यचोऽन्त्यादि टि।
लोपो व्योर्वलि वृद्धिरेचि यचि भं दाधाघ्वदाप्नाज्झला-
वित्येते दिवसान्नयन्ति कतिचिच्छब्दान् पठन्तः कटून्॥
झोऽन्तः शश्छोऽटि शेषोघ्यसखि ससजुषोरुर्विरामोऽवसानं
क्के चेति व्यर्थवाचः सदसि यदि सतां शाब्दिकाश्चेद्बुधाः स्युः।
किं तैरेवापराद्धं नट-विट-गणिकानृत्यहस्तप्रचारै-
स्तोधी तोधीतधीतित्तकिटतकिटधिक् ताहधिक् तत्तकारैः॥

---

* गुर्वन्तिके क्रिया पूर्वं संज्ञयार्थावबोधनम्।
करोति पत्युर्युवतिरथ शब्दानुशासनम्॥

† उभयो प्रकृतिः कामे सज्जेदिति मुनेर्मतम्।
अपवर्गे तृतीयेति भणतः पाणिनेरपि॥ (नै १७।७०)

‡ पाणिनेर्न नदी गङ्गा यमुना वा नदी स्थली।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च—

सूत्रैः पाणिनिकीर्त्तितैर्बहुतरैर्निष्पाद्य शब्दावलिं
वैकुण्ठस्तवमक्षमा रचयितुं वन्ध्यश्रमाः शाब्दिकाः ।
पक्वान्नं महता श्रमेण विविधापूपाद्यसूपान्वितं
मन्दाग्नीननुरुन्धते मितबलानाघ्रातुमप्यक्षमान् ॥

अत एवोपरिनिर्दिष्टानां श्लोकानाम् अष्टाध्यायीनिर्मातृकर्तृत्वं नितरामसम्भवमेवेति । (क्रमशः)

विद्याप्रस्थानम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—कालीघट्टवास्तव्यः श्रीगुरुपदहालदारः]

दृष्टिभेदात् पुनः सम्प्रज्ञातः समाधिस्त्रिविधो ग्राह्यनिष्ठो ग्रहणनिष्ठो ग्रहीतृनिष्ठश्चेति । तत्र नानाविषयेभ्य इन्द्रियाणि प्रत्याहृत्य मनो यदा पूर्व्वापरानुसन्धानतः शब्दार्थोल्लेखतश्च स्थूल आलम्बनविशेषे प्रवर्त्तते तदा स सवितर्कः, यदा तु पूर्व्वापरानुसन्धानेन शब्दार्थोल्लेखमन्तरेण तत्रैव मनः प्रवर्त्तते तदा स निर्व्वितर्कः । एतावुभौ पूर्व्वं वितर्कशब्देनोक्तौ । सिद्धे च निर्व्वितर्के सति मनो यदा शब्दार्थोल्लेखपूर्व्वकं तद्वर्ज्जं च सूक्ष्मविषये प्रवर्त्तते तदा तावुभौ समाधी सविचारनिर्व्विचाराख्यौ भवतः । एतावुभौ पूर्व्वं विचारशब्देनोक्तौ निर्व्विचारस्य वैशारद्ये सति क्षीणक्लेशस्य चित्तस्य प्रज्ञालोको जायते येनैव परं वैराग्यं योगिनामभिमुखीभवति । तदुक्तम्—

प्रज्ञाप्रासादमारुह्य अशोच्यः शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः सर्व्वान् प्राज्ञोऽनुपश्यति ॥ इति ।

अतः सवितर्कनिर्व्वितर्कयोरालम्बनं स्थूलं सविचारनिर्व्विचारयोस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ष्मम्। एतत्स्थूलसूक्ष्मरूपे कोटिद्वये जितचित्तस्य समाधिर्ग्राह्यनिष्ठ उच्यते। यदा च मनसो मूर्त्त्याकारतां विहाय सत्त्वोद्रेकात् कर्म्मेन्द्रियज्ञानेन्द्रियसहकारि तन्मन इन्द्रियज्ञानविकल्पसहितत्वेन भावनायां प्रवर्त्तते तदा सोऽयं समाधिः सानन्दः सविकल्पः, इन्द्रियज्ञानविकल्परहितत्वेन तु सानन्दो निर्व्विकल्प एव। एतावुभौ सविकल्पनिर्व्विकल्पभेदेन पूर्व्वं समासत आनन्दानुगत इत्युक्तौ। एष एव समाधिर्ग्रहणनिष्ठ उच्यते।

आनन्दानुगतस्यापि तस्य वैशारद्ये सति भावयितुः समाधिर्विकल्पसन्धानेन तदूर्ज्ज्वं च ग्रहीतृनिष्ठो भवति। तत्र 'यच्छेद्वाङ्मनसी प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनी'त्येवंजातीयकश्रुतिर्यदा पिण्डीकृतमनोव्यापार इदमहमस्मीति वृत्तिं ज्ञातृत्वोपाधौ विशेषाहंकारे यच्छति तदा समाधिः सास्मितः सविकल्पः, यदा तु ज्ञानं नियच्छेन्महतीत्येवमादेस्तादृशो मनोव्यापारो विशिष्टविषयवेदनमन्तरेण ज्ञानमस्मीत्येव ज्ञातृत्वोपाधौ सामान्याहंकाराख्ये सर्व्वानुस्यूते महत्तत्त्वे सम्प्रतिपन्नो भवति तदा स सस्मितो निर्व्विकल्प एव। एतावुभौ सविकल्पनिर्व्विकल्पभेदेन ग्रहीतृनिष्ठौ पूर्व्वं सास्मितसमाधिरित्युक्तौ।

अतः सानन्दसास्मितयोर्भेद आलम्बनाभिमुख्य-तद्वैमुख्यमात्रकृतः, यथैकः पूर्व्वाभिमुखस्ततः पश्चिमाभिमुखस्तद्वत्। एते सर्वे समाधयः सम्प्रज्ञाता अपरवैराग्ययोगतः सबीजाः, निर्बीजास्तु परवैराग्ययोगतः समाधिरसम्प्रज्ञातो यस्य लक्षणमग्रे वक्ष्यते। अभ्यासमन्तरेण च तेषां कोऽपि न सिध्यतीति तत्त्वम्।

भोगेष्वलंबुद्धिरपरवैराग्यम्। तच्च चतुर्विधं यतमानादिवैराग्यत्रयं वशीकारश्चेति। तत्र यतमानत्वं नाम नित्यानित्यवस्तुविवेकात् प्रजायते। चित्तगतदोषाणां मध्ये विवेकेनैतावन्तो जिता एतावन्तो जेतव्या इति विवेचनं व्यतिरेकः। दृष्टानुश्रविकविषयेषु दुःखमिति विचार्य मनसि रागद्वेषाद्यपसारणमेकेन्द्रियत्वम्। एतत्त्रयमेव न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरोधहेतुः सामान्यत्वात्, किन्तु तदभ्यासिनः खलु प्रथमकल्पिकाः प्रवृत्तमात्रज्योतिषो वोच्यन्ते। विषयसन्निधानेऽपि हेयोपादेयत्वबुद्धि-शून्यता वशीकारः। तदभ्यासिनश्चादौ मधुभूमिका ऋतंभरप्रज्ञा वा भूत्वा देवैरिन्द्रादिभिरुपनिमन्त्रयन्ते 'भो इहास्यतामिह रम्यताम्, कमनीयोऽयं भोगः, कमनीयेयं कन्या, रसायनमिदं जरामृत्युं बाधते, वैहायसमिदं यानम्, अमी कल्पद्रुमाः, पुण्या मन्दाकिनी, सिद्धा महर्षयः, उत्तमा अनुकूला अप्सरसः, दिव्ये श्रोत्रचक्षुषी, वज्रोपमः कायः, सगुणैः सर्वमिदमुपार्जितमायुष्मता, प्रतिपद्यतामिदमक्षयमजरममरस्थानं देवानां प्रिय'मिति। एवं च ते देवैरभिधीयमानाः सङ्गस्मयाकरणेन परिशेषात् प्रज्ञाज्योतिषो भूतेन्द्रियजयिनो वा भवन्ति। एतच्च वशीकारसंज्ञं वैराग्यं योगप्रवर्त्तकत्वेन सम्प्रज्ञातस्यान्तरङ्गमसम्प्रज्ञातस्य तु बहिरङ्गं भवति। एतद्वैराग्यमात्रात् पुरुषतत्त्वानभिज्ञस्य विदेहलयः प्रकृतिलयो वा प्रसज्यते।

अस्मितात्यागेऽप्यलंबुद्धिः परवैराग्यम्। तदपि द्विविधं विषयिविषयं गुणविषयं चेति। तत्र पूर्वं विषयदोषदर्शनाद् विषयज्ञानेऽपि यदेव वैराग्यं तद् विषयिविषयं यत एव पुरुषख्यातेर्हेतुभूता चित्तविमुक्तिरुत्पद्यते, अन्यत्तु गुणवैतृष्ण्यमिति बोद्धव्यम्। तदेव यथा कण्ठरवेण लोक आकूतं विज्ञाप्य निर्देशं सूचयति, तथा भगवान् पतञ्जलिरत्र आद्यं वैराग्यं सूत्रयन् साक्षाद्भावेन द्वितीयं सूत्रयति "ततः परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" इति। विषयज्ञानवैराग्यपाटवानन्तरं गुणत्रयात्मकप्रधानाद् विरक्तस्य पुरुषस्य ख्यातिरात्मसाक्षात्कारो यतो गुणवैतृष्ण्यमुत्पद्यते। तच्च परं ज्ञानस्य काष्ठाप्राप्तिरतिक्रान्तभावनीयत्वात् ततो नान्तरीयकं कैवल्यं भवति।

अभ्यासो नाम कस्यांचिदेव चित्तभूमौ समानप्रत्यया वृत्तिरिह तु स्वरूपावस्थिते द्रष्टरि निर्वृत्तिकस्य चित्तस्य जलस्येव कुम्भे निश्चलतारूपा स्थितिस्तदर्थं यो यत्नो मनस उत्साहो वा स्वभाव-चाञ्चल्याद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहिः प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविध आवर्त्तमानोऽभ्यासः । 'स च दीर्घकालनैरन्तर्य्यसत्कारासेवितो दृढभूमि'रिति सूत्रकारः । एतदुक्तं भवति—अनिर्वेदेन श्रद्धातिशयेन च निरन्तरासेवितः सोऽभ्यासो विषयवासनया चालयितुमशक्यो भवतीति । लयविक्षेपादीनामपरिहारे व्युत्थानसंस्कारप्राबल्याददृढभूमिरभ्यासो योगाय न कल्पत इति समाधिभावनायां दृढभूमिरभ्यास उपात्तः ।

असम्प्रज्ञातः समाधिः परवैराग्यजन्य एव। तदुक्तं परवैराग्यासम्प्रज्ञातयोर्हेतुहेतुमद्भाव इति । स च निर्वस्तुकः, परवैराग्यस्य निर्वस्तुकत्वात्। परवैराग्यमभ्यस्य सास्मितसमाधिस्थ आत्मानमनात्मानं वा यदा न विषयीकरोति तदा तस्य समाधिरसम्प्रज्ञातः । न किञ्चित् सम्प्रज्ञायतेऽस्मिन्निति व्युत्पत्त्या स सर्ववृत्तिनिरोधः । तदेव सूत्रितं 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य' इति । सम्प्रज्ञातसमाधौ सामान्यतो या काचिदस्मितावृत्तिरुल्लसति तस्या विरामो निरासः । स चासौ प्रत्ययः ख्यातिश्चेति तस्याभ्यासः पुनः पुनश्चेतसि निवेशनं तत्पूर्वस्तज्जन्यः संस्कारशेषः संस्कारमात्रावशेषो वृत्तिनिरोधो यः सम्प्रज्ञातादन्योऽसम्प्रज्ञात इत्यर्थः । तदेव सम्प्रज्ञाते वृत्तीनां निरोधादसम्प्रज्ञाते निरोधसंस्कारास्तिष्ठति, मोक्षे तु तासामत्यन्तलयान्नापि निरोधसंस्कारा अवशिष्यन्ते ।

असम्प्रज्ञातस्य दृष्टं फलं सम्प्रज्ञातसाधारणं भवति। अदृष्टन्तु निखिलसंस्काराणां प्रारब्धकर्म्मणां च विलयात् स्वेच्छातो द्रागविमोक्षः । तथाहि स्मृतिः—

विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात् ॥ इति ।

असम्प्रज्ञातसमाधिर्द्विविधो भवप्रत्यय उपायप्रत्ययश्चेति। तत्र भवप्रत्ययो विदेहानां प्रकृतिलयानां च भवति। भवो जन्म प्रत्ययः कारणं यस्येति भवप्रत्ययः । स मोक्षमाणैर्हेयः । इन्द्रियादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्वात्मभावनाभिर्विधूतदेहा विदेहाः। तन्मात्रादिष्वात्मभावनाभिर्महत्तत्त्वावरणपर्य्यन्तावरणानि भित्त्वा प्रकृत्यावरणेन प्रतिबद्धाः प्रकृतिलयाः। क्षीणपुण्याः प्राप्तावधयस्ते पुनः संसारिणो भवन्ति। 'दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः' इत्यादिशास्त्रप्रामाण्यात्। शीततौ निर्वृता इव स्थैर्य्यसम्पन्ना विलेशया यथा शीतात्यये विलेशयत्वं त्यक्त्वा जिह्मगत्वं प्राप्नुवन्ति, तथा विदेहादयः पुण्याभिपाते मोक्षदशां विहाय गुणाधिकारं कर्म्मविपाकं सहन्त एव।

यैस्तु भवप्रत्ययरूपं मोक्षाभासमनादृत्य तात्त्विको मोक्षः स्पृहितस्तेषां समाधिरसम्प्रज्ञात उपायप्रत्यय इत्युच्यते। स एव श्रद्धादिपूर्वको भवति। तथा हि सूत्रं—'श्रद्धावीर्य्यस्मृतिसमाधिप्रज्ञालोकपूर्वक इतरेषा'मिति। तत्र श्रद्धाशब्देन शास्त्रदेवादिषु परानुरक्तिरादिश्या। सैव विकल्पादींस्तिरस्कृत्य योगिनं योगक्षमं करोति। सिद्धायां च तस्यां स्वयंप्रमाणस्य शास्त्रादेः प्रमाणान्तरनिरपेक्षत्वमुपजायते।

यद्वा श्रद्धा श्रद्धान्विता भक्तिः। 'भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सता'मित्यादिस्मरणात् *। गीतायामपि प्रश्ननिरूपणाभ्यां तस्या आधिक्यसिद्धेश्च। श्रद्धातो वीर्य्यं धारणाशक्तिर्यत एव योगभूमिकारोहणाय योगिन उत्सहन्ते। वीर्य्यात् स्मृतिर्ध्यानं भाव्यस्य पुनश्चेतसि निवेशनमित्यभिप्रायः। स्मृतिध्रौव्यात् समाधिर्विवेकप्रत्ययफलको भवति। एतच्चतुष्टयं प्रयाजवत् सम्प्रज्ञातासम्प्रज्ञातयोः करणीयम्। भाष्यार्थप्रत्यभिज्ञानात्। समाहितो भाव्यं विवेकेन साक्षात्करोतीति समाहितस्य प्रज्ञालोकः सम्प्रज्ञातजन्यविवेकसाक्षात्कारो यस्य निश्चयदार्ढ्याद् अभ्यासदार्ढ्याच्च परवैराग्यहेतुरसम्प्रज्ञातो यस्मादेव प्रान्तभूमिप्रज्ञाया विषय आविरस्ति। तत एव परमा मुक्तिः साधननिरपेक्षत्वेन भवति। तदुक्तं भगवता वात्स्यायनेन

---

* श्रीमद्भागवते ११।१४ श्लोकस्य भावार्थदीपिका द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—'समाहितो भावयति, भावयन् निर्विद्यते ; निर्विसस्य वैराग्यं विरक्तस्यापवर्ग' इति।

उपायानुष्ठानमाद्यो क्रियायोग उक्तः। स च स्मृतिसम्मितः—

आदौ हिरण्यगर्भेण द्वे प्रोक्ते योगसंहिते।
एका निरोधयोगाख्या कर्म्मयोगाह्वयाऽपरा * ॥

इत्यादिप्रमाणात्। तथाच भगवता पतञ्जलिनापि साधनपादे व्युत्थितचित्तानां बहिर्मुखाणां क्रियायोगादीनि योगयोग्यसाधनानि पञ्च बहिरङ्गाणि च व्याख्यातानि। तदेष स्लोको भवति—

क्रियायोगं जगौ क्लेशान् विपाकान् कर्म्मणामिह।
तद्दुःखत्वं तथा व्यूहान् पादे योगस्य पञ्चकम् ॥ इति।

तत्र व्युत्थितचित्ता अपि द्विविधा मध्यमाधिकारिणो मन्दाधिकारिणश्चेति। अभ्यासवैराग्यरूपौ योगोपायौ येषां झटिति नोदितस्त एव मध्यमाधिकारिणः। समाधिसिद्धये तेषामुपायः क्रियायोगस्तपः-स्वाध्यायेश्वरप्रणिधानानीति। तत्र तपो ब्रह्मचर्य्यादिकं सन्न्यासिनां भवति। 'ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते' इति स्मृतेः। तच्च चित्तप्रसादाविरोधि मृद्वेव कार्य्यमिति महर्षिर्व्यासो मन्यते। गृहिणां तु तप आश्रमधर्म्मो य एव चित्तशुद्धिद्वारा विविदिषां जनयति। यदाह योगियाज्ञवल्क्यः—

विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ॥ इति।

भगवान् अहिर्बुध्न्यश्च—'कृच्छ्रचान्द्रायणाद्यैश्च तपो देहविशोषणम्' इति। स्वाध्याय इष्टमन्त्रादिजपः। प्रणवादिपवित्राणां जपो मोक्ष-शास्त्राध्ययनमिति भाष्यकृद्व्याख्यानम्। स एव योगफलको भवति। तथाहि पारमर्षी गाथा—

---

* अहिर्बुध्न्यसंहिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत् ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥ इति ।

ईश्वरप्रणिधानं प्रेमनाम्नी भक्तिरहैतुकी यतः फलाभिसन्धानं विना कायमनोवाग्भिः कृतानां कर्म्मणां भगवति समर्पणम् ।

नाहं कर्त्ता सर्व्वमेतद् ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

इत्यादिस्मरणात् । तदेव भगवान् भाष्यकारः 'ईश्वरप्रणिधानं सर्व्वक्रियाणां परमगुरावर्पणं तत्फलसन्न्यासो वे'ति । तत्र सन्न्यासः परमेश्वरः कर्म्मफलभोक्तेति भावनाविशेषः । मां कर्म्मफलानि भोजयन् परमेश्वरः प्रीणातीति यत् स एव परमेश्वरस्य तत्फलभोगः । यथाऽर्थिभ्यो धनानि प्रयच्छन् दाता तत्फलभोक्ता । यद्यपि परमेश्वरस्य प्रीतिरानन्दभोगरूपा नित्या, तथापि तस्मिन्नेव कर्म्मफलानां भोगोत्पत्तिः सिद्धत्वादिवद् गौणीति बोद्धव्यम् ।

तपःस्वाध्यायत ईश्वरप्रणिधानमाप्यायितं भवति । आप्यायितेन तेनैव चित्तं क्रमशः सम्प्रज्ञाते निरुद्धम्, असम्प्रज्ञाते तु निर्वृत्तिकतया शनैरेकाग्रतामपि विहाय निरिन्धनवह्निवदुपशाम्यति, ततः शुद्धतत्त्वमात्रेणान्तःकरणेन मायान्धकारपरिपन्थिनि सच्चिदानन्दघने परमे वस्तुनि तुष्यति, विरमति च षाट्कौशिकदेहादिसंघातात् तद्भोग्याद्वा । तदुक्तं योगवार्त्तिके भिक्षुपादैः—'न केवलमीश्वरेऽर्पितकर्म्मण ऐश्वरयोग एव भवति, अपि तु ईश्वरसाक्षात्कारद्वारा पूर्णत्वादिना जीवतत्त्वसाक्षात्कारोऽपी'ति । सूत्रञ्च तत्र समाधिसिद्धिरीश्वरप्रणिधानादिति ।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्ययीभावोपदेशः

[निबन्धकः—श्रीसीतानाथसिद्धान्तवागीशः]

इदानीं जलप्रवाहप्लाविते, प्रबलवात्यासमाकुलिते, विध्वस्तखाद्यशस्यजाले, विविधदैवोपद्रुते, उन्मत्तनदीनदैर्विजिगीषुभिरिव समाक्रान्ते मृतप्राये च वङ्गमण्डले, परस्परं विरोधमुपगतवति दिक्चक्रवाले, एकदेशवासिनामपि स्वार्थान्धानां नरशोणितपिपासुतायां जिघांसायां प्रवर्द्धमानायां प्रतिकूलदैवेनाकस्माद् विनष्टजनपदे, महाकालताण्डवायिते शवदेहसमाच्छन्ने निराश्रये च महाचीने, प्रलयघनघटाच्छन्ने च भारतीयराजनीतिकगगने, स्वाधीनभावारुणरागारुणिम्ना समुद्दीपिते चाशाप्रत्यूषसि, न जानीमो भवितव्यतां विधातुश्चिन्तनीयामचिन्त्यप्रभावस्य। महासङ्कटेऽस्मिन् अस्थिचर्म्मावशिष्टानां भारतीयानां प्राणधारणार्थमवश्यमेवाव्ययीभावोपदेशः कर्त्तव्य इति चिरादेवास्माभिर्गीयते—"मद्गेहे नित्यमव्ययीभाव" इति। एतत्कार्य्यप्रवृत्तिसमकालमेव काकतालीयन्यायेन १८५३-शकीय-विगताषाढमासस्य "संस्कृत-साहित्यपरिषत्" पत्रिकायामव्ययीभावविषयकः "किमपि संशयोद्घाटनम्" इतिशीर्षकः कश्चिन्मनोरमः प्रबन्धोऽदर्शि। यद्यपि नायमस्मत्सङ्कल्पितोऽव्ययीभावस्तथापि शब्दसादृश्येनाव्ययीभावविषयकतयाऽयममन्दमानन्दमजनयदस्माकम्। प्रबन्धेन चानेन वैयाकरणकेशरिणामपि व्याकुलीकृतानि चेतांसि किमुत सुकुमारमतीनाम्, प्रतिपादिता च तेन प्रबन्धकर्त्तुर्विशेषतः कलापप्रतिभा। यद्यप्यल्पधियामदूरदर्शिनामस्माकमत्र समालोचनं प्रस्तुतविषये सम्पूर्णामुपयोगितां नावहति, तथाप्यायुष्मता श्रीमता प्रबन्धकर्त्रा साङ्ख्यतीर्थोपाधिकेनोपेन्द्रनाथेन तादृशः कश्चित्सम्मोहनो बाणो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरुक्तेऽपि, यः खल्वस्माकं पादौ संस्पृश्य कर्णौ स्पृशति। येन च न केवलं सुकुमारमतीनां व्याकुलीकृतानि चेतांसि, अपि तु प्रवयसामस्माकमपि दृषत्कठिनानि निस्पन्दानीव नीरसहृदयानि स्पन्दमानानि भिद्यन्ते। अत्र च श्रीमतो महती शुश्रूषणा, अपूर्वा भक्तिः, महच्छास्त्रानुरागः, तत्त्वज्ञानाय प्रबलानुसन्धित्सा च उद्यमयति, त्वरयति, प्रेरयति, वाचालयति चास्मानस्मिन्। यद्यपि 'निर्णीतार्था व्याकरणकर्णधारा' एव ग्रन्थार्थविवरणे संशयनिवारणे च समर्था व्याख्यातृत्वेन वक्तृत्वेन च प्रबन्धकर्तुरभिमतास्तथापि तेषामेव समालोचनसौकर्य्यार्थं ग्रन्थान्तरसंवादसंवलितं सङ्क्षेपतोऽस्माभिरुपोद्घातमात्रं क्रियते। एते खलु प्रबन्धकर्त्तुः सङ्क्षेपत आक्षेपाः—

'अव्ययो वानव्ययो वाव्ययीभावो भवेदिति।' इत्येवं संशयानेन श्रीमता प्रबन्धकर्त्रा कलापपरिशिष्टकाराणां मतमुपन्यस्याव्ययीभावस्यानव्ययत्वं प्रमाणीकृतम्। पिष्टपेषणन्यायेन पाठकानामरुचिकरत्वेनानावश्यकतया च पुनस्तदुल्लेखो नोपयुज्यत इति ततो विरताः स्मः।

(१) प्रथमतः श्रीमताव्ययीभावस्याव्ययत्वस्वीकर्त्तृमते सन्दिह्यते— 'परिशिष्टकारमतसिद्धानि क्वात्वोपकुम्भमित्यादिपदानि प्रमाणं न वा।'

अत्रोत्तरम्—एतानि, एवंविधान्यन्यानि च पदानि व्याकरणसिद्धानि पाणिन्यादिमतानुमोदितानि चेति।

अव्ययीभावस्याव्ययत्वमङ्गीकर्त्तॄणां केषाञ्चित्तार्किकाणां मतं पश्चादालोच्यते।

(२) दण्डादण्डीत्यादावव्ययीभावः। कलापमते बहुव्रीहिः। अत्रापि परिशिष्टकृताऽनव्ययत्वमेवास्य स्वीकृतम्। अव्ययीभाववादिमते अव्ययत्वमेवेति श्रीमतैव प्रदर्शितम्। अनव्ययत्वमङ्गीकुर्व्वतः परिशिष्टकारस्य मते दण्डादण्डिकं दण्डादण्डितरां, दण्डादण्डितमामित्यादिप्रयोगाभाव एव फलम्। अत्र श्रीमता शङ्क्यते 'तथाविधपदानि प्रमाणानि न वा?' इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोत्तरम्—उक्तानि पदानि सर्वतन्त्राप्रसिद्धान्यप्रमाणीभूतानि चेति ।

(३) अव्ययीभावस्याव्ययत्वाङ्गीकारे प्रथमोपस्थितन्यायेनास्माभिः केचिद्दोषाः समदर्श्यन्त कातन्त्रसञ्जीवन्याम् । तेषां समालोचनेन सुकुमारमतीनां कालापानामव्ययीभावस्यानव्ययत्वे मतिः श्रेयसी स्यादिति । न तु मान्यानामुपजीव्यानामार्षचक्षुषां तत्रभवतां पाणिन्यादीनां मतं खण्डयितुं सागराम्भः शोषयितुमुद्यतैर्विकिरैरिवास्माभिः प्रयत्नोऽकारि । तथापि श्रीमतः शङ्काकलङ्कलेशोऽपि समुत्सारयितुं युक्त इति मन्यामहे । तथाहि—

द्वितीयदोषेऽस्माभिरभिहितम् "उपवधुम्मन्य इत्यत्र ह्रस्वमकारागमाप्राप्ति"रिति । तत्र श्रीमताभिहितम्—"नात्र ह्रस्वमकारागमयोरप्राप्तिरपि तु केवलमकारागमस्य, 'स्वरो ह्रस्वो नपुंसके' इत्यनेनैव ह्रस्वप्राप्ते"रित्यादि । अस्तु वा तत्र श्रीमतामभिमतं, तथापि मकारागमाप्राप्तिरूपो दोषः केन वार्य्यताम् । यद्वा 'ह्रस्वे सति मकारागमाप्राप्ति'रिति तात्पर्य्ये संशय एव नोपतिष्ठते ।

(४) पञ्चम दोषेऽस्माभिरुक्तम्—"अन्यस्माल्लुगिति सूत्रविधानञ्चानर्थकं स्यात् अव्ययाच्चेत्यनेन सिद्धत्वात् ।" अत्र श्रीमताक्षिप्तम् "इति यदुक्तं तदपि नास्मभ्यमतिमात्रं रोचते" इत्यादि । तदत्र किमस्माभिरपराद्धं, कटुकौषधोपशमनीयस्य रोगस्य प्रतिकर्त्तुं यदि सितशर्करोपदेशः कर्त्तुं न शक्यते न तद् भिषजां दोषमावहति । अत्र तु श्रीमतामभिप्रायः—अन्यस्माल्लुगिति सूत्रे स्थिते उपकुम्भात्, उपकुम्भे इत्यादौ विभक्तिलोपो वारयितुं शक्यते, असति तु सूत्रे कथन्तत्र विभक्तिलोपो वारणीय इति । अत्रास्माकमयमभिप्रायः अव्ययीभावस्याव्ययत्वाङ्गीकारे अव्ययाच्चेत्यनेनैव विभक्तिलोपः सिद्धः । यदि तु अकारान्ताद्विभक्तिलोपः कथं न स्यादिति शङ्क्यते, तदा "वरमक्षराधिक्यं न पुनर्योगविभाग" इति न्यायात् "अनतोऽव्ययाच्च लुक्" इत्युक्ते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव तद्दोषपरिहारः सम्भवति। तथा च अन्यशब्दग्रहणेन सञ्जाता विप्रतिपत्तिरपि तिरोहिता भवति।

(५) अतः परं "स नपुंसकलिङ्गं स्या"दिति सूत्रवैफल्यमाशङ्क्य तदालोचितं, तत्र बहुवक्तव्यत्वेऽपि अस्मन्मतानुप्रवेशेन तत्रौदासीन्यमवलम्बितमस्माभिः। परन्त्वेतद् ब्रूमः अव्ययत्वमङ्गीकुर्वतामपि मते अव्ययीभावस्य नपुंसकत्वमुपदिष्टमेवेति।

(६) महदिदमाशङ्कान्तरं श्रीमता समुपस्थापितं, यत् "स नपुंसकलिङ्गं स्या"दिति सूत्रवैफल्यभिया वृत्तिकार-त्रिलोचन-सुषेणवचनानामसामञ्जस्यमिति। तत्रेदमादौ चिन्त्यते अव्ययीभावस्याव्ययत्वेऽनव्ययत्वे वा मतान्तरे तस्य नपुंसकत्वमङ्गीक्रियते न वा? अङ्गीक्रियते चेत् कया युक्त्या तस्य साफल्यमिति।

तदत्राव्ययत्ववादिनां पाणिनीयानां मते "अव्ययीभावश्चे"ति नपुंसकत्वविषयकं सूत्रमस्ति। वोपदेवस्य तु मते "चर्गैक्यवं क्लीबम्" इति सूत्रं दृश्यते। तन्त्रान्तरेऽपि एतदर्थं सूत्रमस्ति तदिह नोक्तं गौरवात्। "चर्गैक्यवं क्लीबम्" इति सूत्रे तर्कवागीशपादाः—"अधिस्त्र्यादौ पूर्वपदार्थप्राधान्याल् लिङ्गकृतप्रयोगवैलक्षण्याभावे प्राप्ते, उन्मत्तगङ्गमित्यादावन्यपदार्थत्वादन्यलिङ्गतायां प्राप्तायां वचनमिद"मित्युक्तवन्तः। दुर्गादासपादास्तु—अव्ययीभावस्य क्लीबत्वफलन्तु उपसंन्नम् उपलक्ष्मीत्यादौ ह्रस्व" इति ब्रुवते स्म।

"व्याब्रुक् क्तः" इति वोपदेवसूत्रे तर्कवागीशपादाः—व्यम् अव्ययम्, अव्यक्तलिङ्गमित्यर्थः। अव्यक्तलिङ्गत्वात् नपुंसकत्वं प्रतिपादितम्। एतेन शास्त्रान्तरे अव्ययस्य क्लीबत्वविधानं व्यर्थमिति। न च व्यानां लिङ्गकृतवैलक्षण्याभावादलिङ्गत्वमिति वाच्यं युष्मदस्मदोस्तदभावेनालिङ्गत्वे तद्विशेषणानां विलिङ्गत्वानुपपत्तेः। अत एवोक्तं—"डतिव्यषान्त" इति। तथा च "षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्" इत्यमरः। तद् विशेषणानां क्लीबत्वैकत्वे एव। "क्रियाव्ययानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदकान्येकत्वेऽपि" इति क्लीबलिङ्गसंग्रहे अमरकोषात्। तथा च "सनातनं खरपि येन मनोहर"मित्याहुः।

"स नपुंसकलिङ्गं स्या"दित्याचार्य्यसूत्रव्याख्यानावसरे "अव्ययपूर्वपदत्वादलिङ्गतैव प्राप्नोति.वचन"मिति वृत्तिकारेणोक्तम्। अत्र किं नाम अलिङ्गत्वं, कथं वाऽलिङ्गता इत्याशङ्क्य वृत्तिग्रन्थव्याख्यानावसरे त्रिलोचनेनोक्तं "पूर्वपदार्थप्रधानो ह्यव्ययीभावः, पूर्वपदार्थस्य चासत्त्वभूतत्वाल्लिङ्गसंख्याभ्यां योगो न स्यादत इदमुच्यते" इति। अस्य तु मते अलिङ्गत्वं सर्वलिङ्गराहित्यमिति प्रतीयते। सुषेणस्तु—"ननु किमर्थमिदं यावता विशेषलिङ्गावगत्यभावात् सामान्यत्वान्नपुंसकत्वं सिद्धमेवेत्यभिप्रायेण सिद्धान्तमाह अव्ययपूर्वपदत्वादिति वृत्तिः।" एतन्मतेऽपि तावल्लिङ्गराहित्यमेवाव्ययानां प्रदर्शितम्। आशङ्कार्थस्तु यत्र विशेषलिङ्गावगतिर्नास्ति तत्र सामान्यत्वात् प्राप्तं नपुंसकत्वं केन वारयितुं शक्यत इति। सिद्धान्ते त्वव्ययानां यावल्लिङ्गराहित्यान्नपुंसकत्वमपि कल्पयितुं न शक्यत इति तात्पर्य्यम्। अत्रेदमालोचनीयम्—अव्ययीभावस्याव्ययपूर्वपदत्वं प्रायिकम्। अत एव जगदीशेनापि "अव्ययपूर्वस्तु यो भवे"दिति अव्ययीभावलक्षणं परित्यज्य लक्षणान्तरं कृतम्। यत्राव्ययपूर्वपदत्वं तत्रैवालिङ्गता प्राप्ता, "अव्ययपूर्वपदत्वा"दिति हेतुनिर्देशेन वृत्तिकृता तथैवोपपादितत्वात्। सामान्यत्वान्नपुंसकमित्यादेर्विषयस्तु यत्र लिङ्गानां लिङ्गार्थता अस्ति तत्रैव सम्भवति। यथा—"क्रिया साध्यमुच्यते"। "शक्यं श्वमांसादिभिरपि क्षुत् प्रतिहन्तु"मिति भाष्ये। प्रादीनां लिङ्गार्थत्वाभावात् अत्र नपुंसकत्वमपि न युज्यते इत्येवं तात्पर्य्ये वृत्तिकार-त्रिलोचन-सुषेणवचनानां विरोधः कथमपि नोपपद्यते। शास्त्रानुशासनेनालिङ्गता चैतेषां परिदृश्यते तथाच—"षान्ता संख्या कत्यव्ययुष्मदस्मदश्चालिङ्गकाः।" "षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्" इत्यमरः। "क्रियाव्ययानां भेदकान्येकत्वेऽपि" इत्यमरेण, "नित्यमसंख्यस्ये"ति सूत्रयता परि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्टकारेणापि अलिङ्गत्वादेव क्रियाव्ययानां विशेषणे नपुंसकत्वं व्यवस्थापितम् ।

तत्र चालिङ्गत्वं लिङ्गत्रयेऽपि रूपकृतवैलक्षण्याभावः, "त्रिषु समा" इत्यमरोक्तेः, "सदृशं त्रिषु लिङ्गेषु" इत्यनेनापि तथैवावगतेः । यथा— ष्णान्तसंख्यायुष्मदस्मदादीनाम् । अत्र तु लिङ्गवत्त्वमस्त्येवेति प्रतिपादितम् । यथा—पञ्च पुरुषाः, पञ्च स्त्रियः, पञ्च कुलानि । एवं शोभनस्त्वं, शोभना त्वं, शोभनं त्वमित्यादि । अव्ययानामलिङ्गत्वन्तु यावल्लिङ्गराहित्यमेव, प्रादीनां लिङ्गार्थत्वाभावान्नपुंसकत्वमपि न युज्यते । इयांस्तु विशेषो यदव्ययानां लिङ्गसंख्याकारकेष्वेकरूपतापन्नत्वं, तादृशस्थल एव यावल्लिङ्गराहित्यरूपमलिङ्गत्वमुक्तं, न चैवं काचिद् ग्रन्थकृतामनुपपत्तिर्वचनजातेषु । किञ्च—"अव्ययादाप् सुपः" (२।४।८२) इति सूत्रे अव्ययाद्विहितस्य आपः, सुपश्च लुक् स्यादिति व्याख्याय "तत्र शालायां"मित्युदाहृतं दीक्षितेन । अत्र च "अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावा"दिति वार्त्तिककृतां वचनमप्यनुकूलमस्माकम् । एवञ्चानव्ययपूर्वपदकाव्ययीभावसमासस्थले नपुंसकत्वविधानं सर्वेषामेव ग्रन्थकृतां सुतरामेव सङ्गच्छते । यथा—द्विमुनि, द्वियमुनं, द्विगार्ग्यं, दशभारद्वाजम्, उन्मत्तगङ्गं, लोहितगङ्गं, खलेयवं, तिष्ठद्गुप्रभृति सर्वतन्त्रसिद्धप्रयोगाणां नपुंसकत्वविधानं विना कथं साधुत्वमित्यापाततोदर्शिभिरेव चिन्तनीयम् । किञ्चाव्ययानां सामान्यत्वान्नपुंसकत्वाङ्गीकारे, समया, निकषा, अन्तरा, हा प्रभृतीनामव्ययानां का गतिरिति च विभावनीयम् । पाठसामर्थ्यादिकल्पनायामपि महद् गौरवं स्यादिति ।

(७) इदानीमव्ययीभावस्याव्ययत्वमनव्ययत्वं वाङ्गीकुर्वतां मते न किञ्चित् फलवैषम्यमस्तीति प्रतिपाद्यते । अव्ययीभावस्याव्ययत्वाङ्गीकारे ये खल्वापातत एव अनव्ययत्ववादिनां कालापानां मतदार्ढ्यायास्माभिर्दोषाः प्रदर्शिताः, पाणिनीयैरेवार्षनेत्रैस्ते सर्वं एव निराकृताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्मते चाव्ययीभावस्याव्ययत्वमतिदिष्टं कार्य्यविशेषप्रतिपत्त्यर्थम्। अन्यथा स्वरादिपाठेनैव सिद्धे "अव्ययीभावश्च" (१।१।४१) इति सूत्रेण पुनरव्ययत्वविधानमनर्थकं स्यात्। तथाहि तत्र सूत्रे—"इह लुकि मुखस्वरोपचारयोर्विहत्तौ चेति परिगणनं कर्त्तव्य"मिति टीकाकृतः। तेनाव्ययनिबन्धनं लुगादिकार्य्यमनव्ययनिबन्धनं कार्य्यान्तरञ्च भवितुमर्हति। तेन उपाग्निमुखः, प्रत्यभिमुखः, उपकुम्भम्मन्यः, उपकुम्भीभूतः इत्यादि प्रयोगाणां साधुत्वमुपपद्यते। वस्तुतस्तु तन्मते स्वरविशेषप्रतिपादनार्थमव्ययत्वमङ्गीकृतम्। अस्मन्मते तु स्वरकृतवैलक्षण्याभावादनव्ययत्वमेवेति न काचिद्विरोधाशङ्का। तत्त्वबोधिन्यामपि—"यद्यप्यव्ययीभावस्य लिङ्गसंख्याकारकयोगोऽस्ति तथापि वचनादव्ययत्वम्।" एतेनाव्ययीभावस्यानव्ययत्वेऽपि कार्य्यविशेषप्रतिपादनार्थमस्याव्ययत्वमङ्गीकृतमित्येवायातम्।

(८) इदानीं तार्किकमतमालोच्यते। पञ्चलक्षण्यां तर्कवागीशपादैरभिहितं—"अव्ययीभावस्याव्ययतया तेन समं समासान्तराभावाच्चे"ति। अत्राव्ययत्वं हेतूकृत्य अव्ययीभावसमासे समासान्तराभावः साधितः। तथाच अव्ययेन सह अव्ययीभावातिरिक्तः समासो नास्तीति मतं प्रतिपादितम्। एवञ्चाव्ययीभावस्याप्यव्ययत्वेन तेन सममपि अव्ययीभावातिरिक्तः समासो न भवतीति ग्रन्थकृतामाशयः। तथा चाव्ययीभावसमासो न समासान्तरघटकः अव्ययत्वादित्यर्थः पर्य्यवस्यति। शैलीयं व्याकरणानुशासनानुसारिणी न वेति बहव एव मादृशाः स्थूलधियः संशेरते। तथाच तन्मते—"अत्युच्चैः, परमोच्चैः, सर्व्वपश्चात्, परमस्वरि"त्यादि सर्व्वतन्त्रसिद्धप्रयोगाणां साधुत्वव्याघातः। उपकृष्णमतिक्रान्तौ अत्युपकृष्णौ, बहूपकुम्भौ, अत्युपकुम्भौ, बहूच्चैसौ, अत्युच्चैसौ, बहूपवधुरत्युपवधुरित्यादयश्च यथेष्टं प्रयोगाः परिदृश्यन्ते। किञ्च छात्त्रोपकुम्भं, ज्येष्ठानुपदमित्यादि प्रयोगं प्रमाणीकुर्व्वता परिशेषकारिणा तन्मते सर्व्वतन्त्रसम्मतिविरहः स्पष्टत एव प्रतिपादितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेनाधुनिकतर्कवागीशपादैर्महामहोपाध्यायैः पञ्चलक्षणीटिप्पण्यां भूतलोपकुम्भ' भूतलाघटमिति प्रामादिकः पाठ इति मन्यमानैरभिहितं कथं अज्ञातुमीशते सुधिय इति तु चिन्तनीयम् ।

वयन्तु तत्त्वान्वेषणपराः पश्यामो यत्तिष्ठद्गुप्रभृतीनामेवाव्ययीभावातिरिक्तः समासो नास्तीति व्युत्पत्तिसिद्धम् । तेन परमं तिष्ठद्गु इत्यादौ समासो न भवतीति । "सर्व्वनामशब्देनाव्ययीभावसमासो नास्ती"ति वोपदेवग्रन्थटिप्पण्यां पाणिनीयानां मतमुपन्यस्तम् । "अव्ययपरपदकः समासो नेष्यते" इत्यपि तर्कवागीशपादानामभिप्रायो वर्णयितु' न शक्यते, दर्शितदोषराशिभ्यः ।

तदिदानीं बहुवक्तव्यत्वेऽपि सङ्क्षेपतो विवक्षवो वयं विरमामः । किन्त्वाशास्महे, दीधितिकारानुगैरन्तेवासिभिर्जीवद्गुरव एव शास्त्रचर्चापरैः पराजीयन्तां, येन शिष्योत्कर्षेण परं प्रमोदं लभमानाः प्रत्यक्षपूर्व्वपक्षशरनिकरशय्याशायिनश्चिरस्मरणीया भवेयुरिति शिवम् । *

---

* विषयमिममधिकृत्यास्माभिरपि कश्चन प्रबन्धः प्रणीतः, स चागामिन्यां संख्यायां प्रकाशयिष्यते इति । सं० सा० प० स ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदमञ्जरीकारो हरदत्तः

(पूर्वतोऽनुवृत्तः)

"नित्यवीप्सयोः" [पा० ८।१।४] इत्यत्र तु वामनो वक्ष्यति तिङ्क्षु नित्यता अव्ययकृत्सु चेति, तन्मते नित्यग्रहणादेवात्र द्विर्वचनम् । *

(६) "अणिञोः—" [पा० ४।१।७८] इत्यत्रोक्तम्—"तदेतद् "ये च तद्धिते" [पा० ६।१।६१] इत्यत्र वामनो वक्ष्यति, यदि प्रत्ययः कथमौदमेघेय इति । आपत्याद् विहितः ष्यञ्, सोऽप्यापत्य एव तत्र यलोपे सिद्धमिति । जयादित्यस्तु मेने शीर्षादेशसन्निपातेन ष्यञ्, स तद्विघातं न करिष्यतीति, यद्येवमजादिप्रत्ययनिबन्धनः शीर्षादेशः कथं तमजादिं विहन्यात्, ततः किम्, ष्यञादेशो न प्राप्नोति, अनित्या सन्निपातपरिभाषा तेन ष्यञ् भवति शीर्षादेशश्च न भविष्यति ।"……

(७) "संख्यैकवचनाच्च वीप्सायाम्" [पा० ५।४।४३] इत्यत्र वृत्तिकारेणोक्तम्—"एकवचनात् खल्वपि । कार्षापणं ददाति कार्षापणशः । माषशः । पादशो ददाति । एकोऽर्थ उच्यते येन तदेकवचनम् । कार्षापणादयश्च परिमाणशब्दा वृत्तावेकार्था एव भवन्ति । संख्यैकवचनादिति किम् ? घटं घटं ददाति" इति ।

---

* "इदमेव ज्ञापकं पौनःपुन्यस्य केनचिद्द्योतनेन सौत्रद्वित्वाप्रवृत्तेरिति पौनःपुन्ययङन्ते न सौत्रं द्वित्वम् । भुक्त्वा भुक्त्वा भोजं भोजमित्यादौ तु "आभीक्ष्ण्ये द्वे वाच्ये" इति भाष्यपठितवचनान्तरेण द्वित्वम् ।'—"प्रकारे गुणवचनस्य" इत्यत्र लघुशब्देन्दुशेखरः । ' "द्वित्वम् ।" "नित्यवीप्सयोः" इत्यनेन । यद्यप्याभीक्ष्ण्यं णमुलादिना द्योतितम्, तथाप्यर्थान्तरेऽपि तद्विधानाद् द्वित्वरहितयोर्न तद्द्योतने सामर्थ्यमिति भावः ।'—"आभीक्ष्ण्ये णमुल् च" इत्यत्र शब्देन्दुशेखरः । "आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकृदन्तेषु च" इति "नित्यवीप्सयोः" इत्यत्र भट्टोजिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतच्च पदमञ्जरीकारेण व्याख्यातम्—"यद्यत्र पारिभाषिकस्यैकवचनस्य ग्रहणं स्यात् सर्वेभ्यो ब्राह्मणेभ्यो घटं घटं ददातीत्यत्रापि स्यात् घटशब्दस्यैकवचनान्तत्वादित्यालोच्यान्वर्थस्यैकवचनस्यात्र ग्रहणमित्याह —एकोऽर्थ उच्यते येनेति। नन्वेवमपि स दोषस्तदवस्थ एव, एकवचनान्तस्यैकार्थत्वादित्यत आह—कार्षापणादयश्चेति। अनेन वृत्तिस्थैकार्थताश्रीयते, न वाक्यगतेति दर्शयति। वृत्तौ च घटादयो जातिशब्दा अनेकार्थो भवन्ति जातियोगस्यैकानेकसाधारणत्वात् किन्त्वभेदैकत्वसंख्यामुपाददते ; कार्षापणादयस्तु परिमाणवचना उक्तपरिमाणमर्थमाचक्षाणा न मात्रयापि न्यूनाधिकभावे भवन्ति, वाक्ये तु कार्षापणौ कार्षापणा इत्येकशेषबलादन्याः पादा माषा इतिवदेकजात्यन्वयरहितानेकार्थप्रतीतिः, वृत्तौ तु विभक्त्येकशेषयोरभावात् स एव केवलोऽक्तपरिमाणोऽर्थोऽवतिष्ठते, अतः कार्षापणादय एवोदाहरणमिति जयादित्यो मन्यते। वामनस्तु—"जश्शसोः शिः" [पा० ७।१।२०] इत्यत्रोदाहरिष्यति जसा सहचरितस्य शसो ग्रहणादिह न भवति कुण्डशो ददाति, वनशः प्रविशतीति। स मन्यते जातिशब्दोऽपि यदार्थप्रकरणादिना वृत्तावेकार्थीभवति, भवत्येव तदा ततोऽपि शसिति।" *

(८) "हुश्नुवोः सार्वधातुके" [पा० ६।४।८७] इत्यत्र वृत्तिकृतोक्तम्—"इदमेव हुश्नुग्रहणं ज्ञापकं भाषायामपि यङ्लुगस्तीति। छन्दसि

* 'परिमाणशब्दा वृत्तावेकार्था एव।' तथाच एकवचनाग्रहणे वृत्तावेकार्थता नियता। परिमाणशब्दा एव गृह्यन्त इति भावः। अत एव प्रत्युदाहरति घटं घटमिति। घटादयो हि जातिशब्दा नैकार्था भवन्ति। जातियोगस्यैकानेकसाधारणत्वात्, किन्त्वभेदैकत्वसंख्यामुपाददते। एतच्च सर्वं जयादित्यमतेनोक्तम्। वामनस्तु मन्यते जातिशब्देभ्योऽपि भवत्येव। तथा च जश्शसोः शिरिति सूत्रे जसा सहचरितस्य शसो ग्रहणादिह न भवति कुण्डेशो ददाति वनशः प्रविशतीति प्रौढमनोरमा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दस्युभयथेत्यार्धधातुकत्वादेव यणादेशाप्रसङ्गः। न च यङ्लुगन्ताद्न्यत् प्रत्युदाहरणमुवर्णान्तमनेकाजसंयोगपूर्वं विद्यते" इति।

अत्र हरदत्तमिश्रैरुक्तम्—'एतच्च "यङोऽचि च" [पा० २।४।७४] इत्यत्र छन्दोऽनुवृत्तिमाश्रित्योक्तम्। जयादित्यस्तु तत्र छन्दोऽनुवृत्तिं नाशिश्रियत्' इति।

(९) "इदितो नुम् धातोः" [पा० ७।१।५८] इत्यत्र हरदत्तेनोक्तम्—"जयादित्यस्तु आभीयासिद्धत्वमनित्यमाश्रित्य तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थमित्यवोचत्, तन्मते धातुग्रहणं तासिनिवृत्त्यर्थं कर्त्तव्यमित्युपदेशे नुम् भवतीत्यत्र यत्नान्तरमास्थेयम्" इति।

(१०) "प्रकारे गुणवचनस्य" [पा० ८।१।१२] इत्यत्र वृत्तिकृतोक्तम्—"प्रकारो भेदः सादृश्यं च। तदिह सादृश्यं प्रकारो गृह्यते। पटु पटु। अपरिपूर्णगुण इत्यर्थः। परिपूर्णगुणेन न्यूनस्योपमाने सत्येवं प्रयुज्यते। जातीयरोऽनेन द्विर्वचनेन बाधनं नेष्यते" इति। अत्र हरदत्तः—"तद्विधौ द्विविधस्यापि प्रकारस्य ग्रहणं मन्यते। जयादित्यस्तु तत्राह [पा० ५।३।६९]—"सामान्यस्य भेदको विशेषः प्रकारः" इति।*

(११) "अतः कृकमि—" [पा० ८।३।४६] इत्यत्र वृत्तिकृतोक्तम्—"तपरकरणं किम्? भाः करणम्। भास्कर इत्ययं तु कस्कादिषु द्रष्टव्यः।"

अत्र हरदत्तः—"दिवाविभा—" [पा० ३।२।२१] इत्यादिना टप्रत्ययः। जयादित्यस्तु तस्मिन् सूत्रेऽवोचद् भास्करान्तेति प्रत्ययसन्नियोगेन सत्वं निपात्यत इति। †

---

* तथा च "प्रकारवचने जातीयर्" इत्यत्र लघुशब्देन्दुशेखरे नागेशः—अत्र प्रकारो भेद एवेति जयादित्यः। सादृश्यं भेदश्चेत्युभयमपीति "प्रकारे गुणवचनस्ये"त्यत्र वामनः। बालमनोरमायां वासुदेवदीक्षितोऽपि—"जयादित्यस्तु अत्र प्रकारो भेदः, थाल्विधौ [५।३।२३] सामान्यस्य भेदको विशेषः प्रकार इत्याह। वामनस्तु सादृश्यं भेदश्चेत्युभयमपि प्रकार इत्याह" इति।

† "सूत्रे भास्करान्तेति भाःशब्दस्य प्रत्ययसन्नियोगेन सकारो निपात्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"क्ङिति च" [१।१।५] इत्यत्रापि जयादित्यवामनयोर्मतविभेदो न्यासशब्दकौस्तुभादिषु स्पष्टः। न जानीमः किमिति हरदत्तमिश्रेण प्रसिद्धतमस्यापि विरोधस्यास्य समुल्लेखो न कृतः।

यद्यपि काशिकावृत्तिर्जयादित्यवामनाभ्यां विरचितेति निर्विवादं तथापि कियान् भागो जयादित्यप्रणीतः कियांश्च वामननिर्मित इत्यत्र विप्रतिपद्यन्ते विपश्चितः। तत्र प्रौढमनोरमाव्याख्याने शब्दरत्ने हरिदीक्षितैरुक्तम्—"प्रथमद्वितीयपञ्चमषष्ठा जयादित्यकृतवृत्तयः, इतरे वामनकृतवृत्तय इत्यभियुक्ताः।" हस्तलिखितेषु वृत्तिग्रन्थेषु सर्वत्रैव प्रथमाद्यध्यायपञ्चकस्य पुष्पिकायां जयादित्यविरचितत्वमन्तिमस्याध्यायत्रितयस्य च पुष्पिकायां वामनविवृतत्वमुपलभ्यते इति बेल्भाल्कारमहोदयः। वाराणसीमुद्रितपुस्तके त्वेतद्विपर्यय एवोपलक्ष्यते। तथाहि—तत्र पञ्चमाध्यायस्य चतुर्थचरणो वामनविरचित इति दृश्यते, तृतीयः पादः पुनर्जयादित्यविरचित इति। विषयमिममधिकृत्य बाहुल्येन विचारो वारान्तरे करिष्यते, इदानीमत्र पदमञ्जरीकृतो मतं प्रदर्श्यते। पूर्वप्रदर्शितेभ्यो हरदत्तवचनेभ्य एतदेव स्फुटीभवति यत् प्रथमाध्यायस्य प्रथमपादः, द्वितीयस्य द्वितीयचतुर्थौ, तृतीयस्य प्रथमद्वितीयचतुर्थाः, चतुर्थस्य प्रथमः, पञ्चमस्य तृतीयचतुर्थौ च जयादित्यविवृताः, षष्ठस्य प्रथमद्वितीयचतुर्थाः सप्तमस्य प्रथमः, अष्टमस्य च प्रथमद्वितीयतृतीया वामनविवृता इति। *

तेन भास्कर इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः। यद्वा कस्कादिषु बोध्यः" इति शब्दकौस्तुभे भट्टोजिः।

*	जयादित्यः	वामनः		जयादित्यः	वामनः
(१)	१।३।६७	......	(५)	३।४।२२	८।१।४
(२)	२।२।१७	६।२।७३	(६)	४।१।७८	६।१।६१
(३)	३।१।३३	७।१।५८	(७)	५।४।४३	७।१।२०
(४)	३।२।१९	८।२।३०			

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र च वृत्तिकृद्भ्यां वार्त्तिकस्थं भाष्यस्थं वा पदं सूत्रे प्रक्षिप्तं तत्रापि प्रायेण विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेणेत्युक्तम्। तथाहि—"अध्यायन्यायोद्यावसंहाराश्च" [३।३।१२२] इति सूत्रं वृत्तिकृता "अध्यायन्यायोद्यावसंहाराधारावयोश्च" इति विपरिवर्त्तितम्। अत्र जिनेन्द्रबुद्धिना किमपि नोक्तम्। हरदत्तमिश्रेण पुनः—"घञ्-विधावाहारावायानामुपसंख्यानमिति वार्त्तिकम्। वृत्तिकारस्तु आधारावायशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं साधयति स्म। विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेण" इत्युक्तम्। "कृत्याः प्राङ् ण्वुलः" [३।१।९५] इत्यत्राप्युक्तम्—"कृत्या इत्येतावदेव पठितं सूत्रकारेण, वृत्तिकारस्तु भाष्ये पूर्वपक्षरूपेण पठितं सूत्रे प्रचिक्षेप। विचित्रा हि वृत्तेः कृतिर्वृत्तिकारेणेति।" एवं वार्त्तिकपाठगणपाठयोरपि प्रक्षिप्ता अंशाः प्रायेण प्रदर्शिताः। तथाहि "मणीवादीनां प्रतिषेधो वक्तव्यः" [काशिका १।१।११] इत्यत्रोक्तम्—न चेदं वचनम्। भाष्यवार्त्तिककाराभ्यामपठितत्वात्, किन्तु मणीवादीनां निर्वाहः कर्त्तव्य-इत्यर्थः" इति। "स्वाङ्गाच्चोपसर्जनात्—" इत्यत्र वृत्तिकारेण पठितम् "अङ्गगात्रकण्ठेभ्यश्च वक्तव्यम्" इति वार्त्तिकमधिकृत्योक्तम्—"अङ्ग-गात्रेति भाष्येऽनुक्तमप्येतत् प्रयोगबाहुल्याद्वृत्तिकारेणोक्तम्" इति। "जातेरस्त्रीविषयादयोपधात्" [४।१।६३] इत्यत्रोक्तम्—गौरादि-ष्विदानीन्तनैर्हयादयः प्रक्षिप्ता इति वार्त्तिककारवचनाद्विज्ञायते।

अन्तरान्तरा सूत्रकारस्यापि स्खलितानि समुद्घाटितानि। तथाहि—"संपर्य्युपेभ्यः करोतौ भूषणे, समवाये च, उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु" [६।१।१३७-१३८] इति सूत्रत्रयं व्याख्याय प्रोक्तम्—

	वामनः	जयादित्यः
(८)	६।४।८७	२।४।७४
(९)	७।१।५८	[३।१।३३]
(१०)	८।१।१२	५।३।५९
(११)	८।३।४६	३।२।२१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अथैवं कस्मान्न कृतम्, "सम्प्रतिभ्यां करोतौ भूषणसमवाययोः, उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च" इति। सूत्रकारं पृच्छ' इति।

"एङि पररूपम्" [६।१।९४] इत्यत्रोक्तम्—रूपग्रहणं चिन्त्य-प्रयोजनं तथा चास्मि पूर्व इत्यत्र रूपग्रहणं न कृतम्। "नित्यं छन्दसि" [४।१।४६] इत्यत्राप्युक्तम्—"योगारम्भश्चिन्त्यप्रयोजनः।"

"अपृक्त एकाल्प्रत्ययः" [१।२।४१] इति सूत्रस्य न्यासे—"प्रत्यय-ग्रहणं विस्पष्टार्थमल्ग्रहणेनात्र जातिग्रहणं भवतीति ज्ञापनार्थमेक-ग्रहणम्" इत्युक्तम्। पदमञ्जर्यां पुनः—"ननु च यद्यल्समुदायोऽपि गृह्येत अल्ग्रहणमनर्थकं स्यात्, अतो यद्यपि "निपात एकाजनाङ्" [१।१।१४] इत्यत्र एकाज्ग्रहणेन वर्णग्रहणे जातिग्रहणं ज्ञापितं तथाप्यत्राल्ग्रहणसामर्थ्यात् समुदायस्य न भविष्यतीति चिन्त्यप्रयो-जनमेकग्रहणम्। तथापृक्तप्रदेशेष्वल्ग्रहणेनैव सिद्धे नार्थः संज्ञया, नतरां महत्या, नतमां पूर्वनिर्दिष्टया *। सुरां सुनोतीति क्विपि तुक्। सुरासुतमाचष्टे इति णिचि टिलोपः क्विब् णिलोपः। अत्र धातु-सकारस्य "हल्ङ्याब्भ्यः—" [६।१।६८] इति लोपो न भवति। प्रत्ययग्रहणपरिभाषया सिद्धम्, तिपा साहचर्य्याच्चैकवचनस्य ग्रहणं सिद्धमिति प्रत्ययग्रहणमपि चिन्त्यप्रयोजनम्।" इति सिद्धान्तितम्।

इममेवार्थं प्रकटयन्ति शब्दकौस्तुभे दीक्षितमहाभागाः—"एकेति व्यर्थं निपात एकाजनाङित्येकग्रहणेन वर्णग्रहणे जातिग्रहणमिति ज्ञापने-ऽपि अल्ग्रहणसामर्थ्यादेवेह व्यक्तिपरत्वात्। किञ्च सूत्रमेवेदं व्यर्थम्, अपृक्तप्रदेशेष्वल्ग्रहणेनैव सिद्धेः। न च सुरां सुनोतीति सुरासुत्, तमाचक्षाणः सुरा इत्यत्र धात्ववयवस्य सस्य लोपः स्यादिति वाच्यम्, प्रत्ययाप्रत्ययपरिभाषया गतार्थत्वाद्, विभक्तिसाहचर्य्याच्च। यथा सूत्रा-रम्भेऽपि तिसाहचर्य्यात् सेरपि तिङ एव ग्रहणात् अभैत्सीत् इति सिचो न भवति।"

* पूर्वनिर्दिष्टयेति। विधेयाविमर्शदोषदुष्टयेत्यर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषायां यङ्लुग्विषये "हरदत्तेनोक्तम्—प्रसिद्धश्च यथा छान्दसो यङ्लुगिति। प्रयोगश्च चिरन्तनैः पद्ये गद्ये च काव्याख्यायिकादौ विकटपदोपन्यासप्रधानैरपि कविभिर्न कृतो दृश्यते।"

"विदांकुर्वन्त्वित्यन्यतरस्याम्" [३।१।४१] इत्यत्रोक्तम्—"कश्चित्तु भाष्यवार्त्तिककारानुक्तत्वादुपलक्षणत्वं नेच्छति। स इतिकरणस्य प्रयोजनं ब्रवीतु।"

यद्यपि टीकाकृद्धर्मं प्रतिपालयता हरदत्तमिश्रेणान्तरान्तरा पूर्वाचार्य्याणां मतं निराकृतं तथापि पाणिन्यादिमुनित्रितयेऽस्य गरीयसी श्रद्धा प्रतिपदमेव स्फुटीभवति। मुनित्रितये च यथोत्तरं मुनीनां प्रामाण्यमिति न्यायेन पतञ्जलेरेव प्रामाण्यं सर्वत्राव्याहतम्। तथा चोपोद्घाते उक्तम्—

"यद्विस्मृतमदृष्टं वा सूत्रकारेण तत् स्फुटम्।
वाक्यकारो ब्रवीत्येवं तेनादृष्टञ्च भाष्यकृत्॥" इति।

एवं "क्ङिति च" [१।१।५] इत्यत्रापि "इह त्रिमुनि व्याकरणं यथोत्तरञ्च मुनीनां प्रामाण्यमिति दर्शनस्थितिः, तेन सूत्रकारेणानुक्तं वार्त्तिककार आह, तदुक्तं च दूषयति, * एवं भाष्यकारो वार्त्तिककारेण। व्याख्यातृत्वमपि द्वयोश्चास्तीत्येतावत्।"

"एको गोत्रे" [४।१।९३] इत्यत्र श्रुतिस्मृतिवचनोपन्यासेन पुत्त्रोत्पादितयापि प्रजया पितॄणामुपकारं प्रतिपाद्योक्तम्—सूत्रकारस्य शब्दविदां मूर्धाभिषिक्तः सूत्रयति एको गोत्र इति।

अर्वाचीनैष्टीकाकृद्भिः प्रायेण प्राचीनटीकानामनुसरणं क्रियते इति सुविदितमेवैतद् विदितवेदितव्यानाम्। तन्नैतदाश्चर्य्यं यद् हरदत्तेनापि न्यासकृतां महाभाष्यटीकाकृताञ्च वचनान्यन्तरान्तरा समुपनिबद्धानि। यत्र च तेषां वचसामसमीचीनत्वं तत्र युक्त्युपन्यासपुरःसरं तन्मतं खण्डितम्, बहुत्र मनोहरतमा अभिनवा युक्तयोऽपि समुद्भाविताः।

* उक्तानुक्तदुरुक्तार्थव्यक्तिकारि तु वार्त्तिकमित्युक्तेः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि—'तद्धितश्चासर्वविभक्तिः' इति सूत्रस्थकाशिकाव्याख्याने न्यासकारेणोक्तम्—"प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणं भवतीति तद्धितान्तस्य संज्ञा विज्ञायते इत्याह—तद्धितान्तः शब्द इति।" एतत्त्वापाततो रमणीयम्, सामान्यतः प्रत्ययग्रहणे तदन्तस्य ग्रहणेऽपि संज्ञाविधौ तत्प्रतिषेधात् "सुप्तिङन्तं पदम्" इत्यत्र न्यासकृतैव तदर्थस्य व्याख्यातत्वात्। तथाहि "सुप्तिङन्तं पदम्" [१।४।१५] इत्यत्र न्यासः —"यदीहान्तग्रहणेनाप्यन्यत्र संज्ञाविधौ तदन्तविधिर्नास्तीत्येषोऽर्थो न ज्ञाप्यते तदा "तरप्तमपौ घः" [१।१।२२] इत्यत्र तरबन्तस्य घसंज्ञा स्यात्, न प्रत्ययमात्रस्य। तस्मादत्रास्मिन्नर्थेऽन्तग्रणेन ज्ञाप्यतेऽन्यत्र संज्ञाविधौ तदन्तग्रहणं यथा स्यादिति।" एवं न्यासकारस्य प्रमादं परिलक्ष्य भाष्यप्रदीपकृतान्यथैव तदन्तविधित्वं साधितम्। तथाच तद्वचनम्—"इह संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधाद् यद्यपि केवलस्य प्रत्ययस्य ग्रहणं तथापि प्रयोजनं सर्वनामाव्ययसंज्ञयामिति वाचनिकस्तदन्तविधिरस्तीति तदन्तस्याव्ययसंज्ञा विधीयते।" इदमेव तदन्तविधित्वं हरदत्तमिश्रैर्मनोहरतरेण प्रकारान्तरेण प्रतिपादितम्—"इह यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधस्तथापि केवलस्य तद्धितस्य संज्ञायाः प्रयोजनाभावात् तदन्तविधिर्विज्ञायते इति।"

"क्ङिति च" [१।१।५] इत्यत्र न्यासकृतोक्तम्—"ननु च विधीयमानतया प्राधान्यात् प्रतिषेधस्यैवैतद् विशेषणं युक्तम्। नैतदस्ति। यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति तत्र प्रधानस्यैव भूयांसमुपकारं कर्तुमात्मनः संस्कारमनुभूय प्रधानेन सम्बन्धमनुभवति। यथोक्तम्—

गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते।
प्रधानस्योपकारे हि तथा भूयसि वर्तते॥" इति।

अत्रैव हरदत्तेनोक्तम्—ननु च विधीयमानतया प्राधान्यात् प्रति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधस्यैवैतद् विशेषणं युक्तम्, नैतदस्ति। यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति, तत्रात्मनोऽपि संस्कारमनुभूय प्रधानेन सम्बध्यते, यथा पानीयमेलादिसंस्कृतं पुरुषेण। उक्तञ्च—गुणः कृतात्मसंस्कार इत्यादि।" यद्यप्यत्र हरदत्तमिश्रेण सर्वमेव न्यासतः समुद्धृत्य विलिखितम्, तथापि "यथा पानीयमेलादिसंस्कृतं पुरुषेण" इति दृष्टान्तोपन्यासेन विषयस्यातिमात्रं सुबोधत्वं सम्पादितमितऽवश्यमेवाभ्युपगन्तव्यम्।

"गतिश्च" [१।४।१०] इत्यत्र काशिकायां "कारिकाशब्दस्योपसंख्यानम्" इति वर्तते। एतद् व्याचक्षाणेन न्यासकृतोक्तम्—"धात्वर्थनिर्देश एतदुपसंख्यानं कर्तव्यम्। योऽन्यः कर्त्तरि कारिकाशब्दो ण्वुलन्तस्तस्य कारिकां कृत्वेत्येव भवति।"

एतस्यैव महाभाष्यस्थस्य वार्त्तिकस्य व्याख्याप्रसङ्गेन भाष्यप्रदीपकृतोक्तम्—"कारिका क्रिया मर्य्यादा स्थितिरित्यर्थः। यत्न इत्यपरे। यस्तु श्लोकवाची कारिकाशब्दस्तस्य ग्रहणं न भवति। क्रियायोगशब्देन कारिकाशब्दस्य विशेषणात् क्रियावृत्तेर्ग्रहणात्।"

काशिकास्थस्यास्यैव वार्त्तिकस्य व्याख्यायां पदमञ्जरी—"कारिका क्रिया मर्य्यादा स्थितिरित्यर्थः। यत्न इत्यपरे। धात्वर्थनिर्देश इति ण्वुल्। यस्तु कर्त्तरि कारिकाशब्दः कारिका दासीति, यश्च श्लोकवाची तयोर्ग्रहणं न भवति क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात् क्रियावृत्तेर्ग्रहणात्।"

एतस्मात् स्फुटमेव न्यासकृति कैयटस्य, जिनेन्द्रकैयटयोश्च हरदत्तस्याधमर्ण्यं प्रतीयते। तथापि कैयटेन श्लोकवाचिकारिकाशब्दविषये गतिसंज्ञककारिकाशब्दस्यार्थनिर्देशे च न्यासकृतानुक्तमपि प्रतिपादितम्, हरदत्तेन पुनर्नात्र किमपीदंप्रथमतयोपनिबद्धम्।

"अव्ययीभावश्च" [१।१।४१] इतिसूत्रस्थकाशिकां व्याचक्षाणेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यासकारेणोक्तम् अत्र सुखस्वरोपचारौ निवर्त्यमानौ प्रयोजनं, न तु विधीयमानौ। लुक् पुनर्विधीयमानः।" कैयटकारेणाप्येतदेवोक्तं केवलमुदाहरणोपन्यासेन विषयोऽयं वैशद्यमापादितः। तथाहि तद्वचनम्—"सुखस्वरोपचारौ निवर्त्यमानौ प्रयोजनं यथा मशकार्थो धूम इति।" पदमञ्जरीकारेण कैयटस्यैवोक्तिरुपनिबद्धा—"अत्र सुखस्वरोपचारौ निवर्त्यमानतया प्रयोजनं मशकार्थो धूम इतिवत्, लुक् प्रवर्त्यमानतया।"

"शि सर्वनामस्थानम्" [१।१।४२] इत्यत्र जिनेन्द्रबुद्धिना सर्वनामस्थानलक्षणाया महत्याः संज्ञायाः प्रयोजनमप्रतिपद्यमानेनोक्तम्—"पूर्वाचार्य्यैरेवेयं प्रयोजनमन्तरेणापि महती संज्ञा प्रणीता। तस्या इह समाश्रयणं यत् तत् तत्कृतस्य शब्दानुशासनस्य दोषवत्त्वसूचनार्थम्। तत् पुनः स्वशास्त्रस्य पुनरुक्ततादोषपरिहारार्थम्। यदि हि तद्दोषवद्भवत्येवमस्य परिहारो युज्यते नान्यथा।" इदन्त्वतिमात्रमाश्चर्य्यकरं यन्नितरामुपहासास्पदमपि व्याख्यानमिदं हरदत्तमिश्रैः स्वग्रन्थे सन्निवेशितम्। तथाहि तद्वचनम्—"केचिदाहुः सर्वं नाम तिष्ठत्यस्मिन्निति सर्वनामस्थानम्। नाम प्रातिपदिकम्, सर्वशब्दोऽवयवकात्स्न्र्यवचनः। सर्वावयवयुक्तं यत्र नाम तिष्ठतीत्यर्थः। तेनान्यत्र न्यूनं नाम तिष्ठतीत्यर्थो गम्यते। किं सिद्धं भवति ? उपेयुषा इत्यादौ सम्प्रसारणे कृते पूर्वकृतस्येटो निवृत्तिः सिद्धा भवति, अन्यथा निवृत्तिकारणाभावादवतिष्ठतेति। एवं तु कस्मिन् प्रातिपदिके किं न्यूनं न ज्ञायेत। तस्मात् पूर्वाचार्य्यानुपालब्धुमेषा महती संज्ञा प्रणीता" इति।

दीक्षितचरणैः पुनर्व्याख्यानस्यास्य निःसारतमत्वं सम्पश्यतीक्तम्—तस्मात् संज्ञा तावत् प्रणेया, महासंज्ञाकरणं तु पूर्वाचार्य्यानुरोधात्।

अत्र दीक्षितवचनमेव समीचीनतया प्रतिभासते। संज्ञाया अन्वर्थत्वविषये पदमञ्जरीकृता यदेकीयमतमुद्धृतं तदपि मनोरमम्, परं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीये तन्त्रे तस्योपयोगो नास्ति, तेन पाणिनीयानामुद्वेजिकापि संज्ञेयं कालापकोविदानां विशेषतस्तेतोऽपहरति।

"कृत्यैरधिकार्थवचने" [२।१।३३] इत्यत्र काशिकायामुक्तम्—पूर्वस्यैवायं प्रपञ्चः। न्यासकृता च व्याख्यातम्—"ननु किमर्थमिदमित्याह—पूर्वस्येत्यादि। ते वै विधयः सुसंगृहीता येषां लक्षणं प्रपञ्चश्चेति। सुसंगृहीता यथा स्यादिति पूर्वस्यायं प्रपञ्चः क्रियते।" कैयटेन तु पूर्वव्याख्यातॄणां व्याख्याद्वितयमुपन्यस्तम्—"स्तुतिनिन्दापरत्वात् क्रियोपादानस्य कर्त्तृकरणयोर्गौणत्वात् पूर्वेणाप्राप्तः समासोऽनेन विधीयत इति केचिदाहुः। अन्ये तु प्रपञ्चार्थमेतदित्याहुः।" पदमञ्जरीकारेण कैयटोपन्यस्तमाद्यं मतं निराकृत्य द्वितीयं संस्थापितम्—"यद्यपि स्तुतिनिन्दापरत्वात् क्रियोपादानस्य कर्त्तृकरणयोर्गौणत्वं तथापि बहुलवचनात् पूर्वेणैव सिद्धम्, तथाच काकपीता नदीत्यत्राकृत्यैरप्यधिकार्थवचनैः समासो दृश्यते, अतः प्रपञ्च एवायं नाप्राप्तविधिर्नापि नियम इत्यर्थः" इति।

"शिवादिभ्योऽण्" [४।१।११२] इत्यत्र न्यासः—"अथाण्ग्रहणं किमर्थम्? न शिवादिभ्य इत्येवोच्येत। शिवादिभ्य इत्येतावत्युच्यमाने यथाविहितमिञादिरेव प्रत्ययो माभूत्, अणेव यथा स्यादित्येवमर्थमिति चेत्, नैतदस्ति। यथाविहितमिञादीन् प्रत्ययान् प्रत्येतदनर्थकम्। विनाप्यनेन तत्सिद्धेः। तस्मादन्तरेणाप्यण्ग्रहणम् अणेव भविष्यति। ननु चासत्यण्ग्रहणे फञः प्रकृतत्वात् तस्यैव विधिर्विज्ञायते। नैतदस्ति। यदि हि शिवादिभ्यः फञ विधातुमिष्टः स्यात् ततोऽश्वादिष्वेव तेषां पाठं कुर्यात्। इदं तर्हि प्रयोजनम्। अयमृष्टिषेणशब्दः शिवादिषु पठ्यते। तस्य 'सेनान्तलक्षणकारिभ्यश्च' [४।१।१५२] इति ण्यप्रत्ययः प्राप्नोति। तत्रासत्यण्ग्रहणे पुनर्विधानमिदं तद्बाधने कृतार्थमिति। ततो यथाविहितमिञेव स्यात्, नाण्। ततोऽणेव यथा स्यादित्यण्ग्रहणम्।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रैव सूत्रे पदमञ्जरी—"अथाण्ग्रहणं किमर्थं न यथाविहितमित्येवोच्येत। एवमुच्यमाने इञादय एव स्युः, ते विहिताः। पुनरारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स एवाण् भविष्यति। इदं तर्हि प्रयोजनम्। ऋष्टिषेणशब्दोऽत्र पठ्यते, तत्र यथाविहितमित्युच्यमाने अत इञ् प्राप्तस्तस्य सेनान्तलक्षणो ण्यो बाधकः प्राप्तस्तत्रारम्भसामर्थ्यादिञ् प्रसज्येत, पुनरण्ग्रहणादणेव भवति।"

तत्रैव सूत्रे शब्दकौस्तुभम्—"अण्ग्रहणं मास्तु। वचनसामर्थ्यादिञादिभिर्बाधितुमारब्धोऽणेव प्रसोष्यते। मैवम्। ऋष्टिषेणशब्दोऽत्र पठ्यते। तस्मादत इञ् प्राप्तः। स एव सेनान्तलक्षणेन ण्येन परत्वाद्बाधितुमारब्धोऽनेन सूत्रेण प्रतिप्रसूयेत। तस्माद् यथान्यासमेवास्तु।"

अतश्चेदमेव व्यक्तीभवति यन्न्यासकारस्यैव वचांसि संक्षिप्य पदमञ्जरीकारेणोपनिबध्यन्ते, कौस्तुभकारेणापि पदमञ्जरीकारस्येति।

"कन्यायाः कनीन" [४।१।११६] इत्यत्र न्यासकृता न किमप्युक्तम्। कैयटेन पुनर्मतद्वितयं प्रदर्शितम्, हरदत्तेनापि तदेवानूदितम्।

"चतुराद् घः" [४।१।१३८] इत्यत्र न्यासकृतोक्तम्—"घशब्द एव न तु तरप्तमपाविति वेदितव्यम्। कथं पुनरेतल्लभ्यते यावता घ इति तरप्तमपोरियं संज्ञा। संज्ञा चोच्चारिता संज्ञिनं सम्प्रत्याययतीति तयोरेव ग्रहणं युक्तम्। नैष दोषः। प्रत्ययविधौ यत्र घ इति श्रूयते तत्र स्वरूपस्य ग्रहणं भवति ज्ञापकात्। यदयं प्रत्ययादेर्घकारस्येयादेशं शास्ति तज्ज्ञापयति यत्र प्रत्ययविधौ घः श्रूयते तत्र स्वरूपमेव गृह्यते इति। न हि संज्ञिनो ग्रहणेन प्रत्ययादेर्घः सम्भवति।"

तत्रैव पदमञ्जरी—"घशब्द एव न तरप्तमपौ, अन्यथा सर्वत्रैव प्रत्ययविधौ घ इति तरप्तमपोर्ग्रहणात् प्रत्ययादेर्घकारस्येयादेश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनमनुपपन्नं स्यात्। 'न च तुग्राद् घन्' [४।४।११५] 'वञ्चौ च' [४।४।११७] इति घन्घचावक्काशौ, तत्रापि संज्ञाशब्दः सानुबन्ध उपात्तः। अनुबन्धास्तु संज्ञार्थं इति सम्भवात्। ङमुण्नित्यमितिवत्। "किमिदं भ्यां वो घ" इत्यत्रापि तरप्तमपोरिवादेशत्वं विज्ञायेत।"

शब्दकौस्तुभे मञ्जरीकृन्मतमेवानूदितम्।

अत्रेदमवधेयम्। यद्यपि हरदत्तेन न्यासकारवचनमेव समुद्धृतम्, तथापि हरदत्तेन घन्घच्-विषयिकाभिनवा युक्तिः समुद्भाविता समाहिता च।

"व्यन् सपत्ने" [४।१।१४७] इत्यत्र वृत्तिकृतोक्तम्—"भ्रातृशब्दाद्व्यन्प्रत्ययो भवति समुदायेन चेदमित्रः सपत्न उच्यते। अपत्यार्थोऽत्र नास्त्येव।" अत्र प्रत्यवतिष्ठमानः प्रदीपकारः प्राह—विरोधाभावात् सपत्नेनापत्यार्थो न बाध्यते। न च समुदायार्थः सपत्नः। प्रकृतिप्रत्ययार्थयोस्त्यागप्रसङ्गात्। न च गत्यन्तरसम्भवे तत्त्यागो युक्त इति भावः। एतदसहमानेन वृत्तिकृदुक्तमेव बहुमन्यमानेन मञ्जरीकृतोक्तम्—अथानुवृत्तस्यापत्यस्य विशेषणमेव सपत्नं कस्मान्न भवति। तत्राह—अपत्यार्थोऽत्र नास्त्येव। एतदेवोदाहरणेन स्पष्टयति—पाप्मना भ्रातृव्येणेति। न हि पाप्मा भ्रातुष्पुत्रो भवति। अतः सपत्नमात्रे भ्रातृव्यशब्दस्य दर्शनादपत्यार्थोऽत्र नास्ति। किञ्च योऽपि सपत्नो भ्रातुरपत्यं सम्भवति सोऽप्याद्युदात्ताद् भ्रातृव्यशब्दात् सपत्नरूपेणैव प्रतीयते नापत्यरूपेण। तथाच भ्रातृव्यो भ्रातृव्य इति सहप्रयोगोऽपि व्यन्व्यदन्तयोर्भवति। अतः सुष्ठूक्तमपत्यार्थो नास्त्येवेति।"

अत्र भाष्यकारश्रद्धया यद्यपि सर्वैरेव प्राचीनैरर्वाचीनैश्च व्याख्यातृभिरपत्यार्थः स्वीकृतस्तथापि भाष्यविरुद्धमपि समीचीनं वृत्तिकृन्मतमभ्युपगतं युक्त्युपन्यासपुरःसरं प्रतिष्ठापितञ्च प्रमाणपरतन्त्रेण हरदत्तमिश्रेण। भाष्योक्तं तु प्रौढिवादमात्रमिति तस्याशयः।

"युवाखलतिपलितवलिनजरतीभिः" [२।१।६७] इत्यत्र जयादित्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोक्तम्—"खलत्यादिभिः समानाधिकरणैः सह युवशब्दः समस्यते तत्पुरुषश्च समासो भवति। जरतीभिरिति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणेन लिङ्गविशिष्टस्यापि ग्रहणमिति ज्ञापनार्थः।" अत्र न्यासः—"खलत्यादिभिः समानाधिकरणैरितप्रादि। यद्येवं किमर्थं जरतीभिरिति स्त्रीलिङ्गेन निर्देशः। जरद्भिरित्येवं नाम निर्देशः कर्त्तव्यः स्यात् ? न हि जरतीशब्देन स्त्रीलिङ्गेन युवशब्दस्य पुंलिङ्गस्य सामानाधिकरण्यमुपपद्यत इत्याह—जरतीभिरिति स्त्रीलिङ्गेन निर्देश इति। कथं पुनरनेन निर्देशेनैषा परिभाषा शक्यते ज्ञापयितुम्? यद्येषा परिभाषा न स्यात्तदा जरतीभिरित्येवं निर्देशोऽनर्थकः स्यात्। तथा च समानाधिकरणाधिकारात् समानाधिकरणेन जरतीशब्देनायं समासो विज्ञायते। न च तेन स्त्रीलिङ्गेन पुंसि वर्त्तमानस्य युवशब्दस्य सामानाधिकरण्यं भवति। तदेष निर्देशः कथमर्थवान् भवति? यद्येषा परिभाषावतिष्ठते। तस्यां हि सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्य ग्रहणं भवतीत्युपपद्यते युवतिजरतीशब्दयोः सामानाधिकरण्यम्, तस्मिंश्च सति तयोः समासः। तदेवं जरतीभिरिति निर्देशो ज्ञापयत्येषा परिभाषास्तीति। नन्वेवमपि जरत्या समास उच्यमाने जरता न प्राप्नोति युवजरन्निति। नैष दोषः वृत्त्यन्तरे हि जरद्भिरिति पठ्यते। उभयथा ह्याचार्य्येण शिष्याः प्रतिपादिता इत्युभयं सिध्यति।

अत्र कैयटेन महाभाष्यप्रदीप उक्तम्—"पुंलिङ्गेन सामानाधिकरण्यं नोपपद्यत इत्यर्थापत्त्या परिभाषा ज्ञाप्यते तेन युवतिर्जरतीति स्त्रीलिङ्गेन समासः। नन्वेतयोरपि विरुद्धवयोवाचित्वान्नास्ति सामानाधिकरण्यम्। नैष दोषः, जरत्यां युवतिधर्मोपलम्भात् युवजरतिर्वा जरतीधर्म्मसद्भावात् तद्रूपारोपात्। युवतिशब्दस्यैव पूर्वनिपातार्थमिदम्, अनियमो हि गुणशब्दात् स्यात्। जरद्भिरित्यपि पाठं शिष्या आचार्य्येण बोधिता इति युवजरन्नित्यपि भवति।"

अत्रैव सूत्रे पदमञ्जरी—"संज्ञायूनो ग्रहणे गार्ग्यायणः खलतिरि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वादाविव तु स्यान्न च तस्य जरतीशब्देन सामानाधिकरण्यम् न च गार्ग्यायणी युवतिरस्ति, स्त्रियां युवसंज्ञाप्रतिषेधादतो युवेति स्वरूपग्रहणमित्याह—युवशब्द इति। कथं पुनर्युवशब्दस्य जरतीशब्देन सामानाधिकरण्यं पुंलिङ्गस्य स्त्रीलिङ्गेनेति ? तत्राह—स्त्रीलिङ्गनिर्देश इति। अस्यां हि परिभाषायां सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्यापि ग्रहणादुपपद्यते युवतिजरतीशब्दयोः सामानाधिकरण्यम्, असत्यां तु नोपपद्यत इत्यर्थापत्त्या परिभाषा ज्ञायते। युवखलतीति। 'इदिकारादक्तिनः' 'सर्वतोऽक्तिन्नर्थादित्येके' इति ङीष्। वलिशब्दः पामादिः। युवजरन्निति। जरद्भिरित्यपि पाठः केनचिदाचार्य्येण बोधितः इति पुंलिङ्गेनापि समासो भवतीति भावः। युवतिर्जरतीति। कथं विरुद्धवाचिनोः सामानाधिकरण्यम् ? अन्योऽन्यधर्मोपलम्भात् तद्रूपत्वारोपाद् भविष्यति। यद्येवम्, विभिन्नलिङ्गयोरपि सामानाधिकरण्यसम्भवात् कथं परिभाषा ज्ञाप्यत इति चिन्त्यम्। युवशब्दस्य पूर्वनिपातनियमार्थं वचनम्, अनियमो हि गुणशब्दत्वात् स्यात्।"

अत्रैव सूत्रे शब्दकौस्तुभे भट्टोजिः—"जरद्भिरिति पाठान्तरम्, तत्राद्यपाठे युवशब्दस्य जरत्याः सामानाधिकरण्यासम्भवात् तदन्यथानुपपत्त्या प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापीति परिभाषा ज्ञाप्यते। तथा च युवयुवतिशब्दयोर्द्वयोरपि खलत्यादिभिश्चतुर्भिरुभयलिङ्गैः समानाधिकरणैः सह समासे अष्टावुदाहरणानि पर्यवस्यन्ति। तथाहि युवा खलतिः युवखलतिः, युवतिः खलती युवखलती। इदिकारादक्तिनः, सर्वतोऽक्तिन्नर्थादित्येके इति ङीष्। युवपलितः युवपलिता। युववलिनः युववलिना। वलिशब्दः पामादिः। युवजरन् युवजरतीति। जीर्य्यतेरतृन्। उगितश्चेति ङीप्। युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात् समानाधिकरण्यम्। यत्तु, एवं सति पुंस्येव स्त्रीत्वारोपेण जरतीसामानाधिकरण्यं सम्भवतीति परिभाषाज्ञापनं कथमिति हरदत्तेनोक्तम्, तत्रेदमुत्तरम्—आरोपं विनोपपत्तौ किं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन। न ह्येकमगत्यारोपितमिति सर्वमारोपणीयम्। लच्यानुरोधेन परिभाषाज्ञापनस्यैवौचित्यात्। "कुमारः श्रमणादिभिः" [१।२।७०] इति वा ज्ञापकमस्तु, श्रमणादिषु स्त्रीलिङ्गानामेव बहूनां पाठात्। "अश्वादिभ्यः फञ्"विधौ [४।१।११०] "पुंसि जातः" इति गणसूत्रे पुंसीत्युक्तिर्ज्ञापिकेति तु तत्त्वम्। युवशब्दस्य पूर्वनिपातनियमार्थं वचनम्। अनियमो हि प्रसक्तः, गुणशब्दत्वात्।"

पूर्वविलिखितस्य प्रदीपस्योद्योतः—"यद्यपि मुखं चन्द्र इत्यादौ भिन्नलिङ्गयोरपि सामानधिकरण्यं तथापि न सर्वत्र, किन्तु सम्प्रतिपन्नस्थल एव। तदप्येकस्य नियतलिङ्गत्व एवेति भाष्याभिप्रायः। तद्रूपारोपादिति। नन्वेवं पुंस्त्वस्याप्यारोपोऽस्तु किं ज्ञापकेन, असङ्गतं च तदिति चेन्न। उभयोरपि गौरवात्, लच्यानुरोधेन भाष्यप्रामाण्येन क्लृप्तपरिभाषाज्ञापनस्यैवौचित्याच्चेत्यलम्। जरद्भिरितप्रयोति। अत्र मानं चिन्त्यम्। युवजरन्निति। बहुलग्रहणेन सुसाधम्।" (क्रमशः)

अप्पाशास्त्रिणां पत्राणि

(८)

श्रीशिवः शरणम् सांगलीतः
७।१८३५

सप्रणयं गाढमालिङ्ग्य मूर्ध्नि च समाघ्राय कुशलं वार्त्तयति। वत्स! प्रेरितपूर्वं मया श्रीमते पत्रमेकं सह मदीयया प्रतिकृत्या। कच्चिदधिगतं तदेतच्छ्रीमता? अयि हृदयाह्लादन! प्रकाशितं वङ्गीयसंस्कृतोपाधिपरीक्षाणां फलमिति वङ्गवासितोऽवगतम्यते। तदुत्कण्ठते चेतः श्रीमतः परीक्षाफलमवगत्यामन्दमानन्दमनुभवितुं व्याकरणतीर्थ इत्युपाधिना च संयुज्यमानं श्रीमतां मङ्गलमभिधानमालोकयितुम्। तच्छीतलीकरोतु प्रियवयस्यस्तथाविधप्रवृत्तिपीयूषासेकेन समुत्कण्ठाकुलमन्तरङ्गमस्य जनस्य। कुत्रेदानीमायुष्मान् उपेन्द्रचन्द्रः। अत्र मे मङ्गलम्। श्रीमतस्तु सर्वाङ्गीणं तदनवरतं विज्ञाय वाञ्छाम्यन्तरात्मानमानन्दयितुम्। प्रणिपात्यतामव्याजभक्तिभरावनम्रोऽयं जनः प्राणस्य मे प्रियबन्धोः श्रीमत्याश्च जननीनिर्विशेषायाः प्रजावतीदेव्याश्चरणसरोजद्वितये। किमधिकमिति शिवम्।

भवदेकप्रेमा—श्रीअप्पाशर्म्मा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता—ओरियेण्टाल सिरिज

१ । **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्म्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, अस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगीऽयं ग्रन्थः—२॥०)

२ । **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-जीहान् फयान्‌स्यानेन-कृताङ्गलभूमिका-समेतम्—॥/०

३ । **मुक्ताफलम्**—वोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेय-तया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ-लाहा पि-एइच, डि, लिखित-बृहदाङ्गलभूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४ । **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनावृत्तिः)—१)

५ । **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत-मलङ्कारशास्त्रम् डाः श्रीसुशीलकुमार दे डि लिट् महोदयेन संशोधितम्—१॥०)

६ । **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मक-शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चात्र वङ्गदेशोपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्या-पक—श्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य। मूल्य—२)

७ । **जयमङ्गला**—श्रीशङ्कराचार्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२)

८ । **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-नुधिरिति शक्यते वक्तुम्—१)

৯। **ব্রহ্মসূত্রম্**—শ্রীমদ্ভাগবতভাষ্যসমেতম্। "অর্থোঽয়ং ব্রহ্মসূত্রাণাং শ্রীমদ্ভাগ-বতাভিধঃ" ইতি গারুড়বচনস্য যাথার্থ্যং প্রদিদর্শয়িষতা পণ্ডিত—শ্রীহরিদাসবিদ্যা-বাগীশেনাত্র শ্রীমদ্ভাগবতগ্রন্থাদুদ্ধৃতা গ্রন্থাংশব্রহ্মসূত্রভাষ্যতয়া নিরূপিতাঃ, ব্রহ্ম-সূত্রাণি চ বঙ্গভাষয়া বিশেষেণ ব্যাখ্যাতানি—২॥০

प्राप्तिस्थानम्—ओरियेण्टाल प्रेस

१०७ नं मेछुयाबाजार ष्ट्रीट्, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ভট্ট-গুণবিষ্ণু প্রণীত

ছান্দোগ্যমন্ত্রভাষ্য

শ্রীদুর্গামোহন ভট্টাচার্য্য কাব্য-সাংখ্য-পুরাণতীর্থ,
এম-এ সম্পাদিত

(মঃ মঃ ডাঃ শ্রীগঙ্গানাথ ঝা, এম-এ, ডি-লিট্ মহোদয়
লিখিত মুখবন্ধ সংবলিত)

সামবেদীয় কর্ম্মানুষ্ঠানে পাঠ্য বৈদিকমন্ত্রসমূহের ব্যাখ্যাত্মক "ছান্দোগ্যমন্ত্রভাষ্য" "গুণবিষ্ণু-টীকা" নামে বঙ্গে ও মিথিলায় সুপ্রসিদ্ধ। এই ব্যাখ্যা এত প্রাচীন ও প্রামাণিক যে হলায়ুধ, সায়ণাচার্য্য প্রভৃতি বেদব্যাখ্যাতৃগণ তাঁহাদের ভাষ্যে ইহা হইতে অংশবিশেষ গ্রহণ করিয়াছেন। ইহাতে বিবাহ, অন্নপ্রাশন, চূড়াকরণ, উপনয়ন প্রভৃতি দশবিধ সংস্কার ও স্নান, সন্ধ্যা, শ্রাদ্ধ প্রভৃতি নানাবিধ গৃহ্যকর্ম্মের উপযোগী মন্ত্রগুলি ব্যাখ্যাত হইয়াছে।

বহু আদর্শ পুথি অবলম্বনে এবং মুদ্রিত ও অমুদ্রিত নানাবিধ বৈদিক গ্রন্থের সহায়তায় এই পুস্তক বিশুদ্ধরূপে এবং সমগ্রভাবে সংস্কৃত-সাহিত্য-পরিষৎ হইতে প্রকাশিত হইয়াছে। প্রকাশের পর অল্পকাল মধ্যেই পুস্তকখানি ভারতবর্ষ ও ইউরোপে সর্ব্বত্র পণ্ডিতগণের সমাদর লাভ করিয়াছে এবং বিভিন্নভাষার পত্রিকায় ইহার সুখ্যাতিমূলক সমালোচনা বাহির হইয়াছে।

অভিমত—

হিতবাদী—"কালের কুটিল গতিতে বেদাধ্যয়ন বিলুপ্তপ্রায়, ফলে বৈদিক মন্ত্রের বিকৃতিহেতু আমাদের ক্রিয়াকাণ্ডগুলি পণ্ড হইতেছে।…এক্ষণে গুণবিষ্ণুর গ্রন্থ প্রকাশিত হওয়ায় অনেক সন্দেহের মীমাংসা হইল। যাঁহারা বিশুদ্ধরূপে মন্ত্রপাঠ করিয়া যথাযথভাবে শাস্ত্রীয় কর্ম্মের অনুষ্ঠান করিতে ইচ্ছা করেন, তাঁহাদের পক্ষে ও পুরোহিতগণের পক্ষে এই গ্রন্থ অবশ্য দ্রষ্টব্য।…"

मञ्जु-भाषिणी

इयमेकैव जगति संस्कृतभाषामयी 'साप्ताहिकी' वृत्तान्तपत्रिका। संस्कृतभाषा-ग्रन्थ-प्रकाशकानाम् अनुत्तमं विज्ञापनसाधनम्। सर्वदेशेषु प्रचलति।

भारत-ब्रह्मदेश-लङ्का-वासिभिर्देयं वार्षिकं मूल्यम्—३-०-० ; अन्यदेशीयैर्देयमूल्यं ५ शिलिंग।

मैनेजर—मञ्जुभाषिणी
CONJEEVERAM (Madras.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

Vol. XIV, No. 6.] [October, 1931.

१८५२ शकीये आश्विने १४श-वर्षस्य ६ष्ठ-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सह-सम्पादकः—

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्
श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishad, Shyambazar, Calcutta
Printed at
Siddheswar Press,
39/2, Shibnarayan Das's Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা, প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থের গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফুর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণ বিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

প্রাপ্তিস্থান—

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

October, 1931.	१८५३ शकीये आश्विने १४वर्षस्य ६ष्ठ-संख्या	Vol. XIV. No. 6.

उपनिषत्कथा

(छान्दोग्ये चतुर्थावृत्तिः)

[निबन्धकः—महामहोपाध्यायः श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः]

अयि भोः प्रियपाठकाः, पूर्व्ववृत्तो जबालासत्यकामसंवादः साम्प्रतमपि भवतां स्मृतिपथान्नापगत इत्यनुमीयते। अत्र खलु गवेषणापरायणाः केचन वैदेशिकाः सदाचारपूतायाः सत्यकामसूतेर्जबालायाः शशाङ्कसुन्दरे चरित्र-चित्रे वितथं कलङ्कपङ्कमशङ्कमारोपयन्तः स्वान्ते सन्तोषसन्ततिमातन्वन्ति, ते खलु वराका नितरामस्माभिरुपेक्षणीया एव, यतः सर्व्वतः स्वेच्छातन्त्राणां तेषाम्—

धर्म्मः कर्म्मसमाचारः प्रवृत्तिर्वृत्तिरेव च।
अस्मत्तः सर्व्वतो भिन्नाः प्राच्यवाच्या यथा दिशः॥

अतोऽस्मद्विपरीतदिग्वर्त्तिनः सुखसेवैकव्रताः सुकृतिनस्ते अस्मत्समाचारेषु यथातथा नाम जल्पन्तु स्वच्छन्दं निन्दन्तु स्तुवन्तु वा, तेनास्मन्महिमा नोपचीयते, नाप्यपचीयते। यत् पुनरस्मदीया अपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केचन प्राज्ञम्मन्यास्तन्मति-पिशाचिकयोपगूढचेतस्तया समुपहत-विवेकबुद्धय इव विस्मृतात्मसमाचारा जगदिदमात्मौपम्येन परिपश्यन्ति, तदिदमविमृष्यकारित्वमस्माकमन्तःशूलमिव निरतिशयं वैशसमुपजनयति। तत्प्रबोधनार्थमेवायमस्माकमुद्यम इत्यवधेयम्। तदास्तां तावत्, अलमप्रस्तुतप्रस्तावनया, प्रकृतमर्थमिदानीमनुसरामः, येन तावज्जबालायाश्चारित्रं मेघमुक्तशशधर इव समधिकं शोभतेतराम्। तेषामित्थं कथावतारः—

प्रौढे वयसि वर्त्तमाना जबाला नाम काचिदबला उपनयनार्थिना गुरुकुलं जिगमिषुणा सत्यकामाभिधानेन पुत्त्रेण स्वगोत्राभिधानं पृष्टा —"नाहमेतद्वेद—यद्गोत्रस्त्वमसि" इत्युक्तवती। प्रागेवोक्तं यत्, एतस्मादेव वचनाद् जबालायाः साधुचरित्रे सत्यकामस्य चाजारजत्वे विप्रतिपद्यन्ते केचन मनीषिण इति, वयन्तु तदेतन्न साधु मन्यामहे। यतोऽत्र जबालाया यथोक्तवचनात् स्वैरिणीत्वं नैवावगम्यते, नाप्यनुमातुं शक्यते। यदि तावद् जबाला जात्या ब्राह्मण्येव नाभविष्यत्, नूनं तर्हि गोत्रे परिचयप्रसङ्गे "परिचारिणी" इत्येतावन्मात्रमात्मविशेषणं नैव निरदेक्ष्यत्, अपि तु 'दासी'इत्येवावदिष्यत्। न हि परिचारिणीति पदं दास्यां निरूढम्, येन तत्पदबलादेव जबालाया दासीत्वमनुमीयेत। अतः परिचारिणीति पदेन तस्याः पर्य्याप्तपरिचर्य्यापरतैवाध्यवसीयते, न पुनर्दासीभावः।

यदपि "बह्वहं चरन्ती" इत्युक्तिरेव जबालाया बहुचारिणीभावं गमयतीत्युच्यते, तदपि दुर्विलसितमज्ञताया भाषाविज्ञाने। यतः 'बहु' इति पदं क्रियाविशेषणं चरन्तीत्यनेन समन्वेति। ततश्च बहु प्रभूतं यथा स्यात् तथा चरन्ती सती परिचारिणी—बाहुल्येन परिचर्य्यापरासमित्येवं समुदितोऽर्थः सम्पद्यते, नात्र बहुपुरुषगामितारूप-बहुचारिणीभावस्य गन्धोऽपि समुपलभ्यते। यदि पुनः कुलललनानां परिजनपरिचर्य्याबाहुल्यमेव व्यभिचारितायाः गमकं स्यात्, हन्त भोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि अविभक्तपरिजनबहुलानामितद्देशवास्तव्यानां कुटुम्बिनां गुरु-भर्तृ-बान्धवादिसेवापरासु कुलाङ्गनास्वपि निःशङ्कमुपलिप्यतामयं व्यभिचारकलङ्कपङ्कसङ्करः। तथा च सर्व्व एवाकुलीभवेल्लोकव्यवहारः। आचार्य्यपादास्तु एतत्सन्दर्भव्याख्यानावसरे—"भर्तृगृहे बहुपरिचर्य्याजातमतिथ्यभ्यागतादिविषयं ··· ··· परिचरणव्यग्रचित्ततया गोत्रादिस्मरणे मम मनो नाभूत्। यौवने च तत्काले त्वामलभे लब्धवत्यस्मि। तदैव ते पितोपरतः, अतोऽनाथाहम्" इत्येवं व्याजह्रुः।

अथ सा व्यभिचारपरतया गणिकाप्रायैव स्यात्, तदा ध्रुवं सा स्वसुतमात्मानञ्चाब्राह्मणतया जानात्येव। तथा विजानत्यपि किमिति उपनयने कृताग्रहं सौम्यविग्रहं सत्यकामं न न्यवारयत्; किमिति वा सत्यकामं भूतार्थं नोपादिशत्? सा तु आत्मनो गोत्रपरिचये नितरामज्ञतामभिनीय "जबाला तु नामाहमस्मि, सत्यकामस्त्वमसि। स सत्यकामो जाबाल एव ब्रवीथाः" इत्यादिभिस्तेजोगर्भैः प्रोत्साहवचनैः सत्यकाममभिलषितेऽर्थ एव समनोदयत्।

सत्यकामस्य चाब्राह्मणवंश्यत्वे कुतोऽकस्मादुपनयनग्रहणे स्वैरप्रवृत्तिः? विशेषविदुषा गुरुणा च कथं कृताकृतविवेकमूढेनेव सहसा तत्राभ्यनुज्ञानं कृतम्? इत्येवं सर्व्वमेवाकुलीभवेज् जबालायाः स्वैरिणीत्वपक्षे।

सहृदयैः पाठकैरत्रै तदप्यभिनिवेष्टव्यम्, यत्, उपनयनग्रहणे यथा गोत्राभिज्ञानमपेक्ष्यते, तथा पित्रादिनामविज्ञानमपि, सत्यामपि तयोर्द्वयोरेव तुल्यायामपेक्षायां तत्र सत्यकामो गोत्रमात्रमपृच्छन्मातरं, न पुनः पित्रादीनां नामान्यपि? तदप्रश्नादेव सम्यक् प्रतीयते यत्, सत्यकामस्य पित्रादिनामविज्ञानं सम्यगेवासीत्, नासीत् केवलं गोत्राभिज्ञानम्। तत एव तन्मात्रविषयकः प्रश्नः साधु संगच्छते मातरं प्रति। मातापि अलब्धगोत्रसंविदः पुत्रस्य प्रश्नानुरूपमेवोत्तरं प्रायच्छत्—"नाहं वेद यद्गोत्रस्त्वमसि" इति। नैतावता जबालायाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वैरिणीत्वं, सत्यकामस्य च जारजत्वं सिध्यतीति सुधीभिरेव विचारणीयम्। साम्प्रतमपि प्राप्तवयस्कानां पुंसामपि कदाचित् स्वगोत्रानभिज्ञता समक्षमीक्ष्यते किं पुनर्योषितां परकुलप्रसूतानाम्। अतः पतिगोत्रानभिज्ञानं जबालाया नातीव विस्मयमावहति।

ये पुनराचक्षते—ब्राह्मणादिविभागो न जन्मकृतः, परन्तु गुणकर्म्मकृत एव। मनुष्येषु य एव सत्यसंयमादिगुणविशेषसम्पन्नः, स एव निष्प्रत्यूहं ब्राह्मण्यमधिकरोति, न तत्र जन्म वंशगौरवं वा कथञ्चिदपेक्ष्यते। सत्यकामश्च तादृशगुणसम्पत्तिमात्मनोऽदर्शयत् सत्यवादितया ; तत एव विचारपरो गुरुस्तं ब्राह्मण्येनान्वग्रहीदिति। एतदपि मनोरथमात्रं मन्यन्ते मनीषिणः, यतः सत्यवादिता नैव ब्राह्मणत्वस्य प्रयोजिका, अपि तु ब्राह्मणत्वमेव सत्यवादितायाः प्रयोजकम्। ब्राह्मणो हि सत्यं ब्रूयात्, नानृतमित्येवमेव शास्त्रीयो विधिरुपलभ्यते, न खलु सत्यवादी ब्राह्मणो भवतीत्येवं विधिः कुत्रापि परिलक्ष्यते। ततश्च केवलसत्यवदनमात्रेण सत्यकामस्य ब्राह्मणत्वावधारणं कुतः सम्भवतीति सुधीभिरेव विचारणीयम्।

ये पुनः परोत्कर्षामर्षिमनसः परदोषाविष्करणे स्फुटपद्मपलाशचक्षुषो भवन्ति, परगुणोद्दीक्षणे च नितरां गजनिमीलिकामाचरन्ति, ते तु स्वतन्त्राः—न गुरूनाद्रियन्ते, न साधूनपेक्षन्ते, न सत्पथमवलोकयन्ते, न साधुसमाचारं बहुमन्यन्ते, दुष्टमपि स्वपक्षं नोपलक्षयन्ते, प्रत्यक्षमपह्नुवाना अपि न विलज्जन्ते, दुर्व्वारगर्व्वसर्व्वस्वतया च परं कोलाहलमारभन्ते ; नितरामुपेक्षणीया एव ते वराकाः। वयन्तु प्रतीमः—जबालासौ नाब्राह्मणी नापि कामकारिणी स्वैरिणी, सत्यकामोऽपि नाब्राह्मणतनयः, नाप्यकार्य्ये दुराग्रह इत्येवं यथोक्तश्रुतिवचनादेवावधार्य्यत इति। अतः परमपि यदि केचन विवदितुमिच्छन्ति, तान् स्वपक्षसमर्थनाय सोत्कण्ठमर्थयामह इति शिवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याप्रस्थानम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—कालीघट्टवास्तव्यः श्रीगुरुपदहालदारः]

मन्दाधिकारिणो यथा, क्रियायोगेणापि येषां विवेकख्यातिरविप्लवा न भवति। तान् प्रति शास्त्रं विरोधाय योगाङ्गान्यपि प्राह—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इति। एतान्यष्टौ योगस्य साधनानि भवन्ति। योगमारुरुक्षुभिः ससाधनः क्रियायोगो यथाशास्त्रमनुष्ठेय इत्यभिप्रायेण तपःस्वाध्यायेश्वरप्रणिधानादीनि योगसाधनैः सह पिण्डीकृत्य योगज्ञानोभयसाधनतया सर्व्वमेव मन्दाधिकारिभ्यो गृहस्थादिभ्यश्च तेभ्य उपदिश्यन्ते।

कर्म्मणा सहिताज्ज्ञानात् सम्यग् योगोऽभिजायते।
ज्ञानञ्च कर्म्मसहितं जायते दोषवर्जितम्॥

इत्यादिः स्मृतिरेव क्रियादीनां योगसाधनतामभिधत्ते। "योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्म्मणी"त्यादिश्रुतिश्च योगस्य ज्ञानसाधनतां स्पष्टमेव व्यनक्ति। एतेषां साधनानां द्वितीयपादोक्तयमादीनि देहप्राणेन्द्रियाणां निग्रहरूपाणि पञ्च बहिरङ्गाणि, तृतीयपादोक्तध्यानादीनि तु चित्तस्य निग्रहरूपाणि त्रीण्यन्तरङ्गाणीति मन्तव्यम्।

योगाङ्गानां स्वरूपं सूत्रकारेण दर्शितं भाष्यकारादिभिश्च व्याख्यातम्। तत्र ये योगिनं निषिद्धकर्म्मभ्यो यमयन्ति निवर्त्तयन्ति ते यमा अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहरूपा भवन्ति। अहिंसा भूतानामनभिद्रोहः। तदेव पौराणिका 'अहिंसा वाङ्मनःकायैः परपीडानिवर्त्तनमि'त्याचक्षते *। सत्यादीनामहिंसाप्रयोजनकत्वं भाष्यटीकादिषु प्रतिपादितम्।

* अहिर्बुध्न्यसंहिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा नागपदेऽन्यानि पदानि पदगामिनाम् ।
एवं सर्वमहिंसायां धर्म्मार्थमपि धीयते ॥

इत्यादिस्मरणात् । तदेव योगिनः सर्वेभ्यो हिंसानिदानेभ्यो निवर्त्तमानास्तपःस्वाध्यायध्यानवन्त आत्मानमुपयन्ति ।

प्राणवियोगादिप्रयोजनकव्यापारात्मिका हिंसा । सा च स्वयं कृता, कुरु कुर्व्विति प्रयोजनानुकूलव्यापारेण कारिता, साधु साध्विति मतानुमोदिता चेति त्रिधा । त्रैविध्यमेतच्च परस्परव्यामोहनिवारणाय शास्त्रेषु व्यवस्थापितम् । अन्यथा मन्दमतिर्मन्येत न मया स्वयं निष्पादिता हिंसेति नास्ति मे पापमिति । तदुक्तम्—

भोक्तानुमन्ता संस्कर्त्ता क्रयविक्रयिहिंसकाः ।
उपहर्त्ता घातयिता हिंसकाश्चाष्टधाऽधमाः ॥ इति ।

एकैका हिंसा लोभक्रोधमोहभेदेन पुनस्त्रिविधा भवति । लोभक्रोधमोहाश्च मृदुमध्यतीव्रत्वेन त्रिप्रकाराः । मृदुमध्यतीव्रा अपि पुनस्त्रिप्रकाराः—मृदुमृदुर्मध्यमृदुस्तीव्रमृदुः, मृदुमध्यो मध्यमध्यस्तीव्रमध्यः, मृदुतीव्रो मध्यतीव्रस्तीव्रतीव्रश्चेति । एवं लोभो नवविधस्तथा क्रोधमोहाविति तत्पूर्व्विका हिंसाः सप्तविंशतिधा भवन्ति । अतः कृतकारितादिभेदेनापि प्रत्येकं सप्तविंशतिधेति हिंसाया एकाशीतिर्भेदाः । सर्व्वास्ता हिंसाः प्राणिनां वधबन्धनक्लेशव्यापारत्वाद् दुःखाज्ञानानन्तफला इति योगिनस्ताभ्यः सर्व्वाभ्य एव प्रतिनिवृत्ता भवन्ति । यागादिषु वैधहिंसा शास्त्रेषु व्यवस्थापिता । भाष्ये तु तस्या अपि त्यागो महाव्रतत्वेन कल्पितः, यागादिकर्म्मणि योगिनां प्रयोजनाभावात् । स्मृतिश्च—

हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी ।
ब्राह्मणैः सा न कर्त्तव्या यतस्ते सात्त्विका मताः ॥ इति ।

ननु, विधात्रैव भक्षणार्हा भक्षयितारश्च निर्म्मिता इति न्यायेन हिंसायां प्राणिनां कामचारः स्वाभाविक एव । तथा हि प्राणसंवादी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पनिषदि श्रूयते—'स (प्राणः) होवाच किं मेऽन्नं भविष्यतीति। यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुरि'ति। भवति च तदनुवादिनी स्मृतिः—'प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयदि'ति। योगिनश्च व्रीहियवादिना प्राणान् बिभ्रति, व्रीहियवादीनामपि जीवयोगोऽस्ति। अत एव हिंसाया अनिष्टानुबन्धित्वं न युक्तमिति चेत्? मैवम्। सैव श्रुतिः साधारणभूतानां वृत्त्यर्थमुद्दिष्टा। विश्वस्य भूतिसंवर्द्धनाय सर्वे प्राणिनो नित्यं मत्स्या इव परस्परं भक्षयन्तीत्यत्र न हिंसादोषः प्रजापतेरेकत्वेन जगत्कल्पितत्वात्। स्मृतिश्च तत्र श्रुतिसौहार्द्दात्—'प्राणस्यान्नमिदं सर्व्वमि'त्यनेन न्यायप्राप्तमर्थानुवादमुदाहरति न तु प्राणिहिंसां चोदयति, हिंसाया अचोदितत्वात्। योगिनः खलु शरीरस्थितिहेत्वर्थमल्पसत्त्वा हन्यन्त इति स्थितिविहितं विज्ञाय भूरिसत्त्वानां देहवतामभिद्रोहञ्च विहाय व्रीहियवादिना प्राणान् बिभ्रति, बीजादिहिंसाया अपरिहार्य्यत्वाच्च तद्गतपापप्रक्षालनाय प्राणायामादिकमाचरन्ति। 'अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यती'*-त्येवमादिस्मृतिः।

बहिःसाधनसम्पन्ने श्रौते कर्म्मणि बीजादीनां जीवनाशात् कीटादीनाञ्च वधसम्भवात् तस्य पापफलत्वं सांख्यवृद्धादिभिरुक्तम्। तदेव भूतोपघातभीरवः सत्त्वबहुला भूरीष्टानुबन्धी यज्ञः परपीडादिद्वारेणैव सम्पादयितव्य इति ततोऽपि विरक्ता भवन्ति। त एवमाहुः। यद्यपि हिंसा यज्ञाङ्गभूता दैवानुष्ठानं तथापि सात्त्विका अहिंसावदानाय बहिःसाधनसम्पादनेभ्यो यागादिभ्यो निवर्त्तेरन्। ये तु मनुष्या रजोबहुलास्तेषां शास्त्रीया हिंसाप्रवृत्तिरल्पाल्पा दृश्यते। श्रुतिश्च तान् सत्त्वनिकायत्वे समुन्निनीषतीति केवलं क्रत्वर्थमेव तेषां हिंसां नियम्य प्रोक्षितप्राणिवधमभ्युपजानाति। तत्रापि यस्य बुद्धौ सत्त्व-

---

* मनुसंहिता—११।१४२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सचिवं रजो वर्त्तते, स पशुवधोपयाचितकत्वेन फलसम्पत्तिरिति मन्यमानः पिष्टमयीं पशुप्रतिकृतिं कृत्वा कुष्माण्डादिकं वानुकल्पं विधाय देवताभ्य उपहरति, न तु प्राणिनां वधबन्धनादिजनितं क्लेशव्यापारं चिकीर्षति। एवं यज्ञादिकर्म्मणा तेषां चित्तशुद्धिर्भवति, ततश्च जिज्ञासा प्रवर्त्तते। 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुतिः। तदनन्तरं ते भूतोपघातपरात् कर्म्मणो विरक्तास्तपःस्वाध्यायध्यानवन्त आत्मन्येवात्मानं पश्यन्ति। ये तु मनुष्यास्तमोबहुलास्ते पिशाचाः शास्त्रविगर्हिता आत्मसुखेच्छया देवोद्देशं विनैव प्राणिनं व्यापाद्य तन्मांसभक्षणे प्रवृत्ता दृश्यन्ते। वैधहिंसातिरिक्तहिंसायाः प्रतिषिद्धत्वात्, तेषां बलवदनिष्टसाधनत्वं दुर्व्वारं भवति।

ननु, 'अग्नीषोमीयं पशुमालभेत', 'वायव्यं श्वेतमालभेत', 'तस्माद् यज्ञे वधोऽवधः' इत्यादिश्रुतिजातैश्चोदिताया वैधहिंसाया अनिष्टानुबन्धित्वं कथं सम्भवति? विध्यर्थप्रेरणया यज्ञाङ्गभूतहिंसानामनिष्टानुबन्धित्वानाक्षेपात्? तन्न युक्तम्।

'आततायिनमायान्तं हन्यादेवाविचारयन्।
नाततायिवधे दोषो हन्तुर्भवति कश्चन॥'

इत्येवमादिस्मृतेरेकवाक्यतया च वैधहिंसाया इष्टानुबन्धित्वमेव समुपपन्नमिति चेत्?

मैवं वोचः। 'मा हिंस्यात् सर्वा भूतानी'ति श्रुत्या प्रभूतपुण्यप्रापककर्म्मणि पशुयागेऽपि हिंसाया अनिष्टसाधनत्वं ज्ञाप्यते। अनिष्टस्य विशेषस्तु तत्र प्रधानकर्म्मण्यावापगमनम्। यथा गोधूमैः सह समुत्पन्नानां तृणबीजानां तैः सह कुसूलप्राप्तिः, कुसूलगतानां तेषामस्वातन्त्र्येण गोधूमैः सह चावापगमनम्, तथा प्रधानकर्म्मणा यागादिना सहैव तदङ्गीभूतप्राणिहिंसादीनामपि बलवदनिष्टानुबन्धित्वम्। यद्यपि प्रधानोपकारो यागादीनां तदङ्गत्वेन विधानाद् भवति, तथापि 'मा हिंस्यात् सर्वा भूतानी'तिनिषेधादनर्थसाधनत्वमपि तत्कार्य्यस्यैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काल-सिद्धान्त-दर्शिनी

[निबन्धकः—श्रीहाराणचन्द्रशास्त्री]

शिवकुमारमानम्य गुरुं विश्वेशतां गतम् ।
क्रियते सुधियां प्रीत्यै काल-सिद्धान्त-दर्शिनी ॥
प्रस्तूयते नवं वस्तु नेह स्वीयमनीषया ।
काल-सिद्धान्तसन्दोहसंग्रहार्थोऽयमुद्यमः ॥
दोषाः समुन्मिषन्त्यत्र मतिमान्द्यनिवेशिताः ।
करुणैकधनाः सन्तो दृशा संशोधयन्तु तान् ॥

कालस्य सर्वजनप्रसिद्धत्वेऽपि तत्स्वरूपे विवदन्ते वादिनः । श्रीशङ्करभगवत्प्रणीतशारीरकभाष्यटीकायां रत्नप्रभायां रचनानुपपत्त्यधिकरणे (२अ० २पा०) प्रथमसूत्रान्ते सांख्यानां कालपदार्थानङ्गीकारः प्रतिपादितः "सांख्यैः कालस्यानङ्गीकारादि" त्यनया पङ्क्त्या ।

निरीश्वर-सांख्यमतम् ।

ईश्वरकृष्णकृतसांख्यकारिकाव्याख्यायां तत्त्वकौमुद्यां श्रीवाचस्पतिमिश्रैरपि सांख्यमते कालपदार्थस्याभाव उपपादितः ;—

"कालश्च वैशेषिकाभिमत एको नानागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति, तस्मादयं यैरुपाधिभेदैरनागतादिव्यवहारभेदं प्रतिपद्यते, सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः, कृतमन्तर्गडुना कालेनेति सांख्याचार्य्याः । तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति ।" (सांख्यतत्त्वकौमुदी—३३ कारिका)

इदं सांख्यमतमधुना प्रचलितमपि सर्वेषां सांख्याचार्य्याणां सम्मतमिति वक्तुं न शक्यते । अन्यादृशमपि सांख्यमतं कालविषये समुपलभ्यते,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सांख्यैः प्रकृतेः परिणत्यात्मकोऽसौ (कालः) इत्युच्यते; यदाहुः :—

परिणामः पृथग्भावो व्यवस्थाक्रमतः सदा ।
भूतेष्ववर्त्तमानात्मा कालरूपो विभाव्यते ॥ इति ।"

(श्रीमृगेन्द्रवृत्तिदीपिका—१० प्रकरणम्-१४कारिका)

एवं च प्रकृतिपरिणतिः काल इति केषाञ्चित् सांख्याचार्य्याणां मतमासीदिति प्रतीयते । अत एवैतस्य मतस्य खण्डनावसरे उक्तम्—"सांख्याभ्युपगतस्तावत् कालो न युक्तः । यतो भोक्तृभोगाधिकरणत्वेन स्थितायास्तनोर्वृद्धितरुणाद्यवस्थयाऽनुमीयते परिणतिव्यतिरिक्तः कालः" इत्यादि ।

पराशरसंहिताभाष्ये श्रीमाधवाचार्य्यैरभिहितम्—"प्रधानवादे पञ्चविंशतितत्त्वेभ्यो बहिर्भूतस्य कालतत्त्वस्याभावात् प्रधानमेव कालशब्देन व्यवह्रियताम्" (१अ० २०) इति ।

तथाच प्रधानशब्दवाच्यायाः प्रकृतेरेव कालत्वं कैश्चित्सांख्यमतानुयायिभिरङ्गीकृतम् ।

"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६।२।१) "तद्धेदं तर्ह्यव्याकृतमासीत्" (वृ० उ० १।४।७) इत्यादिश्रुतिषु प्रलये कालव्यवहारः श्रूयते । वैशेषिकाभिमतानां कालोपाधीनां जगतः स्थितिकाल एव सम्भवेन वाचस्पतिमते प्रलये कालव्यवहारः कथङ्कारमुपपद्यताम् ? प्रकृतिपरिणतिः काल इति मते प्रलयेऽपि प्रकृतेः समपरिणामसत्त्वेन कालव्यवहार उपपद्यते । प्रकृतिरेव सांख्यनये काल इति माधवाचार्य्यमते प्रलये कालव्यवहारः सुतरामुपपन्नः, प्रलयेऽपि प्रकृतेः सत्त्वादिति विभावयन्तु सुधियः ।

"द्विविधं च सांख्यं निरीश्वरं सेश्वरञ्च" (शास्त्रदीपिका १।१।५) ।

सेश्वरसांख्यमतम् । तत्र कापिलं मतं निरीश्वरम् । पातञ्जलं मतं सेश्वरम् । सेश्वरनिरीश्वरयोः सांख्ययोर्बहुत्र परस्परं सम्मति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्तिसत्त्वेऽप्यस्ति कुत्रचिद् विमतिरपीति विज्ञानामतिरोहित-मेतत्। अस्ति खलु कालविषये तयोर्विमतिः। तत्र निरीश्वरसांख्यानां मतं पूर्वत्र प्रदर्शितम्।

सेश्वरसांख्यसिद्धान्तानुसारिणस्तु पातञ्जलाः क्षणात्मकं कालं वस्तुभूतमङ्गीकृत्य तदतिरिक्तानां मुहूर्त्तयामाहोरात्रप्रभृतिरूपाणां सर्वेषां कालानां बुद्धिमात्रपरिकल्पितत्वमभ्युपगच्छन्ति। श्रीविज्ञानभिक्षुणा योगवार्त्तिके "क्षणतत्क्रमयोः संयमाद् विवेकजं ज्ञानम्" इति (पातञ्जलदर्शने ३।५२) सूत्रस्य व्यासभाष्यव्याख्यानावसरे समुपवर्णितम्—

"इदानीं क्षणातिरिक्तः कालो नास्ति मुहूर्त्तादिरूपो महाकाल-पर्य्यन्त इति प्रसङ्गात् स्वशास्त्रसिद्धान्तमवधारयति।" इति। "मुहूर्त्ताहोरात्रादयो बुद्धिकल्पितसमाहार एव" इति च।

अतत्यं व्यासभाष्यस्त्वेवम्:—

"क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति बुद्धिसमाहारो मुहूर्त्ताहोरात्रादयः। स खल्वयं कालो वस्तुशून्यो बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते। क्षणस्तु वस्तुपतित" इत्यादि।

वस्तुपतितो वास्तव इत्यर्थ" इति तत्त्ववैशारद्यां वाचस्पति-मिश्राः।

विज्ञानभिक्षुणाऽत्रैव सूत्रे क्षणस्यास्थिरत्वं तस्य सत्त्वादीनां गुणानां परिणामविशेषरूपत्वं द्रव्यत्वं चेति भाष्यप्राचरेभ्यः प्रतिपादितम्। तन्मते "कालनित्यत्वश्रुतिस्मृतयश्च प्रवाहरूपकालपराः।" (योगवार्त्तिके तृतीयपादे—५१ सूत्रे)

"क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणम्" इति व्यासभाष्यप्रदर्शनात् क्षणसाक्षात्कारस्य ध्यानधारणासमाधिरूपसंयम*जन्यत्वप्रतीत्या

* "देशबन्धश्चित्तस्य धारणा।" १। "तत्र प्रत्ययैकतानता ध्यानम्"। २। "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः"। ३। "त्रयमेकत्र संयमः" ॥४।
[योगदर्शने तृतीये विभूतिपादे]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणानां योगिप्रत्यक्षगम्यताऽवसीयते। एवञ्च पातञ्जलदर्शने वस्तुभूते क्षणरूपे काले स्वीकृतेऽपि तस्य योगजप्रत्यक्षविषयत्वकथनेन स्वमते लौकिकप्रत्यक्षाविषयत्वं सूचितम्। देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीतिवत्।

कुमारिलभट्टो मुरारिमिश्रः प्रभाकरश्चेति त्रयो मीमांसकाः। एत एव क्रमेण भट्ट-मिश्र-गुरव उच्यन्ते। तत्र मुरारिमिश्रमतप्रतिपादकः कश्चिदपि पदार्थविषयको ग्रन्थो नाधुनाऽपि दृष्टिविषयमधिगत इति कालविषये तदीयं मतं विशिष्य प्रतिपादयितुं न शक्यते। यद्यपि मद्रासनगरात् प्रकाशिते "Oriental Research" नाम्नि पत्रे मुरारिमिश्रकृतं मीमांसासूत्रव्याख्यानम् अर्थवादाधिकरणम् (१।२।१) आरभ्य किञ्चित्प्रकाशितं, तथापि तत्र स्वमतसिद्धानां पदार्थानां चर्चा नैव दृश्यते; तद्व्याख्यानं मुरारिकृतमन्यकृतं वेति बहवः संशेरते च; व्याख्याने च तत्र लेखकादिदोषेण बहूनि स्थलानि दुर्बोधप्रायाणीति न. ततः कथञ्चिदपि मुरारिमिश्रसम्मतानां पदार्थानां समधिगमसम्भावना।

भाट्टमते तावत्कालस्य द्रव्यत्वमेवाङ्गीकृतम्। तत्र चैतन्मानमेयोदये

भाट्टमीमांसक-मतम्।

. प्रमेयपरिच्छेदारम्भे—

... ...

परिमाणगुणाधारं द्रव्यं द्रव्यविदो विदुः ॥६॥

पृथिवी सलिलं तेजः पवमानस्तमस्तथा।

व्योमकालदिगात्मानो मनः शब्द इति क्रमात् ॥७॥

एकादशविधं चैतत् कुमारिलमते मतम्।

... ... ॥८

भाट्टचिन्तामणावपि—

"द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोऽन्धकारशब्दरूपाण्येकादश" इत्युक्तं प्रत्यक्षसूत्रे (१।१।४)।

भाट्टसिद्धान्ते कालस्य विभुत्वमत एवात्मवन्नित्यत्वञ्च स्वीक्रियेते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य चैवास्याप्युपाधिवशात् क्षणदिनमासादिभेदव्यवहारः। तथाचोक्तं मानमेयोदये :—

"कालस्यापि विभुत्वेऽप्यौपाधिको भेदव्यवहारोऽस्ति। स यथा :— पञ्चदशनिमेषाः काष्ठा। ताभिस्त्रिंशता मुहूर्त्तः। ते त्रिंशदहोरात्रः। तैस्तावद्भिर्मासः। तैर्द्वादशभिः संवत्सरस्तैश्च क्रमेण युगादय इति।"

"स च कालः षडिन्द्रियग्राह्यः" इति मानमेयोदयकाराः। अद्वैतसिद्धौ परिच्छिन्नत्वहेतूपपत्तिप्रस्तावे श्रीमत्परमहंसपरिव्राजकाचार्य्यमधुसूदनसरस्वतीपादैरपि कालस्य प्रत्यक्षविषयत्वं मीमांसकसम्मतमिति प्रत्यपादि—

"कालस्य च रूपादिहीनस्य मीमांसकादिभिः सर्वेन्द्रियग्राह्यत्वाभ्युपगमात्" * इति।

लघुचन्द्रिकाकारैः श्रीमद्गौडब्रह्मानन्दस्वामिपादैरत्र विशेषोऽभिहितः :—

" 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते।'

इति मीमांसकोक्तेर्ज्ञानं सर्वं किञ्चित्कालावच्छिन्नमेव स्वविषयं

---

* मीमांसकमते षडेवेन्द्रियाणि। "बाह्यं पञ्चविधं, घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकम्। आन्तरं त्वेकं मनः।" इति शास्त्रदीपिका (१।१।४)। "तच्च षड्विधम्। घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोभेदादि"ति भाट्टचिन्तामणिः (१।१।४)। "कानि पुनरिन्द्रियाणि? घ्राणनयनरसनत्वक्श्रवणानि बाह्यानि, आन्तरञ्च मनः।" इति प्रकरणपञ्चिका (५म प्रकरणम्)।

† "प्रत्यक्षगम्यतामेव केचित्कालस्य मन्वते।
विशेषणतया कार्य्यप्रत्यये प्रतिभासनात्॥"

[इति न्यायमञ्जर्य्याम् १५६ पृष्ठे।]

अत्रैवकारेणानुमित्यादौ सर्वत्र विषयविशेषणतया कालस्य न भानमिति सूचितम्। इदं मतं प्राचां भाट्टमीमांसकानामिति प्रतिभाति। तैः खलु "अव्यतिरेकश्चार्थेऽनुपलब्धे" (जैमिनिसूत्रे १।१।५) इति सूत्राक्षरस्वारस्येन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृह्णाति। तत्र स्वाधिकरणक्षणावच्छिन्नत्वेन गृह्णातीत्युत्सर्गः। अत एव धारावाहिकज्ञानस्थले ज्ञानानां स्वस्वाधिकरणक्षणविशिष्टतया स्वस्वविषयग्राहित्वेनाज्ञातज्ञापकत्वमिति मीमांसकाः। तस्य बाधे तु सम्भवत्क्षणान्तरावच्छिन्नत्वेन, यथा,—पाकरक्ते घटे 'श्यामोऽयमि'ति धीः पाकपूर्वक्षणावच्छिन्नत्वेन श्यामत्वं गृह्णाति, स्मृतिस्तु स्वकारणधीगृहीतकालावच्छिन्नं स्वविषयम्।" इति।

श्रीमद्गौडब्रह्मानन्दसरस्वतीमहाशयैरयमेवार्थः स्वप्रणीतायां मीमांसाचन्द्रिकायामौत्पत्तिकसूत्रे (१।१।५) प्रतिपादितः * :—

"क्षणस्यातीन्द्रियत्वेऽपि ज्ञानसामान्यसामग्रीबलाज्ज्ञानमात्रविषयकत्वे बाधकाभावात्। तदुक्तम् :—

यथार्थमगृहीतग्राहि ज्ञानं प्रमाणमिति" (शास्त्रदीपिका) प्रमालक्षणमभ्युपगत्य धारावाहिकप्रत्यक्षस्थलेऽस्य लक्षणस्याव्याप्तिमाशङ्का कालस्य प्रत्यक्षत्वमाश्रित्य समाहितम्। तदुक्तं भाट्टचिन्तामणौ तर्कपादे चतुर्थे सूत्रे—

"एवं चाज्ञातविषयकं बाधकज्ञानरहितं ज्ञानं प्रमेति फलितम्। अनेनैवाशयेनागृहीतग्राहित्वं प्रामाण्यमित्याचक्षते। नचैवं गृहीतविषयकधारावाहिकज्ञानस्याप्रामाण्यप्रसङ्गः, कालस्य षडिन्द्रियवेद्यत्वेन पूर्वक्षणविशिष्टघटस्य विषयीकरणेन तादृशस्योत्तरज्ञानाविषयतयाऽनधिगतार्थविषयकत्वसम्भवात्।" शास्त्रदीपिकादावपि स्फुटमेतत्। धारावाहिकानुमित्यादीनामसम्भवेन स्मृतेः प्रामाण्यस्य चानिष्टत्वेन तत्राव्याप्तेरभावेन न तासु कालस्य विशेषणतया भाननियमः सप्रयोजनः।

अपरे पुनर्भाट्टमतानुयायिनो ज्ञानमात्रे कालस्य विषयविशेषणतया भानमभ्युपयन्ति—इत्यनुपदमेव स्फुटीभविष्यति।

* काशीस्थराजकीयसरस्वतीभवन-(Government Sarasvati Bhavan Library)-स्थितहस्तलिखितपुस्तकावलम्बनेनैतत् प्रदर्शितम्, मीमांसाचन्द्रिकाया अद्याप्यमुद्रितत्वात्। अधुना तु सरस्वतीभवनादेव मुद्रयितुमुपक्रान्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते †।' इति।

क्षणस्य स्वातन्त्र्येण प्रत्यक्षयोग्यता नास्ति, तस्य स्वातन्त्र्येणेन्द्रियायोग्यतया तैः सन्निकर्षासम्भवादिति सूचनायात्र क्षणस्यातीन्द्रियत्वमुक्तम्। एवं च ज्ञानसामान्यसामग्रीबलेन क्षणस्य सर्वेषु ज्ञानेषु विषयविशेषणतया भानमिति पर्य्यवसितम्।

प्राभाकर-मीमांसकमतम्।

प्राभाकरमते कालस्य द्रव्यत्वमेकत्वमतीन्द्रियत्वं विभुत्वमुपाधिभेदेन च क्षणादिव्यवहारहेतुत्वमित्यादिकं सर्वं वैशेषिकसिद्धान्तवदङ्गीक्रियते।

श्रीरामानुजाचार्य्यविरचिते तन्त्ररहस्ये (Gaekwad's Oriental Series, No XXIV) प्रमेयपरिच्छेदे "तत्र चाभ्युपगमसिद्धान्तन्यायेन काणादतन्त्रसिद्ध एव प्रमेयवर्गोऽङ्गीक्रियते, तस्य तत्प्रतिपादनार्थं प्रवृत्तत्वात्। न तु पृथगत्र व्युत्पाद्यते। तत्रानभिमतांशो निराक्रियते। विशेषांशस्तु व्युत्पाद्यते।" इत्युपक्रम्य—

"तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव" इति द्रव्येषु काल उद्दिष्टः। इतः परं कालविषये काऽपि चर्चा कुत्रापि न कृता; तथाच प्राभाकराणां कालविषये सर्वथा वैशेषिकतन्त्रसिद्धान्तसमाश्रयणं सुस्पष्टं प्रतीयत इति कालविषये वैशेषिकसिद्धान्तेनैव प्राभाकरसिद्धान्तो गतार्थ इति न तत्र पृथङ्निरूपणापेक्षा वर्त्तते। वैशेषिकसिद्धान्तश्चैतद्विषयेऽग्रे व्यक्तीभविष्यति।

तन्त्ररहस्यं खलु प्राभाकरसिद्धान्तप्रतिपादकः प्रकरणग्रन्थविशेष इति व्यक्तं बहुज्ञानाम्।

---

† अयमर्द्धश्लोकः काश्मीरकसदानन्दप्रणीतायामद्वैतब्रह्मसिद्धौ प्रथममुद्गरप्रहारेऽपि दृश्यते; निम्बार्कमतानुसारि-श्रीनिवासाचार्य्यविरचिते वेदान्त-कौस्तुभाख्यब्रह्मसूत्रभाष्ये जिज्ञासासूत्रे-(१।१।१)ऽयं स्मृतिरित्युपन्यस्तः। आकरस्त्वस्य नोपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवच्छङ्कराचार्य्यसम्मतेऽद्वैतसिद्धान्ते ब्रह्मातिरिक्तस्य वस्तुनोऽभावेन ब्रह्मातिरिक्तः कालः कश्चित्पारमार्थिको नैव विद्यते इति विदुषां नातितिरोहितमेतत्।

शाङ्कराद्वैतमतम्।

खण्डनखण्डखाद्ये चतुर्थपरिच्छेदे कारणलक्षणखण्डनप्रसङ्गेन वर्त्तमानत्वादिकं प्रत्याख्यातं श्रीहर्षेण—

"नियमे च प्राक्कालीनतयाऽभिधीयमाने प्रागित्यस्य व्यवच्छेद्यौ वर्त्तमानभविष्यत्कालौ प्राक्कालस्य व्यवच्छेदको विवेचनीयः, न च तद्विवेचनं शक्यम्" इत्यादिना।

यद्यपि पारमार्थिकः कश्चित्पदार्थः कालो नाम नाद्वैतवादिभिरङ्गीक्रियते तथापि कालव्यवहारस्य तैरप्यवश्यमुपपादनीयतया व्यावहारिकः कश्चित्कालोऽद्वैतसिद्धान्ते स्वीकार्य्यः। अत एव वेदान्तपरिभाषायाम् "अनधिगताबाधितार्थविषयज्ञानत्वमि"ति प्रथमप्रमालक्षणस्य धारावाहिकप्रत्यक्षेऽव्याप्तिवारणाय "नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविशिष्टविषयकत्वेन न तत्राव्याप्ति"रित्युक्तम्। अनेन हि ग्रन्थेन स्वसिद्धान्ते कालस्य सत्ता तस्य प्रत्यक्षविषयता चोक्ता। अत्रैव शिखामणिटीकायां कालस्य प्रत्यक्षज्ञान एव सर्वत्र विशेषणतया भानं न त्वनुमित्यादिपरोक्षज्ञानेऽपीति प्रतिपादितम्।

परन्त्वत्रेदं चिन्त्यम् :—सृष्टिप्रतिपादिकासु श्रुतिषु कुत्रापि कालसृष्टिर्न श्रूयते। तैत्तिरीयश्रुतौ [२।१]—

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरुषः।"

इति भूतभौतिकानामेव सृष्टिः प्रपञ्चिता। छान्दोग्ये षष्ठप्रपाठकस्य द्वितीयखण्डे तेजोऽबन्नानामेव सृष्टिरुक्ता।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोविदानन्दः

तृतीयोऽध्यायः

सङ्केतशक्यसम्बन्धविभिन्नसहकारिणी ।
वाच्यलक्ष्यातिरिक्तार्थधीहेतुर्व्यक्तिरञ्जना ॥१॥

व्यञ्जनाया लक्षणमाह—सङ्केतेति। सङ्केतशक्यसम्बन्धाभ्याम् अभिधालक्षणासहकारिभ्यां विभिन्ना अतिरिक्ता वक्ष्यमाणरूपाः सहकारिणो यस्याः सा। किञ्च, वाच्यलक्ष्याभ्यां शक्तिभक्तिप्रतिपाद्याभ्याम् अतिरिक्तस्य व्यङ्ग्यार्थस्य हेतुर्बोधकारणम् अञ्जना व्यञ्जना ॥१॥

अस्त्रमन्त्रितबाणस्य वृत्तिवद्विविधार्थकृत् ।
एषा शब्दगतैवार्थानाश्रित्यापि प्रवर्त्तते ॥२॥

वृत्तिद्वयाद्विलक्षणतामाह—अस्त्रेति। अस्त्रेण वायव्यादिना मन्त्रितस्य कृताभिमन्त्रणस्य बाणस्य वृत्तिवद् विविधार्थकृत् अनेकार्थबोधनपटुः युगपदिति शेषः। एषा व्यञ्जना शब्दगतैव किन्तु अर्थान् वाच्यलक्ष्यव्यङ्ग्यानाश्रित्यापीत्यर्थः ॥२॥

अस्याः कारणतां शब्दा भजन्त्यर्थास्तथोभये ।
वक्तृवाक्यादिवशिष्ट्यं सहकारि निरूपितम् ॥३॥

अस्या इति। कारणतां मूलताम्, तेनैषा त्रिविधेत्यर्थः ॥३॥

वर्णं पदं तदंशश्च वाक्यबन्धश्च संश्रिता ।
प्राधान्याद् व्यञ्जना वृत्तिः शब्दधर्मोऽर्थगापि सा ॥४॥

शब्दशक्तिमूलाया भेदानाह—वर्णमिति। तदंशं प्रकृतिप्रत्ययादिकम्, बन्धं वृत्तादिकम् ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशकालप्रकरणवक्तृवाक्याभिधेयकाः ।
सान्निध्यकाकुबोद्धव्या व्यञ्जनासहकारिणः ॥५॥

अर्थशक्तिमूलायाः सहायानाह—देशेति । "काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः" इत्यमरः ॥५॥

पञ्चाननो विजयते हिमवद्भूविहारकृत् ।
अत्र व्यञ्जनयान्योऽर्थस्तत्साम्यं वा प्रतीयते ॥६॥

क्रमेणोदाहरति—पञ्चाननेति । हिमवद्भूविहारकृत् हिमवद्भूः पार्वती हिमाचलभूमिश्च, तत्र विहारकृत् पञ्चाननः शिवः सिंहश्च । पञ्चं विस्तीर्णमाननं यस्येति व्युत्पत्तेः । अत्र शिवस्य प्रकृतत्वादप्रकृत-सिंहपक्षो व्यङ्ग्यः । प्रकृताप्रकृतयोः साम्यं वा व्यङ्ग्यम् । अत्र श्लिष्ट-शब्दयोः परिवृत्त्यसहत्वाच्छब्दशक्तिमूलत्वम् ॥६॥

भाति भूतिकृतच्छायः प्रभुः सर्वप्रियङ्करः ।
इतरोऽप्यत्र वाक्यार्थः शब्दार्थव्यक्तिकल्पितः ॥७॥

सूचिकटाहन्यायेनादावुभयशक्तिमूलामुदाहरति—भातीति । भूति-कृतच्छायः भस्मकृतशोभः समृद्धिकृततापाभावश्च सर्वप्रियङ्करस्त्रैलोक्य-प्रियकर्ता जनपदप्रियकर्ता च प्रभुः शिवो राजा च भातीत्यन्वयः । अत्राद्यपदस्य परिवृत्त्यसहत्वाद् द्वितीयतृतीययोः परिवृत्तिसहत्वाच्च उभयशक्तिमूलत्वमिति बोध्यम् । शेषं पूर्ववत् ॥७॥

शिवप्रासादशिखरे सानन्दान् पश्य पक्षिणः ।
अत्र देशविविक्तत्वमर्थादेव प्रतीयते ॥८॥

शिवेति । अत्र पक्षिणां सानन्दत्वात् त्रासाभावो गम्यते, तेन च जनसञ्चाराभावप्रतीतिः ततश्च पूजोपयोगि स्थलमिति गम्यते ततो गन्त-व्यमिति ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेवावारीशलिङ्गानि पुष्पिता यत्र पादपाः ।
धन्यः स देश इत्यत्र पूजौत्सुक्यं प्रतीयते ॥९॥

रेवेति । देशस्य धन्यत्वाभिधानात् पूजोपयोगिवस्तुगणनेन पूजाभिलाषित्वं व्यज्यते शिवभक्तिश्चेति ॥९॥

माघाद्बिभ्यत माघोऽयं यत्र रात्रिः शिवप्रिया ।
अत्र कालस्य वैशिष्ट्याद् व्रते भक्तिः प्रतीयते ॥१०॥

देशवैशिष्ट्यमुक्त्वा कालवैशिष्ट्यमुदाहरति—माघेति । अघात् तापात् मा बिभ्यत चतुर्दशीसम्बन्धिन इत्यर्थः । अत्र मा बिभ्यतेत्युक्तो व्रतमहिमातिशयो व्यज्यते, तेन च व्रते भक्तिस्ततश्च शिवे भक्तिरिति कालस्य वैशिष्ट्यादसाधारण्यादित्यर्थः ॥१०॥

शीघ्रमाहर वन्यानि पुष्पादीनि निशामुखे ।
शिवप्रियत्वं वन्येषु प्रस्तावादवगम्यते ॥११॥

शीघ्रमिति । प्रस्तावात् प्रकरणात् । श्रोतृवक्तृबुद्धिस्थं प्रकरणम् ।

वन्येषु यादृशी प्रीतिर्वर्त्तते परमेशितुः ।
उत्तमेष्वपि नास्त्येव ग्रामजेषु तु तादृशी ॥

इति शिवगीतोक्तेरिति भावः ॥११॥

वाटिकायां जनान् दूरान् कुर्वित्याह शाम्भवः ।
विविक्तप्रियता तस्य वैशिष्ट्यान्न प्रतीयते ॥१२॥

वाटिकायामिति । अत्र वक्तुः शाम्भवस्य वैशिष्ट्यात् शिवपूजार्थं विविक्तरुचिः प्रतीयते ॥१२॥

शिवं पूजयताजस्रं जुषध्वं सुखमीप्सितम् ।
कार्य्यकारणभावोऽत्र वाक्यवैशिष्ट्यबोधितः ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवमिति। अत्र हि तिङन्तवाक्यद्वयवैशिष्ट्यात् सुखे शिवपूजाजन्यत्वं व्यज्यते ॥१३॥

शैवानां चेत् पुनर्जन्म सा हानिर्गिरिजापतेः।
अभिधेयस्य वैशिष्ट्याद्भाति कैवल्यदातृता ॥१४॥

शैवानामिति। केवलस्याद्वितीयस्य भावः कैवल्यं निःश्रेयसम्, तद्दातृत्वं पशुपाशमोचकत्वमित्यर्थः ॥१४॥

एकाकिना मया काशी गन्तुं शक्या कथं द्विजाः।
तदीयसहकारिच्छा सन्निधेरत्र गम्यते ॥१५॥

एकाकिनेति। सन्निधिः जिगमिषूणां तेषां सहकारिच्छा ॥१५॥

संसारकूपपतनं शम्भुभक्तस्य किं भवेत्।
अत्र काकुप्रभावेण व्यज्यते मुक्तिदातृता ॥१६॥

संसारेति। अत्र किंशब्दकाकुर्बोध्या ॥१६॥

मुमुक्षो भज भूतेशं संसारे मा मनः कुरु।
मुक्तिदातृत्वमत्रापि भाति बोद्धव्यपाटवात् ॥१७॥

मुमुक्षो इति। बोद्धव्यपाटवात् सम्बोध्यवैशिष्ट्यादित्यर्थः ॥१७॥

वाच्यमूला व्यञ्जनैषा लक्ष्यगा प्राक् प्रदर्शिता।
उदाहृतेषु दूरार्थभाने व्यङ्ग्यगताप्यसौ ॥१८॥

वाच्यमूलेति। एषा उक्तप्रकारा व्यञ्जना वाच्यार्थमूला लक्ष्यगा लक्षणीयार्थगता प्राक् लक्षणानिरूपणे प्रदर्शिता लक्षणाप्रयोजनस्य तदेकगम्यत्वादिति भावः। उदाहृतेषु वाक्येषु दूरतोऽर्थभाने सति एकस्मादर्थादर्थान्तरं ततोऽप्यर्थान्तरमेवंविधे भाने सतीत्यर्थः। व्यङ्ग्यगता व्यङ्ग्यमूलाप्यसौ व्यञ्जना वेदितव्या ॥१८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिविधा वृत्तिरेकैव वैलक्षण्ये ऽपि वस्तुतः ।
इत्याहुः शाब्दिकास्तेषां भिन्नत्वे गौरवाद् भयम् ॥१९॥

त्रिविधेति । वैलक्षण्येऽपि परस्परविलक्षणत्वे ऽपीत्यर्थः । भिन्नत्वे ऽनेकवृत्तिस्वीकारे ॥१९॥

नित्यं निवासनिरतौ गङ्गायां झषतापसौ ।
हिंसकाहिंसकौ दृष्टौ प्रकृतिर्हि बलीयसी ॥२०॥

नित्यमिति । अत्र गङ्गापदेन प्रवाह-तीरयोर्युगपदुपस्थित्या न वृत्तिभेद इति भावः ॥२०॥

गङ्गायां वासिनौ नित्यं वैसारिणमहाद्रुमौ ।
न विमुक्तौ जडतया प्रकृतिर्हि सुधीत्वदा ॥२१॥

गङ्गायामिति । वैसारिणो मत्स्यः । जडतया शीतलतया च । प्रकृतिरेव सुधीत्वदा सङ्गतिस्तु न तथेति भावः । अत्रापि गङ्गाशब्दः पूर्ववत् ॥२१॥

अत्र स्रोतसि तीरे च पावनत्वे च वर्त्तते ।
शक्तिभक्तिव्यक्तियोगाद् गङ्गाशब्दः सहैव यत् ॥२२॥

अत्रेति । शक्तियोगात् स्रोतसि, भक्तियोगात् तीरे, व्यक्तियोगात् पावनत्वे चेत्यर्थः ॥२२॥

अत्र तत्त्वेण वावृत्त्या सहानेकार्थबोधकः ।
गङ्गाशब्दस्ततो वृत्तेरभेदो नैव सिध्यति ॥२३॥

अत्रेति । तन्त्रावृत्त्योर्युगपदनेकार्थबोधकत्वेन वैयाकरणैः स्वीकृतत्वादिति ततो वृत्तेरभेदो नैव सिध्यति । भेदस्तु व्यक्त एवेति भावः ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याहुरपरे भिन्ना भेदक्लृप्तौ हि गौरवम् ।
व्यवहारात् कार्यतश्च भेदो हि दुरपह्नवः ॥२४॥

इतीति। इति उक्तप्रकारेण। अपरे आलङ्कारिका आहुः। हि यस्माद् भिन्नायास्तस्या अभेदकल्पने गौरवं भवति व्यवहारात् अभिधालक्षणाव्यञ्जनाशब्दैर्व्यवहृतत्वात् कार्य्यतः प्रातिस्विकार्थबोधलक्षणाद् भेदो दुरपह्नवः निह्नोतुमशक्य इत्यर्थः ॥२४॥

अथाभिधा लक्षणा च वृत्तिरस्तु द्विधैव* सा ।
आद्यायां वा द्वितीयायां व्यञ्जनान्तर्भविष्यति ॥२५॥

मतान्तरमाह—अथेति। व्यञ्जनायाः शक्तौ भक्तौ वान्तर्भावोऽस्तु तथा सति लाघवं स्यादिति भावः ॥२५॥

दीर्घदीर्घाभिधा व्यङ्ग्यानर्थान् बोधयितुं क्षमा ।
यत्परं न्यायमाश्रित्य व्यङ्ग्यार्थस्यापि वाच्यता ॥२६॥

अभिधायामन्तर्भावं दर्शयति—दीर्घेति। दीर्घदीर्घेति। अतिशयार्थे द्विर्भावः। यत्परेति "यत्परः शब्दः स शब्दार्थः" तेन व्यङ्ग्यार्थोऽपि वाच्यार्थ एव ॥२६॥

अथवा लक्षणा व्यङ्ग्यं प्रत्याययतु केवला ।
उभे वा स्वस्वविषये न शङ्क्यं कोविदैरिदम् ॥२७॥

लक्षणायामन्तर्भावमाह—अथवेति। प्रत्याययतु बोधयतु। उभे वाच्यं व्यङ्ग्यं प्रत्याययतामित्यर्थवशाद् वचनपरिणामः ॥२७॥

सकृदुच्चरितन्यायाद्वाच्यार्थैविरताभिधा ।
व्यङ्ग्योपपादनेऽशक्ता दीर्घदीर्घा न सा ततः ॥२८॥

उक्तार्थे हेतुं दर्शयति—सकृदिति। "सकृदुच्चरितः शब्दः सकृदर्थं

* द्विधैवेयम् इति पाठान्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गमयति", "शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभावः" इति न्यायाद् वाच्यार्थमात्रे विरामं प्राप्ताभिधा व्यङ्ग्यार्थबोधनेऽसमर्था भवति ततो दीर्घदीर्घा लक्ष्यव्यङ्ग्यप्रत्यायनसमर्था न भवतीत्यर्थः ॥२८॥

यत्परन्यायपक्षे च शब्दार्थत्वं विधीयते ।
तात्पर्येण न वाच्यत्वं ततो व्यङ्ग्यत्वमस्तु तत् ॥२९॥

यत्पर इति । "यत्परः शब्दः स शब्दार्थः" इति मतेऽपि तात्पर्य्यविषयीभूतस्यार्थस्य व्यङ्ग्यत्वमेव विधीयते न तु वाच्यत्वमित्यर्थः ॥२९॥

पौर्वापर्य्यादिभिर्भेदैर्व्यक्तिः शक्तेर्विलक्षणा ।
तत्रान्तर्भवितुं नार्हा धिया सम्यक् परीच्यते ॥३०॥

पौर्वापर्य्येति । शक्तेः पूर्वत्वम्, तदनन्तरभावित्वाद् व्यञ्जनाया अपरत्वम्, शक्तेरेकार्थबोधकत्वं व्यञ्जनायाश्च "गतोऽस्तमर्कः" इत्यादौ युगपदनेकार्थबोधकत्वम्, शक्तेः शब्दमात्राश्रयत्वं व्यञ्जनायास्त्वर्थाश्रयत्वमपीत्येवं विविधैर्विशेषैर्व्यञ्जनायाः शक्तावन्तर्भावो न युज्यते इत्यर्थः ॥३०॥

शक्तिः पूर्वा परा व्यक्तिः, शक्तिर्बोधस्य कारणम् ।
चमत्कारस्य च व्यक्तिः, शक्तिः शब्दाश्रयापरा ॥३१॥
व्यक्तिर्नानाश्रया, शक्तिरेकार्था व्यक्तिरन्यथा ।
शास्त्रगम्या भवेच्छक्तिः प्रज्ञागम्यापरा मता ॥३२॥
सर्वाधिकारिका शक्तिर्व्यक्तिः सुध्यधिकारिका ।
एवं परीक्षितेऽत्यन्तं व्यक्तिः शक्तेर्विलक्षणा ॥३३॥

शक्तिरिति ॥३१॥

व्यक्तिरिति ॥३२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेति। सर्वाधिकारिका सर्वगम्या व्यक्तिस्तु सुधीबोध्यैव ॥३३॥

सम्बन्धनियतत्वेन लक्षणा तां न निर्वहेत्।
यतः स नार्थधारायां युगपद्वर्तितुं क्षमा ॥३४॥

व्यक्तेर्लक्षणायामन्तर्भावो न भवतीत्याह—सम्बन्धेति। लक्षणायाः शक्यसम्बन्धावश्यम्भावेन व्यञ्जनायाश्चातथात्वादिति भावः। यतः सा लक्षणा युगपदर्थधारायां "गतोऽस्तमर्कः" इत्यादौ अनेकार्थपरम्परायां युगपद् भवितुमशक्ता ॥३४॥

न गतार्थानुमानेन व्यञ्जना व्याप्त्ययोगतः।
शब्दप्रमाणनिष्ठा तु व्यक्तिर्वृत्तिर्विलक्षणा ॥३५॥

व्यञ्जनाया अनुमानप्रमाणेऽन्तर्भावो न भवतीत्याह—नेति। व्यङ्ग्य-व्यञ्जनयोः साहचर्यनियमाभावादनुमानप्रमाणेन सकलव्यङ्ग्यप्रत्ययानाम् असम्भवादित्यर्थः। फलितार्थमाह—शब्द इति ॥३५॥

एवं प्रदर्शितास्तिस्रः पदानामेव वृत्तयः।
तासां प्रयोगेऽङ्गीकारात् प्राग्विभक्त्युदयात्तु न ॥३६॥

एवमिति। पदानामिति न तु प्रातिपदिकानां धातूनां चेति भावः ॥३६॥

विभक्त्यनुदयेऽर्थेषु सङ्केतस्तु न वार्यते।
शब्दस्य द्विविधस्यापि नामधातुप्रभेदतः ॥३७॥

विभक्तीति। धातुप्रातिपदिकयोः सङ्केतमात्रसत्त्वे विभक्त्युदये सति व्यापारोदयादिति भावः। यद्यपि धातूनां लाक्षणिकार्थसम्भवोऽप्यस्ति तथापि विभक्त्युदयात् प्राक् तत्प्रतीतेरभावान्न विरोधः ॥३७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्तायामेव सङ्केतो नाम्नो धातोश्च दर्शितः ।
अद्वैतवादिभिः सैव धात्वादित्वेन सम्मता ॥३८॥

वेदान्तिमते विशेषमाह—सत्तायामिति। तस्या एव जात्यादि-रूपत्वादिति भावः ॥३८॥

विभक्तिहृदये सैव प्रयुक्तेन निरूप्यते ।
नाम्ना वा धातुना वापि वर्णिताभिस्तु वृत्तिभिः ॥३९॥

विभक्तेरिति। सैव सत्तैवेत्यर्थः ॥३९॥

सा सत्तैव परं ब्रह्म शब्दो ब्रह्म परं स्मृतम् ।
द्वे ब्रह्मणी वेदितव्ये इति श्रुत्यनुशासनम् ॥४०॥

सेति। सार्थत्वयरूपेत्यर्थः। तथा च श्रुतिः—
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥४०॥

शब्दब्रह्मविचारेण परं ब्रह्मावगम्यते ।
शब्दवृत्तिविचारोऽयं कृतस्तस्माच्छिवप्रदः ॥४१॥

शब्दब्रह्मेति। शिवप्रदः कल्याणदायकः। यथाह भगवान् भाष्यकारः—एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति ॥४१॥

शिवस्य भक्त्या समवाप्तसिद्धि-
र्धी-नीरधीरामजिभट्ट आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्सूनुनाशाधरभट्टनाम्ना
ग्रन्थः कृतोऽयं सुधियां मुदेऽस्तु ॥४२॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणधुरीणरामजिभट्टात्मजा-
शाधरभट्टविरचितकोविदानन्दे व्यक्तिनिर्णये तृतीय-
परिच्छेदः समाप्तः ॥

शिवस्येति। अन्ते शिवशब्दो मङ्गलार्थः ॥४२॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणधुरीणरामजिभट्टात्मजाशाधर-
भट्टविरचितायां कादम्बिनीसमाख्यायां स्वकृतकोविदानन्द-
व्याख्यायां व्यञ्जनापरिच्छेदस्तृतीयः।

सटीकः कोविदानन्दः समाप्तः।

वसन्तोत्सवः

(पूर्वतोऽनुवृत्तः)

[निबन्धकः—श्रीकालीचरणमित्रः, वि. ए.]

इत्यनेन भगवते स्मराय चूताङ्कुराणि समर्पितवत्यौ।

तथा च वासवदत्तामालतीमाधवकथासरित्सागरप्रभृतिषु बहुषु ग्रन्थेष्वपि विद्यते मदनमहोत्सवोल्लेखः।

नितरामन्तःकरणोल्लासकराणि ह्यस्य मदनोत्सवस्य बाह्यानुष्ठानानि। स्वभावसुखसेव्येऽस्मिन् भारते वर्षेऽतीव सुललितं विलसति निसर्गोन्मादकतामाधुर्य्यादिगुणरमणीयो वसन्तसमयः। मदनभस्मानुक्रमणिकावलम्बनेन हिमानीनिषिक्तशीतसमीरणात्ययवशाद्वा हर्षातिरेकोत्फुल्लमानवा अचिरोद्गतकिशलयरागमनोहरां धरणीं परितो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभूवुरुत्सवमग्नाः। अतः प्रतिभातीदमस्माकं यद्दतुराजः स्वप्रभावेणैव स्वच्छन्दवनजातपुष्पप्रभृत्यभिभूय सकलजनहृदयः सर्व्वानेवोत्सवमग्नानकरोत्। ततः कालक्रमेणैवास्य जातीयमहोत्सवरूपेण परिणतिर्बभूव। तदनन्तरञ्च नृत्यगीतचन्दनकुसुमसुराप्रभृतयः संयोजिताः सन्तो मधुमासं मधुरतरमकुर्व्वन्निव। तदा प्रियसमागमे सङ्गीतच्छलेनोच्छ्वसिताभिर्निभृतहृदयोद्वेलप्रसृतभावधाराभिर्जनानां सम्भ्रमसङ्कोचं प्लावयित्वा कश्चिदपूर्व्वानन्दसान्द्ररसस्तान् समस्तान् सातिशयमभिभवति। अहो! रमणीयानि वत्सरस्य तानि वसन्तोत्सवदिनानि।

अस्मिन् यात्रावसरे नृत्यगीतादिवन्नाटकाभिनयस्यापि प्रचलनं परिलक्ष्यते। तथा च मालविकाग्निमित्रनाटकस्य प्रस्तावनायाम् "अभिहितोऽस्मि परिषदा श्रीकालिदासग्रथितवस्तुमालविकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे प्रयोक्तव्य"मिति सूत्रधारमुखेणाभिनयव्यापारः सूच्यते। पुनश्चावसरेऽस्मिन् राज्ञः श्रीहर्षदेवस्य सभायां श्रीहर्षकृतापूर्व्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका नानादिग्देशागतानां नृपतीनां पुरतोऽभिनीतासीत्।

उक्तमेवास्माभिः पूर्वं यत् कदाप्रभृत्ययं भारतीय-जातीयमहोत्सवो होलाकामहोत्सवरूपेण परिणतिमवाप तस्य यथार्थप्रमाणं दुर्लभमिति। परं ज्ञायते तावदेतावदस्माभिर्यद्भारतस्य सर्वत्राप्रतिहतभास्वरोज्ज्वलप्रभावप्रभया यदा "एसिया"-महामण्डलस्य जलस्थलादिस्थानानि समुद्भासितान्यासन्—स्थलमार्गे गान्धार-वाह्लीक-तिब्बत-तातार-महाचीनप्रभृतिषु तथा च जलपथे लङ्का-सुमात्रा-यवद्वीव-जापानप्रभृतिषु प्रदेशेषु विस्तृतो बौद्धप्रभावः समुद्रपोतेन भारतप्रशान्तादिमहार्णववक्षसि द्वीपाद्वीपान्तरं गमनागमनव्यापृता वाणिज्यनिष्णाता भारतीयसांयात्रिकाः, किं बहुना नानाजातीयानामध्ययनशीलानां नालान्दास्थसुप्रसिद्धबौद्धविद्यालयान्तेवासिनां विविधविद्यानुशीलनेन भारतज्ञानभाण्डारस्य देशाद्देशान्तरं वहनेन सर्वत्रैव हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रसारितो भारतगौरवसम्भारस्तदा खलु तस्मिन् महामहिमान्विते समयेऽपि मदनोत्सवस्यानुष्ठानमक्षुण्णमेवासीत् ।

उत्सवोऽयं प्राचीनकालतः सर्वत्र भारते वर्षे प्रचारबाहुल्यमासाद्याद्यापि किञ्चन परिवर्त्तनविकृतः सन्महता डम्बरेण समनुष्ठीयते । तथाहि वसन्तोत्सवे श्रीकृष्णपूजनवृत्तान्तोऽपि संश्लिष्ट एवेति हरिभक्तिविलासे फाल्गुनोऽत्सवावसरे द्रष्टव्यम् । यथा—

"फाल्गुन्यां पौर्णमास्यान्तु विदध्याद्वैष्णवैः सह ।
श्रीकृष्णप्रियभक्तस्य वसन्तस्यार्च्चनोत्सवम् ॥
भविष्योत्तरतो ज्ञेयस्तद्विधिस्त्वेदपीच्यते ।
यः श्रीयुधिष्ठिरस्योक्तो व्यक्तं भगवता स्वयम् ॥"

तन्माहात्म्यञ्च तत्रैव—

"एवं यः कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवम् ।
मत्प्रसादाच्च सिध्यन्ति तस्य सर्वे मनोरथाः ॥
वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च ।
सम्प्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोऽब्दशतं सुखी स्यात् ॥"

केचन ब्रह्मवैवर्त्तपुराणस्य—

"चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम् ।
आवीरचूर्णं रुचिरं गृह्यतां परमेश्वरः ।"

इत्यनेन मन्त्रेण भगवते श्रीकृष्णायावीरचूर्णप्रदानव्यापार उल्लिखित एवेति दृष्ट्वा होलाकासूत्रमध्याहर्त्तुं शक्यन्ते । अपि तु श्रीकृष्णो भगवान् स्वयमेव मदनोत्सव आवीरचूर्णेनार्च्चितोऽभूदित्येव तदानीन्तनदोललीलासीत् ।

इस्लामधर्म्मस्य यदा नवोत्थितप्रभावविस्तारिमहाशक्तिः शनैः शनैः पश्चिमसागरतीरे पुञ्जीभूता सती भारतसीमान्तेषु प्रासरत्तदापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षे मदनमहोत्सवस्यातिशयेन प्रचलनमासीत्। अल्बेरुणीकृत-भारतविवरणीप्रकाशितग्रन्थे परिस्फुट एवास्य परिचयः। पुरुषोत्तम-देवरचिते हारावलीतिनाम्नि सुप्रसिद्धशब्दकोषे ग्रन्थकारेण होलाकेति वसन्तोत्सव इत्याख्यया व्याख्या कृता। दायभागटीकायां होलाका-शब्दस्य "होलीति भाषा" इत्यनेन व्याख्यानं कृतम्। मुसलमान-शासनसमय एव प्राचीनवसन्तमहोत्सवस्य होलाकेत्यभिधानं सञ्जातम्।

मदनोत्सवो हि पराधीनजातेर्मर्य्यादारक्षणे नितरामसमर्थः। अवरोधप्रथा नूनमस्याननुकूलैव। प्रकृतेः परिवर्त्तनमुत्सवस्य संघटित-मस्य मुसलमानाधिकारे। पुरातनकाले श्रीविष्णुपूजापि मदनपूजा-सहिता। सकलभुवननियन्तुर्विश्वस्य भर्त्तुर्भगवन्नारायणस्यैव सुम-हत्या कृपया धरा धृतरुचिरकलेवरा पुलकिता सती जगद्वासिनां पालन-क्षमैव प्रतिभातीति स्मरार्च्चनस्थाने नारायणस्य पूजाविधानं प्रवर्त्तित-मासीत्। अत एवाधुना प्रसूनविशिखपूजनं परिहाय श्रीविष्णुपूजा-भिवर्त्तते। उभयत्रापि पूजाया बाह्यानुष्ठानादिकमेकप्रकारमेव। अत आवीरचूर्णकुङ्कुमनृत्यगीताद्याचाराणां समानविधौ सत्यप्येतावानेव सञ्जातः प्रभेदो यल्ललनाकुलविलासकेलिललितवसन्तोत्सवः शनैः शनैः पुरुषमध्यसंक्रमणलब्धप्रभावविस्तारात् प्रायो हि विनापि स्त्रीजनानधु-नानुष्ठीयते महोल्लासेन। भवतु तद्यथा तथा वा; एतत्तु ध्रुव-मुररीकर्त्तव्यमेव यत् साम्प्रतं रूपकभावेन नारायणोद्देशानुष्ठिते होला-केति पर्वणि पर्य्यवसितो मदनमहोत्सवोऽयमेवेति। नागरनागरीणां मदनोत्सवे विभूषणार्थं चन्दनपुष्पमाल्यादिकं तथा हिन्दोलायां दोलनञ्चैतत् सर्वमेवाधुना श्रीश्रीराधागोविन्दचरणसरोजेषु समर्पितम्। श्रीवृन्दावनधामनि श्रीश्रीकृष्णबलरामोद्देशे तथा श्रीनीलाचले भग-वन्तं जगन्नाथमुद्दिश्य फाल्गुनशुक्लप्रतिपत्तः पूर्णिमापर्य्यन्तं होलाकेति फाल्गुनोत्सवो विविधानुष्ठानानुविद्धानन्दातिशयेन सम्पद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न केवलमस्माकमावासभूमावस्मिन् भारते वर्षेऽपि तु 'इंलण्ड'-प्रभृतिषु सुदूरप्रदेशेष्वपि वसन्तोत्सवस्यास्य परिलक्ष्यते कथञ्चन प्रचलनम्। पूर्वतनैराजानां मध्ये 'मे' इत्यभिधानस्य मासस्य प्रथमदिवसे "मे डे" * इत्युपलक्ष्यानन्दोत्सवप्रवाहः प्राचालीत्। अद्यापि युरोपमहादेशवासिनां मध्ये रीतिरेषास्ति यदनेके "मे डे" इत्युत्सवसमये कञ्चन जनं "मे फुल" † इति हास्यास्पदं मूढं विधायामोदप्रमोदेषून्मत्ता भवन्ति। मथुराया वार्थेनाख्यग्रामे येन प्रकारेण वाद्योद्दामसाचिव्येन होलाका सम्पन्ना भवति तथैवानुरूपप्रक्रियया रोमराजधान्यां "फालिक् अर्गि" ‡ इत्युत्सवे जना उच्छ्वसितानन्दाभिभूता रता भवन्ति। तत्रैव हि "स्याटार्णलिया" § इति नाम्नि प्रचलितेऽस्मद्देशीयानुरूप उत्सवविशेषे जना विविधासंयतामोदमत्ता अभूवन्। ग्रीसेऽपि भारतीयहोलाकोत्सवस्य प्रतिरूपनिदर्शनमस्माभिरुपलभ्यते। अलमतिपल्लवितेन। अस्मिन् जगतीतले प्रायः सर्वत्रैवास्य वसन्तोत्सवस्य प्रकारभेदः सम्यक् परिदृश्यते।

मदनमहोत्सवस्य होलाकालीलायां पर्य्यवसानान्तरमपि बहूनि यावद्दिनानि किल महोत्सवोऽयं सनातनधर्म्मावलम्बिनां सर्वप्रधानपर्वेत्येतत्तदानीन्तनमुसलमानैः सुज्ञातमेवासीत्। अष्टादशशताब्देऽन्तिमे भागे "कोम्पानीबाहादुराणां" "कलिकाता गेजेट" इत्याख्यायां पत्रिकायां होलाकेति पर्व्वावकाश एव तालिकामध्ये सर्वेषामेवोत्सवानां शीर्षस्थानमधिकुर्वन्नास्तेत्यस्माभिरवगम्यते।

देशकालादिनानाविधपारिपार्श्विकावस्थाप्रभृतीनामात्यन्तिकक्रमविपर्य्यये सामाजिकाचारादिपरिवर्त्तनानुसारेण वसन्तमहोत्सवस्य

---

* Merry-makings on May Day.

† May Fool.

‡ Phallic Orgies.

§ Saturnalia.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतेर्यत् प्रभूतं खलु वैलक्षण्यं सविशेषं सञ्जातं प्रागेव तदस्माभि-र्यथामति यथाशक्ति च दर्शितमेवेत्यलमतिगहनावगाहनेन।

याता समाप्तिमधुना रचना ममैषा (?)
अज्ञानमोहतमसावृतचित्तवृत्तेः।
तस्मात् कृपालुहृदयान् प्रति याचनं मे
दोषानुपेक्ष्य सकलान् विबुधाः क्षमध्वम्॥

उद्भटश्लोकाः

आशीर्वादं न गृह्णीयात् पूर्वदेशनिवासिनः।
शतायुरिति वक्तव्ये हतायुरिति भाषिणः॥१॥
अधिगगनमनेकास्तारका दीप्तिभाजः
प्रतिगृहमपि दीपा दर्शयन्ति प्रभुत्वम्।
दिशि दिशि विलसन्तः सन्ति खद्योतपोताः
सवितरि परिभूते किं न लोकैर्व्यलोकि॥२॥
सिंहो व्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिने-
र्मीमांसाकृतमुन्ममाथ तरसा हस्ती मुनिं जैमिनिम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गल-
मज्ञानाहतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्पाशास्त्रिणां पत्राणि

(१०)

श्रीशिवः शरणम्।   १८२६ का. ब,
१२ ग्रामम्, वाईचेत्रात्
(P.O. Wai)

सप्रणयं साशीर्वादं च मूर्धन्युपाघ्राय गाढं च परिष्वज्य कुशलं वार्तयति। आयुष्मन् वत्स! अतिक्रान्तसमयं किलाधिगता ग्रामान्तरं गतेन मया पत्रिका भवतः। अत एव चायमेतावान् विलम्बस्तदुत्तरप्रदान इति। हृदयानन्दन! एकान्ततः किल प्रीयते श्रीमतो व्याकरणोपाधिपरीक्षाप्रदानोदन्तमवबुध्यमानस्य मे चेतः। युज्यस्वानुकूलेन परीक्षाफलेनापि प्रसादाच्छ्रीमतो गिरीन्द्रनन्दिनीजानेः। किमिदानीमध्यवस्यति प्रेयान्मे जीवितायमानो बन्धुः? प्रेष्ठ! इच्छामि किल प्रबन्धानदसीयानधिगन्तुम्। युगपदेव हीदानीमवशिष्टाः सं चं. षट्संख्याः प्रकाशयितुमिच्छामि। आगामिनि च वत्सरे प्रतिमासं नियतसमयमेव चैनां प्रकाशयिष्यामि। जीवित! आस्वादितानि मया तिलपुलकानि प्रणयोपहारीकृतानि श्रीमता। यच्चात्र न सम्यक् प्रादुरभूवन् पुलकानि तदेतत् सान्द्रतरतामापन्नस्य फलं शर्करापाकस्य। अयं हि नातिसान्द्र एवात्रोपयोजनीय इति श्रीमत्या मातुर्ममाभिप्रायः। एष च श्रीमत्याः प्रजावतीदेव्याः श्रोत्रयोः क्रियताम्। निवेद्यन्तां च तस्यै नमांसि मे विनयावनतस्य। प्रणिपात्यतां च प्रियबन्धोश्चरणसरोजयोः प्रणयभरविनतोऽयं जन इति। अत्र मे मङ्गलम्। श्रीमतस्तु सर्वाङ्गीणं मङ्गलं मुहुर्मुहुर्जिज्ञासे। इति शिवम्।

वशंवदः
श्रीअप्पाशर्मा

साकं चामुना पत्रेण प्रेषयते मदीया प्रतिकृतिर्वत्साय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्योषः

प्रियपाठकमहाभागाः ! मा खलु व्योषशब्दसन्दर्शनेन भैषुर्भवन्तः। जानीमः खलु वयं व्योषशब्दस्त्रिकटुपर्य्यायः, त्रिकटु च, वर्जयित्वा रोगिणमरोचकग्रस्तं वा, न स्वदेत कस्मा अपि समसंस्थितायेति। तथापि पिण्डखर्जुरैर्द्वेजितस्य तिन्तिड्यामभिलाषो दृश्यत इति न्यायेनाद्य व्योष एव समुपस्थाप्यते भवतां पुरतः, एतद्रससमास्वादनेन सन्तर्पयन्तु भवन्तः निरन्तरसितशर्कराशनजडीकृतां रसनां स्वीयामिति संप्रार्थ्यते।

व्याकरणनिबन्धानामभिधानकोषाणां च टीकासूदाहरणप्रदर्शनप्रसङ्गेन समुद्धृता भूयांसः श्लोका व्योषकाव्यगता इति नैतत् तिरोहितं कोविदानाम्। तत्र किमिदं व्योषकाव्यमिति विचारयन्तो बहुधा विप्रवदन्ते विपश्चितः। बहव एव लेखकप्रमादाद् घोषशब्द एव व्योषतया विपरिणतः, घोषश्च नामैकदेशग्रहणे नामग्रहणमिति न्यायेनाश्वघोषपरः इत्याशेरते। केचन पुनः साहसिकाः व्योष इत्येतस्य स्थाने घोषमेव मुद्रयन्ति। तथाहि पुरुषोत्तमदेवकृतभाषावृत्तेरुपोद्घाते विद्वत्प्रवरेण परलोकनवप्रवासिना श्रीशचन्द्रचक्रवर्तिमहाभागेन व्यलेखि—घोषशब्द एव व्योषतया विपरिवर्तितः स्यात्। यच्च अश्वघोषप्रणीते बुद्धचरिते व्योषकाव्यतः समुद्धृता इमे श्लोका नैवोपलभ्यन्ते तत्र साम्प्रतं समुपलभ्यमानस्य बुद्धचरितग्रन्थस्य त्रुटितत्वमेव बीजम्। समग्रे ग्रन्थे प्रकाशमारूढे सर्वे इमे श्लोकास्तत्र सन्दृश्येरन् इति बलवत् सम्भाव्यते इति। सुगृहीतनाम्ना महामहोपाध्यायगणपतिशास्त्रिमहोदयेन त्रिवाङ्कुरराजकीयपुस्तकविभागात् प्रचारितस्य दुर्घटवृत्तिग्रन्थस्य सूचीपत्रे व्योषः घोषतयैव निर्दिष्टः, अश्वघोषप्रणीतस्य श्लोकस्य व्योषकारप्रणीतानां च श्लोकानामेकत्रैवैकेनैव नाम्ना समुल्लेखश्च कृतः। अन्यत्रापि बहुत्रैवं घोषव्योषयोर्विपर्य्यासो नयनसरणिमव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरन् विशकलीकरोति स्वान्तानि दोषज्ञानाम् । अत एवास्माभिर्व्योष-काव्यस्य स्वरूपनिर्णये साम्प्रतं व्यापार्य्यते लेखनी ।

व्योषकाव्यतः समुद्धृतानां श्लोकानां सन्दर्शनमात्रेणैव स्फुटं प्रतीयते यत् श्लोका इमे व्याकरणसूत्राणामुदाहरणप्रदर्शनार्थमेव प्रवृत्ता इति। अत एव व्योषकाव्यमपि भट्टिकाव्यद्वयाश्रयकाव्यादिसदृशमेव किञ्चन शास्त्रकाव्यं स्यात्। ततश्च शास्त्रकाव्यानां पर्य्यालोचनावसरे रावणार्जुनीयाख्यं भट्टभौमप्रणीतं काव्यं स्मृतिपथमधिरोहति, तत्र च प्रायेण सर्व एवेमे श्लोकाः समुपलभ्यन्ते । अत एव रावणार्जुनीय-मेव व्योषकाव्यम्, न खल्वेतस्य घोषेण साकं लेशतोऽपि सम्बन्धः सम-स्तीति सुस्थितम् ।

इदानीं व्योषकाव्यगताः श्लोकाः श्लोकांशा वा तैस्तैः शाब्दिकै-रुदाहरणतयोपन्यस्ता उपप्रदर्श्यन्ते । तथाहि—

(१) ऊर्य्यादिच्विडाचश्च (पा० १।४।६१) इत्यत्र तन्त्रप्रदीपे उक्तम्—तथाच व्योषः—ऊरीकृत्य क्ष्माभृतस्तस्य पातम् इति ।

मुद्रितस्य रावणार्जुनीयस्य तृतीयसर्गे सप्तविंशत्तमे श्लोके पादोऽयमुपलभ्यते ।

(२) व्रातेन जीवति (५।२।२१) इत्यत्र भाषावृत्तौ—'व्रातीन-सङ्घाः प्रकटं नरेन्द्रैस्ते राक्षसाः सङ्कटमाशु नीताः" इति व्योषः' इति ।

रावणार्जुनीये षोडशसर्गस्याष्टाचत्वारिंशत्तमे श्लोके एतदुपलभ्यते, केवलं तत्र सङ्घाः इत्येतस्य स्थाने सङ्गाः इति पठ्यते ।

(३) रजःकृष्यादिसूत्रे (५।२।११२) भाषावृत्तौ—

' "यां सम्प्रति प्राक् परिषद्वलानाम्" इति व्योषः' इत्युक्तम् । अस्यैव सूत्रस्य दुर्घटवृत्तौ 'या सम्प्रति परिषद्वलानाम्' इति नामनिर्देश-पुरःसरं व्योषकाव्यतः समुद्धृतम् । मुद्रितस्य तु रावणार्जुनीयस्य षोडशसर्गस्यपञ्चषष्टितमश्लोके "प्राज्ञात्मनां यां परिषद्वलानाम्" इति दृश्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) "ओजःसहोऽम्भस्तमसस्तृतीयायाः" (६।३।३) इति सूत्रस्य भाषावृत्तौ—

"इह तमःशब्दं तप इति केचिदूचिरे। तथाच व्योषः

तमोजसा निर्जितदेवराजं दृष्ट्वा रथस्थं तपसाप्तसिद्धिम्।

जग्राह राजा सहसात्तकोपश्चापानि चारूणि सशायकानि॥

इति।"

कातन्त्रपरिशिष्टेऽप्युक्तम्—"तमःस्थाने तपः पठन्ति शाक्याः * व्योषकाव्येऽप्यलुकि तदेव प्रयुक्तम्। अत्र गोपीनाथकृतटीका—तथा च व्योषेति (?)। तमोजसा निर्जितदेवराजं दृष्ट्वा रथस्थं तपसाप्तसिद्धिम्।" इति।

श्लोकोऽयं रावणार्जुनीयस्य ऊनविंशसर्गे समुपलभ्यते। परं तत्र द्वितीयपादस्त्रुटितप्राय एव।

(५) "अवोदैधौद्मप्रश्रथहिमश्रथाः" (६।४।२९) इत्यत्र भाषावृत्तिः—

प्रश्रथवद् भ्रमन्तमाजाविति व्योषः।

मुद्रिते पुना रावणार्जुनीये (२०।१९) "श्लथवेगं तमथो भ्रमन्तमाजौ" इति पाठ उपलभ्यते। अयं पाठः स्फुटमेव प्रामादिकः। "प्रश्रथवत्तमथो भ्रमन्तमाजौ", इत्येव समीचीनः पाठ इति प्रतिभाति।

(६) "अधःशिरसी पदे" (८।३।४७) इत्यत्र भाषावृत्तिः—

' "अधस्पदं यस्य निरस्तभूपतेः शिरस्पदं तस्य नतेऽङ्घ्रिपीठकम्" इति व्योषः' इति।

इदमेव श्लोकार्धं सुपद्ममकरन्देऽप्युदाहरणरूपेणोपन्यस्तम्। तत्र

---

* तथा च जैनेन्द्रव्याकरणसूत्रम्—ट ओजःसहोम्भस्तपोऽञ्जसः (४।३।१५१)। ओजोऽञ्जसहोऽम्भस्तपसष्टः इति च शाकटायनीयं सूत्रम् (२।२।४।)। हेमचन्द्रेण तु स्वकीये शब्दानुशासने तपस्तमःशब्दावुभावेव पठितौ। तथा च तत्रत्यं सूत्रम्—"ओजोऽञ्जःसहोऽम्भस्तमस्तपसष्टः" (३।२।१२) इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अधस्पदं तस्य निरस्तभूपतेः शिरस्पदं यस्य न चाङ्घ्रिपीठम्" इति पाठः।

रावणार्जुनीये (२६।१६) तु—

शिरस्पदं येन च पादपीठं कृतं त्वदीयं नमतादरेण।
अधस्पदं तस्य निरस्तभूतः करोति राजन् वसुधाधिपस्य॥

इति पाठः सन्दृश्यते।

(७) कातन्त्रधातुप्रदीपस्य 'मनोरमा'व्याख्यायामपि व्योषतः समुद्धृतं वचनम्। तथाहि—तौदादिकस्य प्रच्छधातोर्वर्णनप्रसङ्गेनोक्तम्—'व्योषे "न संपपृच्छे गमनाय सत्वरा सखीजनम्" इति व्यतीहारविवक्षायामात्मनेपदं सिद्धम्, किन्तु सम्प्रसारणानुपपत्तेरस्य च्युतसंस्कारत्वं दोष इति भ्रान्तः (प्राञ्चः ?)। शरणदेवस्तु—अकृतेऽपि सम्प्रसारणे 'प्रक्ष्ये वा' इत्यस्य विषयत्वान्न छन्दोभङ्ग इत्याह।'

शरणदेवः दुर्घटवृत्तिकारः। दुर्घटवृत्तौ स्थलद्वितय एतद्गतो विचारः समुपलभ्यते। तत्र—"असंयोगाल्लिट् कित्" (१।२।५) इत्यत्रोक्तम्—

कथं न सम्पपृच्छे गमनाय सत्वरा इति व्योषः, संयोगान्तत्वात् कित्त्वाभावात्। उच्यते। अपशब्द एवायम्। अथवा "यजयाचयतविच्छप्रच्छरक्षो नङ्" (३।३।९०) इति नङो ङित्त्वेनागमशासनानित्यत्वात् तुकोऽभावे कित्त्वात् सम्प्रसारणे कृते ऋकाराश्रयस्तुक्। इति।

समो "गम्यृच्छि—"(१।३।२९) इत्यादिसूत्रस्य वृत्तावप्युक्तम्—

कथं 'न संपपृच्छे गमनाय सत्वरा सखीजनं सन्ददृशे तथापरा' इति व्योषः, तथा 'रक्षांसीति पुरापि संशृणुमहे' इति मुरारिः, अकर्मकादित्यनुवृत्तेः। उच्यते—कर्मव्यतीहारे तङत्र। सखीजनादिति वा पाठः। ल्यब्लोपे पञ्चमी। सखीजनं प्राप्येत्यर्थः। इति।

एतत्त्वतिमात्र' विस्मयकरं यत् सुपद्ममकरन्दे श्लोकार्धमिदं न समुद्धृतम्। मुद्रिते रावणार्जुनीये (२।२९)—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न संपप्रच्छे गमनाय सत्वरा विलासिनी सन्दृदृशे न चापरा" इति पाठ उपलभ्यते। तत्रात्मनेपदासाधुत्वशङ्कानुत्थानोपहतैव।

शरणदेवरामनाथादिभिः स्थितेर्गतिश्चिन्तनीया इति न्यायेन संपप्रच्छे इति पदस्य साधुत्वापादनाय कर्त्तरि कर्मव्यतीहारे इति सूत्रं शरणीकृतम्, तत् प्रकरणाद्यनालोचनविजृम्भितमेव। रावणार्जुनीये काव्ये पाणिनिसूत्राणां यथाक्रममुदाहरणानि प्रदर्शितानि। 'न संपप्रच्छे' इति श्लोकः 'समोगम्यृच्छी'तिसूत्रस्योदाहरणप्रदर्शनपरः। "कर्त्तरि कर्मव्यतीहारे" इति सूत्रस्य तूदाहरणम्—

"विपर्य्ययेणाशु नियोगकारिणस्तदा जना व्यत्यभवन्त सम्भ्रमात्" इति पूर्वमेवोपन्यस्तम् (रावण २।३)। "न संपप्रच्छे गमनाय सत्वरा सखीजनं सन्दृदृशे तथापरा" इति पाठः प्रामादिक एव। न खलु वैयाकरणधुरीणो व्याकरणसूत्राणामिवोदाहरणानि प्रदर्शयन्नीदृशं गरीयांसमपशब्दं प्रयुञ्जीत इति स्वप्नेऽपि सम्भाव्यते। तेन मुद्रितरावणार्जुनीयस्थः पाठ एव समीचीन इति प्रतिभाति।

इदानीं संपप्रच्छे इत्यत्र सम्प्रसारणस्य समीचीनत्वं विचार्य्यते। यद्यपि "स्याट् व्यपित् किद् वा" इति मुग्धबोधसूत्रेण संयोगादुत्तरस्यापिल्लिटः कित्त्वं विकल्पेन विहितम्, तथापि पाणिनितन्त्रे तादृशसूत्रवार्त्तिकाद्यनुपलम्भात् 'असंयोगाल्लिट् कित्' इति सूत्रेण विस्पष्टमेवासंयोगादुत्तरस्य लिटः कित्त्वविधानात्, रावणार्जुनीयस्य च पाणिनिसूत्रोदाहरणप्रदर्शनार्थमेव प्रवृत्तेः, न संपपृच्छे इति पदं कथमपि न सङ्गच्छते। न च "अपि माषं मषं कुर्य्याच्छन्दोभङ्गं त्यजेद् गिरम्" इति न्यायेनात्र पकाराकारस्य ह्रस्वत्वसम्पिपादयिषया प्रस्य पृत्वं कृतम्, "प्रह्रे वा" इति पिङ्गलसूत्रेण—प्रपरेऽपि पकाराकारस्य पाक्षिकह्रस्वत्वात्, 'गृहीतप्रत्युद्गमनीयवस्त्रा', "प्राप्तनाभिह्रदमज्जनमाशु" इत्यादिषु यथा। तेन "संपप्रच्छे" इति पाठ एव समीचीनतया प्रतिभासते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८) "विदिभिदिच्छिदेः कुरच्" (३।२।१६२) इत्यत्र दुर्घट-वृत्तिः—"तथाच संसारबन्धच्छिदुरान् द्विजातीन्" इति व्योषः इति। सुपद्ममकरन्देऽपि "विदिभिदिच्छिदेः कुरः" (४।१।७२) इत्यत्रैवम्। रावणार्जुनीयस्य चतुर्थसर्गस्थोनविंशश्लोके पादोऽयमुपलभ्यते।

(९) "अनुशतिकादीनां च" (७।३।२०) इत्यत्र दुर्घटवृत्तिः—कथं तर्हि 'व्याप्तमातिशयिकेन रसेन' इति व्योषः। उच्यते सूत्रकारादिमतेन।

मुद्रिते रावणार्जुनीये नैवोपलब्धमेतदस्माभिः। मुद्रिते दुर्घटवृत्ति-ग्रन्थे व्योषस्थाने घोष इति पाठो वर्त्तते। कदाचित् परमार्थत एवैतदश्वघोषकाव्यगतं स्यात्।

(१०) सुपद्मपरिभाषायां त्रयोदशपरिभाषाव्याख्यानावसरे पद्म-नाभभट्टैरुक्तम्—"क्वचिद्ग्रहणात्—

'मदर्थे हरिवर्य्योऽसौ प्रक्रम्योदधिमागतः' इति क्वायपि किज्-झलोरपरत्वे क्रमः क्वि वेति दीर्घो न स्यात्"।

द्वादशपरिभाषाटीकायां—" 'प्रक्रम्योदधिमागतः' इति व्योषे बाहुल्यात्" इति ग्रन्थकारः। त्रयोदशपरिभाषाटीकायां—प्रक्रम्योदधि-मिति व्योषे प्रक्रम्येति क्वायबादेशस्य नोपधत्वाभावात् स्थानिवत्त्वात् ङमन्तस्य न दीर्घ इत्यर्थः।

(११) सुपद्ममकरन्दे (१।३।२९)—

' "यथैव रत्नानि नृपस्य भूषणं तथैव तेषामपि भूषणं नृपः" इति व्योषः' इति।

रावणार्जुनीयम् २।६।

(१२) सुपद्ममकरन्दे (३।२।३०)—

वसन्तीह पुरा विप्रास्तथावात्सुः पुरामराः।
नागाः पुरा वसन्त्यस्यां रम्येयं सरितां वरा॥

इति मुद्रिते रावणार्जुनीये—"पुरामराः" इत्यत्र "पुरा सुराः" इति, तृतीयचरणे "नागाः पुरावसन्नस्याम्" इति च पाठो दृश्यते। तृतीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरणे अवसन्नित्येव पाठो ग्रन्थकारस्वरससिद्धः। काशिकायामपि "पुरि लुङ् चास्मे" (३।२।१२२) इत्यत्र "वसन्तीह पुरा छात्राः" इत्युदाहरणमुपन्यस्तम्। एतेन रावणार्जुनीयस्य काशिकातः पूर्ववर्त्तित्वं प्रतीयते। महाभाष्ये तु "रथिनायं पुरा याति" "रथिनायं पुरायासीत्"इति छन्दोबद्धमप्यन्यविधमेवोदाहरणमुपप्रदर्शितम्।

(१३) तत्रैव गमेः—(३।३।६१) इत्यत्र—समगंस्त इति व्योषः।

रावणार्जुनीये (१।१३)—

त्रासनम्रशिरसाशु शत्रुणा यत् पुमान् समगतार्द्रमानसः।
त्यक्तशत्रुजनया जयश्रिया संयुगेषु समगंस्त चास्त्रभीः॥ इति।

(१४) तत्रैव सम्पृच—(४।१।६१) इति सूत्रे—

सम्पर्किणी नदी राज्ञा संसर्गी सरिता नृपः।
अन्योऽन्यपावनावेतावित्यूचे सारणं शुकः॥ इति।

मुद्रिते रावणार्जुनीये (११।४) पुनः "सम्पर्की सरितां नृपः" इति पाठ उपलभ्यते, तत्र सम्पर्की इति पदं लेखकप्रमादसूचकमेव। मुद्रितग्रन्थस्य चतुर्थे चरणे "सारणः शुकम्" इति पाठः।

(१५) तत्रैव जल्पभिक्षेत्यादि सूत्रे (४।१।६७)—

"उद्धृतेषु सरोजेषु स्त्रीभिर्भ्राम्यन्ति तृष्णया।
वराकाः शोभना भृङ्गा भिक्षुका इव सर्वतः॥

इति व्योषः" इति।

रावणार्जुनीये (११।३४) शोभना इत्यत्र शोचना, भिक्षुका इत्यत्र च भिक्षाका इति पाठः। सुपद्ममकरन्दे भिक्षुक इति पाठो लेखकप्रमादतः।

(१६) तत्रैव विदिभिदि—(४।१।७२) सूत्रे—

"अथवा भिदुरा मीनाश्छिदुराः सर्वदेहिनाम्।
नश्वरा सहज जाता जलसंक्षोभपीडिताः॥

इति व्योषः" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080540

रावणार्जुनीये (११।४०) अभ्रङ्कषा मेदुरा मीनाः, नखराः सहजा जाताः इति पाठावुपलभ्येते। तत्र "अङ्गरा मेदुरा मीनाः" इति पाठः साधीयान्।

(१७) तत्रैव क्लचः (४।१।९६) इत्यत्र—

"संख्याकरो यस्य न बाहुशक्तेर्न्नर्तेऽपरस्त्वितकरो न यस्मात् इति व्योषः" इति।

(११) तत्रैव—

"स स्लोककारैरभिनूयमानो ममज्ज तत्राम्भसि चाटुकारैः। इति व्योषः।"

रावणार्जुनीये (१०।१२)।

(१८) तत्रैव "आत्मोदरेति" (४।१।९८) सूत्रे "तथाच व्योषः।

सन्त्रासितैनेकफलेग्रहिद्विजः सम्मानितात्मम्भरिराचसव्रजः।

कुर्वन् सरिद्वारि सकूलमुद्रुजं सस्रौ स वेगेन च कूलमुद्वहम्॥"

रावणार्जुनीये (१०।१६) 'सन्त्रासितानेकफलेग्रहिर्द्विजः' इति 'सस्रौ प्रवेशेन स कूलमुद्वहः' इति च पाठः।

(२०) तत्रैव घेटो मुष्यादेः (४।१।१०१) इति सूत्रस्य गण-सूत्रव्याख्याने—

"द्रोणम्पचास्तत्र मितम्पचाश्च ये अरुन्तुदाः प्राणभृतां निशाटाः।

विधुन्तुदाश्चापि गृहीतचापाः स्नान्तं प्रभुं ते परिवार्य तस्थुः॥

इति व्योषः" इति। 'ये अरुन्तुदाः' इत्यत्राभिनिहितसन्ध्यभावः स्फुट-मेव लेखकप्रमादकृतः। रावणार्जुनीये (१०।१७) 'निशाटाः' इत्यत्र 'निशाभ्यः' 'स्नान्तम्' इत्यत्र च 'स्नानम्' इति पाठः। उभयत्रापि मकरन्दधृत एव पाठः साधीयान् इति प्रतिभाति।

(२१) तत्रैव मेघर्त्ति सूत्रे (४।१।१०२)—

मेघङ्करस्त्वं जलजीविकार्थमृतिङ्करो मुक्तिमुपेयुषाञ्च।

भयङ्करं दक्षिणमाननन्तो क्षेमङ्करं प्राणभृतां तथापि॥

इति व्योषः।

रावणार्जुनीये (१०।२५)।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता—ओरियेण्टाल सिरिज

१ । **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्म्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, अस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगोऽयं ग्रन्थः—२॥०)

२ । **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-जीहान् फ्यान्स्यानेन-कृताङ्गलभूमिका-समेतम्—॥/०

३ । **मुक्ताफलम्**—वोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेय तथा परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ-लाहा पि-एच, डि, लिखित-बृहदाङ्गलभूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४ । **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनावृत्तिः)—१)

५ । **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत मलङ्कारशास्त्रम् डाः श्रीसुशीलकुमार दे डि लिट् महोदयेन संशोधितम्—१॥०)

६ । **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मक-शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चात्र वङ्गदेशीयलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्या-पक—श्रीहरदत्तशर्म्मणा सुवृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्बीजभूतत्वं पद्मपुराणस्य। मूल्य—१)

७ । **जयमङ्गला**—श्रीशङ्कराचार्य्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—१)

८ । **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-म्बुधिरिति शक्यते वक्तुम्—२)

৯। **ব্রহ্মসূত্রম্**—শ্রীমদ্ভাগবতভাষ্যসমেতম্। "অর্থোঽয়ং ব্রহ্মসূত্রাণাং শ্রীমদ্ভাগবতাভিধঃ" ইতি গারুড়বচনস্য যাথার্থ্যং প্রদিদর্শয়িষতা পণ্ডিত—শ্রীহরিদাসবিদ্যা-বাগীশেনাত্র শ্রীমদ্ভাগবতগ্রন্থাদুদ্ধৃতা গ্রন্থাংশব্রহ্মসূত্রভাষ্যতয়া নিরূপিতাঃ, ব্রহ্ম-সূত্রাণি চ বঙ্গভাষয়া বিশেষেণ ব্যাখ্যাতানি—২॥৹

प्राप्तिस्थानम्—ओरियेण्टाल प्रेस

१०७ नं मेछुयाबाजार ष्ट्रीट, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ভট্ট-গুণবিষ্ণু প্রণীত

ছান্দোগ্যমন্ত্রভাষ্য

শ্রীদুর্গামোহন ভট্টাচার্য্য কাব্য-সাংখ্য-পুরাণতীর্থ,
এম.এ সম্পাদিত

(মঃ মঃ ডাঃ শ্রীগঙ্গানাথ ঝা, এম-এ, ডি-লিট্ মহোদয়
লিখিত মুখবন্ধ সংবলিত)

সামবেদীয় কর্ম্মানুষ্ঠানে পাঠ্য বৈদিকমন্ত্রসমূহের ব্যাখ্যাত্মক "ছান্দোগ্যমন্ত্রভাষ্য" "গুণবিষ্ণু-টীকা" নামে বঙ্গে ও মিথিলায় সুপ্রসিদ্ধ। এই ব্যাখ্যা এত প্রাচীন ও প্রামাণিক যে হলায়ুধ, সায়ণাচার্য্য প্রভৃতি বেদব্যাখ্যাতৃগণ তাঁহাদের ভাষ্যে ইহা হইতে অংশবিশেষ গ্রহণ করিয়াছেন। ইহাতে বিবাহ, অন্নপ্রাশন, চূড়াকরণ, উপনয়ন প্রভৃতি দশবিধ সংস্কার ও স্নান, সন্ধ্যা, শ্রাদ্ধ প্রভৃতি নানাবিধ গৃহ্যকর্ম্মের উপযোগী মন্ত্রগুলি ব্যাখ্যাত হইয়াছে।

বহু আদর্শ পুথি অবলম্বনে এবং মুদ্রিত ও অমুদ্রিত নানাবিধ বৈদিক গ্রন্থের সহায়তায় এই পুস্তক বিশুদ্ধরূপে এবং সমগ্রভাবে সংস্কৃত-সাহিত্য-পরিষৎ হইতে প্রকাশিত হইয়াছে। প্রকাশের পর অল্পকাল মধ্যেই পুস্তকখানি ভারতবর্ষ ও ইউরোপে সর্ব্বত্র পণ্ডিতগণের সমাদর লাভ করিয়াছে এবং বিভিন্নভাষার পত্রিকায় ইহার সুখ্যাতিমূলক সমালোচনা বাহির হইয়াছে।

অভিমত—

হিতবাদী—"কালের কুটিল গতিতে বেদাধ্যয়ন বিলুপ্তপ্রায়, ফলে বৈদিক মন্ত্রের বিকৃতিহেতু আমাদের ক্রিয়াকাণ্ডগুলি পণ্ড হইতেছে।…এক্ষণে গুণবিষ্ণুর গ্রন্থ প্রকাশিত হওয়ায় অনেক সন্দেহের মীমাংসা হইল। যাঁহারা বিশুদ্ধরূপে মন্ত্রপাঠ করিয়া যথাযথভাবে শাস্ত্রীয় কর্ম্মের অনুষ্ঠান করিতে ইচ্ছা করেন, তাঁহাদের পক্ষে ও পুরোহিতগণের পক্ষে এই গ্রন্থ অবশ্য দ্রষ্টব্য।…"

मञ्जु-भाषिणी

इयमेकैव जगति संस्कृतभाषामयी 'साप्ताहिकी' वृत्तान्तपत्रिका। संस्कृतभाषा-ग्रन्थ-प्रकाशकानाम् अनुपमं विज्ञापनसाधनम्। सर्वदेशेषु प्रचलति।

भारत-ब्रह्मदेश-लङ्का-वासिभिर्देयं वार्षिकं मूल्यम्—२-०-० ; अन्यदेशीयैर्देयमस्यं ६ शिलिंग।

मैनेजर—मञ्जुभाषिणी
CONJEEVERAM (Madras.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri